ज्ञान-वर्धिनी

सरस्वती श्रुतिमहती

ज्ञान वर्धिनी सभा

लखनऊ विश्वविद्यालय

ज्ञानवर्धिनी

विश्वविद्यालयेऽत्रत्ये विभागे संस्कृते शुभे ।
सभान्तेवासिनामेका विभागाध्यक्षरक्षिता ॥

पालिताचार्यवर्यैश्च या नाम्ना 'ज्ञानवर्धिनी' ।
तदङ्गं पत्रिकेयं तु स्वकीयोद्देश्य - पूर्तये ॥

विश्वविद्यालयेऽस्मिन् वाऽन्यत्रकुत्रापि जायताम् ।
परिष्काराय शास्त्राणां प्रकाशाय च सत्कृतिः ॥

संस्कृतज्ञानसंवृद्ध्यै संस्कृतोद्धार - कर्मणे ।
छात्राणाञ्च तथान्येषां प्रवृत्तिर्जायतामिति ॥

सर्वथाकृतसंकल्पा भवतां 'ज्ञानवर्धिनी' ।
भव्योद्देश्यवती ह्येषा श्रीमद्धस्ते समर्पिता ॥

VICE-PRESIDENT
INDIA
NEW DELHI

5 December, 1959.

Dear Sir,

I am glad to know that the Sanskrit Vibhag of the Lucknow University would be bringing out its journal. My best wishes for its success.

Yours faithfully,

(S. Radhakrishnan).

तीरभुक्ति एलनगंज,
प्रयाग

स्वस्ति संयोजक महोदयेषु साशीर्वादं निवेदनम्
भवताम्पत्रम् प्राप्योदन्तजातञ्चावगतम् ।

संस्कृतविभागीयज्ञानवर्द्धिन्याः सभाया एष प्रयासः सर्वथा स्तुत्यः अनेनोद्योगेन छात्राणां बहुतरो लाभः स्यात् । कञ्चिद्विषयमवलम्ब्य रचनाभ्यासेन ज्ञानेऽपि निष्ठा लभ्यते विशेषतश्च विद्यार्थिनामुत्साहश्च वर्धते । किं बहुना, छात्राः समुन्नता भवेयुः पत्रञ्च चिरजीवित्वं लभेतेत्येव मे शुभाशीः । इति

भवतां वशम्वदस्य
श्रीउमेशशर्म्ममिश्रस्य

जनवरी १, १९६०

श्रीमत्पण्डितप्रवराणां, श्रीचिन्तामणि द्वारकानाथ देशमुख
महाभागानामाशीर्वचनम्

नई दिल्ली
६ १२ ५९

संस्कृत ज्ञानवृद्धयर्थंल्लक्ष्यं सा लखनौपुरे ।
विश्वविद्यालये छात्र सभा प्रस्थापितैच्छते ॥
स्वकीयमुख पत्रस्य प्रकाशन विधिं शुभम् ।
चिकीर्षुरितिश्रुत्वाऽभूत्प्रमोदो मे महत्तरः ॥
मुखपत्रेण हि सभाः प्राणान्तीति सुनिश्चितम् ।
तदेव निकषस्तासां गुणानां च कृतेस्तयोः ॥
वैयक्तिकश्च यो भव्य आविष्कारो मनीषिणाम् ।
संस्कृतैः संस्कृतेनापि पत्रेहि प्रतिबिम्बितः ॥
उपक्रमोऽयं भवतां भवतात्सफलोऽज्ज्वलः ।
आशास्यमिति पत्रेण प्रहिणोमि भवद्धितः ॥

चिं० द्वा० देशमुख

श्रीमन्तः पं० नरेन्द्रनाथ मोहन महाभागाः

परमोदारचरितानां, संस्कृतसंस्कृतिरक्षकाणां श्रद्धास्पदानां पण्डितप्रवराणां श्री नरेन्द्रनाथ मोहन महोदयानामाशीर्वादः ।

लखनऊ विश्वविद्यालय की "ज्ञानवर्धिनी" पत्रिका के उद्देश्यों को जान कर मुझे अपार हर्ष हुआ। स्वतन्त्र भारत को विद्या और विज्ञान की प्रत्येक शाखा की श्रीवृद्धि के लिये ऐसे प्रयासों की नितांत आवश्यकता है जिससे कि हमारे राष्ट्र की संस्कृति और सभ्यता अपने पूर्व गौरव के उस उच्चतम शिखर पर पुनः आसीन हो सके जिस पर कि प्राचीन काल के ऋषि-महर्षियों ने उसे पहुँचाया था। आप की पत्रिका की सफलता के प्रति अपना आशीर्वाद एवं हार्दिक शुभ कामना का अभिव्यञ्जन करते हुए हम आशा करते हैं कि आप लोग अपने इस पुण्य उद्देश्य की पूर्ति में सफल होंगे। और भारतीय संस्कृति की प्राण-भूत संस्कृत भाषा की महान् सेवा कर सकेंगे।

आप का शुभ चिंतक

पं० नरेन्द्रनाथ मोहन

प्रबंधसंचालक 'डायरमीकिन ब्रूरीज', सोलन

कसौली, लखनऊ

उदाराशयानां, श्रीमत् सरदार श्रीइन्द्र सिंह महोदयानां शुभकामना :--

मुझे यह जान कर बड़ी प्रसन्नता हुई कि लखनऊ विश्वविद्यालय के संस्कृत छात्र, अपने प्रयत्नों से एक संस्कृत पत्रिका का प्रकाशन करने जा रहे हैं। मेरी शुभ कामना और आशीर्वाद है कि वे लोग अपने उद्देश्य मे सफल हों।

स० इन्द्र सिंह
संचालक
सिंह इंजीनियरिंग वर्क्स
कानपुर

श्रीमन्तः सरदार इन्द्रसिंह जी महाभागाः

श्री वासुदेवशरण अग्रवाल महोदयानामाशीर्वचनम्:--

संस्कृतवाङ्मयरूपा महतीयंविद्या । वेदेषु उपनिषत्सु पुराणेषु धर्मशास्त्रेषु दर्शनग्रन्थेषु महाकाव्येषु ये धर्माः ते अस्मासु प्रचरन्तु । सृष्टिविद्यामाश्रित्य वेदेषु बह्व्यः विद्याउपदिश्यते । यथा ब्रह्मविद्या, संवत्सरविद्या, यज्ञविद्या, त्रिपुरुषविद्या, प्रजापतिविद्या, हृदयविद्या, गायत्रीविद्या, स्वयंभूविद्या, अग्निष्टोमविद्या, आधारविद्या, समुद्रविद्या, वाग्विद्या, देवविद्या, सूर्यविद्या, अहोरात्रविद्या, सदसद्विद्या, प्राणविद्या, अमृतमृत्युविद्या, रजोविद्या, इन्द्रविद्या, अग्निविद्या, अम्भोविद्या, व्योमविद्या, प्रजापतिविद्या, नारायणविद्या, दर्शपौर्णमासविद्या, तपोवि०, रोदसीवि० सावित्रीवि०, सूत्रात्मावि०, अन्तर्यामिवि०, ब्रह्मौदनवि०, चयनवि०, सवनवि०, छन्दोवि०, लोकवि०, उद्गीथवि०, मधुवि०, इत्येवमादयः नाना ज्ञानोपक्रमाः वेदेषु ब्राह्मणेषु च उपन्यस्यन्ते । एकैकस्या विद्यायाः या सामग्री संहितासु ब्राह्मणोपनिषदादिषुच संन्निविष्टा सती प्राप्यते तां संहृत्य संहृत्य अर्थवती व्याख्या पुरस्सरं क्रमशः प्रकाशयितुं यत्नः क्रियेत् । तर्हि महाफलावहा प्रवृत्तिः सा जायेत । प्राचीन भारतीय वाङ्मयस्य एषा विशेषता । वेदेषु या विद्या तासां एव पुराणेषु उपबृंहणं लभ्यते । कश्च अस्य प्रकारः इति अनुसंधानार्थः विषयः दृष्टिपथे आयाति । इत्थमेव शिल्प, संगीत, काव्यालंकारायुर्वेदादि विज्ञानेषु प्रभूतं वाङ्मयं संस्कृतभाषायामुपलभ्यते । तस्यापि नूतनशोधविधिना विमर्शः करणीयः प्रकाशन यत्नश्च । एवं शोधमार्गस्य परिष्कारं कुर्वतां विदुषां मनसि शास्त्र विषियणी चक्षुष्मतः नवनवोन्वषेणा नित्यं जागर्तु इति भगवन्तं प्रार्थये ।

वासुदेव शरण
अग्रवालः
हिन्दू विश्वविद्यालयः काशी

माननीयानां श्री चन्द्रभानुजी गुप्त महाभागानामाशीर्वचनम् :—

मानव समाज में सुव्यवस्था एवं सुख-शान्ति की स्थापना करने में भाषा का सर्वाधिक योगदान होता है और यह निर्विवाद है कि इस सम्बन्ध में संसार भर की भाषाओं में संस्कृत का स्थान सर्वोच्च है। अनादि काल से अब तक इसके अगाध साहित्य के द्वारा मानव समाज की महान् सेवा हुई है। इसके द्वारा समस्त समाज की इहलौकिक एवं पारलौकिक सुख-शांति की श्रीवृद्धि होती रही हैं। आज के समय में जब कि सारी मानवता अपने द्वारा उत्पादित नाना विपत्तियों से संत्रस्त है, संस्कृत भाषा का पुनरुद्धार और अधिकाधिक प्रचार 'रक्षक' सिद्ध हो सकता है। संस्कृत की श्रीवृद्धि और समुचित प्रचार आज के समय की सबसे बड़ी मांग है।

मुझे यह जानकर महान् प्रसन्नता हुई कि लखनऊ विश्वविद्यालय की ज्ञानवर्धिनी सभा एक संस्कृत पत्रिका का प्रकाशन करने जा रही है और उसके द्वारा भारतीय संस्कृति के प्राणभूत तत्वों, ऊँचे आदर्शों एवं सद्भावनाओं की स्थापना का सत्प्रयास किया जायगा। मैं ऐसे प्रत्येक प्रयत्न में योगदान कर सकने में अपना अहोभाग्य समझता हूँ जो कि संस्कृति की प्रतिष्ठा एवं प्रसार की वृद्धि तथा मानव-समाज में सद्भावों की संस्थापना में सहायक हों। अतः मेरी हार्दिक शुभकामना है कि सभा का यह प्रयास मङ्गलमय हो।

चन्द्रभानु गुप्त
लखनऊ

दिनांक दिसम्बर १९५९

पत्रिका-समितिः

संरक्षकः --माननीयाः डा० सत्यव्रत सिंह महाभागाः

निर्देशकः --आचार्य आनन्द झा महाभागाः

संयोजक सम्पादकः --श्रीनारायण पाण्डेयः

सहसम्पादकाः --रमाकान्त द्विवेदी, दयाशंकर चतुर्वेदी
महेशचन्द्र शुक्लः, आशालता तिवारी
चक्रपाणिः

× ×

प्रीमियर मोटर्स प्रा० लिमिटेड

— हजरतगंज, लखनऊ —

फिएट, डाज, डिसेटो आदि मोटरों तथा मोटर सम्बन्धी अन्यान्य सामानों के विक्रेता तथा निर्माता।

× ×

विषय-सूची

क्रमांक:	विषय:	लेखक:		पृष्ठाङ्क:
१.	प्रज्ञानं ब्रह्म	ऐतरेयोपनिषद्	....	१
२.	बसन्तः	संकलितः	....	२
३.	ज्ञानं तद्वर्धनञ्च	श्रीमदाचार्याः आनन्द झा महाभागाः		३
४.	काव्य-हेतु-विवेकः	डा० सत्यव्रत सिंहः	....	८
५.	शैवसिद्धान्ते 'पशु' स्वरूपम्	श्रीमदाचार्याः रुद्रप्रसाद अवस्थि महाभागाः		१७
६.	दासप्रथाम्प्रति कौटिल्यः	आचार्यः दीपङ्करः एम० एल० ए०		२०
७.	त्रिकतत्त्वेषु शुद्धाध्वपंचकम्	श्री रामचन्द्र द्विवेदी	....	२५
८.	भारतीय कलायाः वैशिष्ट्यम्	डा० शिवशेखर मिश्रः	....	३२
९.	ऋक्सामसम्बन्धविचारः	डा० मातृदत्त त्रिवेदी	....	३५
१०.	इति यास्कविरचितं निरुक्तम्	श्री अखिलेश मिश्रः	....	३९
११.	यज्ञकर्म्मसु सूक्तानामुपादेयत्वम्	श्री जगदम्बा प्रसाद सिन्हा महोदयाः	....	४३
१२.	कविकुल गुरुः कालिदासः	श्री कमलापति मिश्र महोदयाः	....	४७
१३.	नालन्दा विश्वविद्यालयः	प० रामलखन शर्मा महाभागाः	....	५२
१४.	कृष्णः घोरांगिरसशिष्यः—सान्दीपनिशिष्यश्च	डा० कु० वीणापाणि पाण्डेयः	....	५५
१५.	न्यायदर्शने प्रत्यक्ष-प्रमाणम्	श्री दयाशंकर चतुर्वेदी	....	६१
१६.	"कथं शाकुन्तले महदितिहास विरोधः	कु० कृष्णा वाजपेयी	....	६७
१७.	कोऽयमिन्द्रः	कु० सुधा नागर	....	७४
१८.	कर्तव्या चार्थसारेऽपि काव्ये—शब्द विचित्रता	श्री विशाल प्रसाद त्रिपाठी	....	८१
१९.	शाङ्कराद्वैत वेदान्ते मायास्वरूपम्	श्री गोविन्द प्रसाद शर्मा	....	८७
२०.	कोऽयमद्वैतवादः	सुन्दर झा	....	९२
२१.	सट्टकसाहित्यम्	कु० अरुणा अग्रवाल	...	९६
२२.	परमाणुवाद खण्डनम्	श्री राजेन्द्र कुमार मिश्रः	....	१०१
२३.	समय एव करोति बलाबलम्	श्री प्रह्लाद नारायण त्रिपाठी	....	१०४
२४.	साङ्ख्यमत समीक्षा	श्रीमती गिरिजा देवी 'निर्लिप्त'	....	१०७
२५.	"संस्कृत-साहित्य-महिमा"	सावित्री नागप्पा	....	१०९
	सम्पादकीयम्		....	११२

ज्ञानवर्धिनी

समारम्भाङ्कः | लखनऊ विश्व-विद्यालयः संस्कृत विभागः | वसंत पंचमी १८८६ शकाब्दः

एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च,
पञ्चमहाभूतानि पृथिवी वायुराकाश आपो ज्योतींषी-
त्येतानीमानि च क्षुद्रमिश्राणीव बीजानीतराणि,
चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि,
चोद्भिजानि चाश्वा गावः पुरुषा हस्तिनो,
यत्किंचेदं प्राणि जङ्गमं च पतत्रि च,
यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रम् ।
प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः
प्रज्ञा प्रतिष्ठा
प्रज्ञानं ब्रह्म ॥ ३ ॥
स एतेन प्रज्ञेनात्मनास्माल्लोकादुत्क्राम्यामुष्मिन्स्वर्गे लोके
सर्वान् कामानाप्त्वामृतः समभवत्समभवत ॥ ४ ॥ [ऐतरेयोपनिषद् अ० ३]

बसन्तः

----:०:----

[१]

मलयपवनविद्धः कोकिलालापरम्यः,
सुरभिमधुनिषेकाल्लब्धगन्धप्रबन्धः ।
विविधमधुपयूथैर्वेष्ट्यमानः समन्ताद् ,
भवतु तव बसन्तः श्रेष्ठकालः सुखाय ॥

--कालिदासः

[२]

उद्यद्विद्रुमकान्तिभिः किसलयैस्ताम्रां त्विषं बिभ्रतो ,
भृङ्गालीविरुतैः कलैरविशदव्याहारलीलामृतः ।
भ्राम्यन्तो मलयानिलाहतिचलैः शाखासहस्त्रैर्मुहु-
र्भ्रान्तिं प्राप्य मधुप्रसङ्गमधुना मत्ता इवामीद्रुमाः ॥

--श्री हर्षः

[३]

लताकुञ्जं गुञ्जन् मदवदलिपुञ्जं चपलयन्,
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रवलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्,
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि-दिशि ॥

--विश्वनाथः

ज्ञानं तद्बर्धनञ्च

श्रीमदाचार्याः—

आ
न
न्द
झा

महाभागाः

मन्ये न स्यात्कस्यापि सचेतसा ज्ञानस्य परमोपयोगित्वे विप्रतिपत्तिः । ज्ञानमेव हि सा खलु भवति सीमारेखा, यामाश्रित्य शक्यते केनाऽपि कर्तुं जडाजडयोः पार्थक्य-विवेचनम् । येषां हि मृद्दारुपाषाणादीनां चिकीर्षा-प्रवृत्त्योरभावात् समवगम्यते ज्ञानराहित्यम्, त एव हि प्रोच्यन्ते लोकैर्जडतया । ये च समवगम्यन्ते प्रोक्ताभ्यां ताभ्यां ज्ञानसाहित्येन ते न प्रोच्यन्ते कदाऽपि केनाऽपि जडा ननुप्राणिनः । येऽपि हि भूतचैतनिकाः स्वीकुर्वन्ति नाम मृद्दारुपाषाणादिष्वपि ज्ञानयोगं, तेऽपि ज्ञानगते स्फुटत्वास्फुटत्वे समुपादायैव प्रभवन्ति सम्पादयितुं लोकप्रसिद्धं चेतनाचेतन - विभागं तावदुरपलपम् ।। ज्ञानमेव हि मान्यान्यप्रादीप-चान्द्र-सावित्रादिभ्यः प्रकाशेभ्योऽप्यतिशायी प्रकाश इति को नाम न स्वीकुर्यात् पाषाणतामादधानः स्वस्मिन् ? शक्यन्त एव हि प्राप्तुमेवं विधान्यनेकानि वस्तूनि यानि नैव कदाचित् कथञ्चिच्च शक्यन्ते ननु विषयीकर्तुं प्रोक्तैस्तैस्तैः प्रकाशकाभासैः । किन्तु किमप्येकमप्येवंविधं वस्तु शक्यते पुरतः स्थापयितुं विवेकिनां केनाऽपि किम् यद्धि ज्ञानेन न शक्यते विषयीकर्तुम् ? अतएव हि प्रोक्तमभियुक्तैः "सम्विदेव हि भगवती वस्तूपगमे नः शरणमिति । ज्ञानस्य हि महत्त्वं कति नाम वर्ण्यताम् ? तद्वर्णनमपि न मुञ्चति कथञ्चिदपि तदधीनताम्

कमप्युपसहृता केनापि तथ्यमिदमुक्तं यत् "न बुध्यते इत्यपि बुद्धिसाध्यमिति"। ज्ञानमेव हि तद्बलं निश्शस्त्रमप्यमोघं मानवानां, येनवशीक्रियन्ते महाबलिनोऽपि, गहनतमकान्तारान्तरिता अपि च ते तेऽवारणा ननु वराह-शार्दूलखड्गि-पञ्चानन वारणाः। समुद्ध्रियन्ते चानेनैव सुतीक्ष्णेन वड़िशेन प्रवितितेन जालेन वा ते ते महान्तोऽपि वनचराः प्रोत्तालतरङ्गमालोदधि-गभीरतलादल्पकायै धीवरैरप्यधीवरैः। अतएव हि प्रोक्तं नीतिविद्भिः—"बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलमिति'। जानातीच्छति-यतते-चेष्टते-प्राप्नोत्युपयुंक्ते-उपभुंक्ते कोऽपि किमपीति विश्व-जनीनमेतत्। जानाति, द्वेष्टि, यतते-चेष्टते-नाप्नोति नोपयुंक्ते नोपभुंक्ते कोऽपि किम-पीत्यपि सर्वविदितम्। जानात्युदास्ते न यतते न चेष्टते प्राप्नोति वा नाप्नोति वा, उपयुंक्ते वा नोपयुंक्ते वा, उपभुंक्ते वा, नोपभुंक्ते वा, कोऽपि किमपीत्यपि वैरल्ये-नैव भवतुनाम, किन्तु विदितमेव सचेतसाम्। प्रभवन्त्येव ह्येताः परिस्थितयो विहाय केवलां परिस्थितिं सौषुप्तीं प्राणिनां सर्वेषाम्। सूक्ष्मेक्षिकया-निरीक्षितासु-परिस्थितिषु नवासु स्पष्टीभवति सर्वथा यत् कियानुपयोगो ज्ञानस्य प्राणिनां सर्वेषां सुव्यवस्थितानां जीवानाम्। नैकोप्येवं विधः शाब्दोभवत्वशाब्दः क्रियात्मको वा प्राणिव्यवहारः शक्यते प्रदर्शयितुं केनाऽपि कथञ्चिदपि, योहि नाम नापेक्षेत स्वात्मलाभाय ज्ञानं प्रकाशक-स्वरूपम्। एवं विधमुपयोगातिशयं ज्ञानस्य पश्यद्भिरेव हि तत्स्वरूपज्ञापकैराचार्यैस्तै-स्तैरुक्तमिदं मन्ये लक्षणं ज्ञानस्यास्य यत् "सर्वव्यवहारहेतुर्गुणो बुद्धिः ज्ञानमिति।"

अत्र प्रतिपादितं हि ज्ञानस्य गुणत्वं नोपादेयता दृष्टया किन्तु न्यायवैशेषिक-सिद्धान्तयोस्तस्य द्रव्याङ्गता दृष्टयैवेति सामञ्जस्यम्। यद्वा नैयायिकवैशेषिकाभ्यां प्रतिपाद्यमानं हि गुणत्वं न सांख्यमीमांसा-सिद्धान्तयोरिवामुख्यत्वापरपर्यायं गौणत्वा-त्मकं विवक्षितम्, अपि तु स्वाश्रय-द्रव्योत्कर्षाधायकत्वरूपम्। नातो न्यायवैशेषिक-सिद्धान्तयोरपि ज्ञानस्य महत्वाल्पत्वावकाशः। मन्ये न्यायवैशेषिकोक्तस्य गुणत्वस्य गौणत्वार्थकतामवबुध्यमानैरेव दार्शनिकैस्तैस्तैर्बौद्धैर्वेदान्तिभिश्शैवैश्च सर्वथा तदसहमानै-रुद्घोषितं सडिण्डिमघोषं ज्ञानस्यैव वस्तुत्वं पारमार्थिकम्। विहाय केवलं शून्याद्वैतिनं सर्व एव ह्यन्ये सौत्रान्तिक-वैभाषिक-योगाचार-साम्प्रदायिका बौद्धाः प्रविहाय तावदान्तरं पारस्परिकं कलहं समवलोक्यन्ते ननु क्षणिकालयज्ञानधाराया एवात्मतया मान्यतायां समानस्वरास्सर्वथा। तेष्वपि योगाचार-सम्प्रदायस्य दृश्यते विशेषतो ज्ञानमहत्वाधिक्या-ग्रहः। यतो हि सम्प्रदाये तस्मिन् सर्वाण्येव हि समवलोक्यनामनि वस्तूनि आन्तरस्य क्षणिक-ज्ञान-प्रवाहस्य आत्मापरनाम्नः खल्वाकारमात्रभूतानीति मन्यन्ते तेसा ग्रहं

सर्वथा। ते हि कथयन्ति यत् आन्तरेष्वेव हि तेषु-तेषु क्षणिकविज्ञानाकारेषु गृहवृक्षादिषु बाह्यतां समारोप्य गृह्णन्ति ननु लौकिकाः गृहवृक्षलतावितानादय एते बाह्या इति। अतो नास्ति क्षणिकेभ्यो ज्ञानेभ्योऽन्यत् किञ्चिदपि तत्त्वं वास्तविकं यद्गुणता स्यात् सम्भाविनी ज्ञानस्येति।

ब्रह्माद्वैतवेदान्तिनो यद्यपि स्वमान्ये व्यावहारिक-पारमार्थिकक्षेत्रे समवलोकयन्तः स्वीकुर्वन्ति ज्ञानस्य भेदचतुष्टयं-ब्रह्मचैतन्य-साक्षिचैतन्य-विषयाकारवृत्ति-प्रतिबिम्बितचैतन्य-वृत्ति-भेदेन। तथापि तात्त्विकता तैरपि ब्रह्मचैतन्यात्मकस्य नित्यस्यैवास्य विज्ञानस्य मन्यते सर्वाध्यासाधिष्ठानतया। अन्यदपि च ज्ञानत्रयं तत्तद्व्यावहारिकवस्तु प्रकाशनं कर्तुं महत्त्वं स्वस्मिन्नादधात्येवाव्यभिचारितया वेदान्त-सिद्धान्ते।

शैवा अपि चागमिनो ब्रह्माद्वैतवेदान्तिन इवैव ज्ञानस्यैवैकस्य महाचलत्तरङ्गासागरकल्पतया-वेदान्ति-ब्रह्म वैलक्षण्यमादधानस्य तत्त्वतां स्वीकुर्वन्ति पूर्वपश्चाद्भावेनाहन्तेदन्तापरामर्शयुक्तया तत्त्वतः स्वाभिन्नान्येव हि तानि-तानि दृश्यानि स्वकुक्षाववस्थितानि भासयतः स्वशक्त्येति किमतः परं-प्रतिपादनीयं भवेन्महत्वं तन्मते ज्ञानस्य। सहिताःप्राभाकरैः त्रयोप्येते नन्वद्वैतिनो ज्ञानस्य स्वप्रकाशत्वं स्वीकुर्वन्ति स्वस्वमर्यादानुसारमित्यहो महत्वम् ज्ञानस्य ?

सांख्य-सिद्धान्तेऽपि, आत्मचैतन्यतयाऽन्तःकरणधर्मतया च स्वीक्रियमाणं ज्ञानद्वयं सर्वथा नैवातिक्रामति महत्त्वमात्मतया-भोगमोक्षोभय-सम्पादकतया च। योगसिद्धान्ते-वृत्तिनिरोधस्य मान्य-स्वपक्षेऽपि तत्प्रवर्तकतयाऽन्तःकरणवृत्तिरूपस्य ज्ञानस्य माहात्म्यं सर्वथाऽनपलपनीयमेव। जैनानां मीमांसकानां च कर्मधार्मिकाणां सत्कर्मप्रवृत्तिः तदनुष्ठानं तत्साफल्यं च सर्वं "प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणमिति वात्स्यायनीय-भाष्यवचनानुसारं प्रमात्मकं ज्ञानमनपेक्ष्य न भवितुमर्हति कदाचिदिति तन्मतेऽपि ज्ञानमाहात्म्यमक्षुण्णमेवास्ते।

लौकायतिकस्तु भूताद्वैतवादी चार्वाकसम्प्रदायो ज्ञानस्यैवंविधं महत्त्वमावश्यकं पश्यन्नवलोक्यते यद्विकीर्णेषु भौतिकेषु कणेष्वपि तेषु-तेषु सर्वेषु, स्वीकरोति सद्भाव ज्ञानस्येत्यतः सर्वथा मन्तव्यमेव, सर्वव्यवहारसम्पादकतया महत्त्वं ज्ञानस्य। अतएव हि प्रतिपादितं मार्कण्डेयपुराणे "या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता नमस्तस्यै-नमस्तस्यै नमस्तस्यै नमोनमः" इति। ज्ञानापरपर्यायाया बुद्धेरेव सर्वाधिक-महत्त्वास्पदतयोपादेयत्वादेव हि च गायत्री मन्त्रेणापि तस्याः सद्विषयकत्वलाभात्मिकायै-प्रेरणायै सवितुर्ध्यानं

प्रतिपादितम्। ज्ञानस्यास्य सर्वव्यवहारहेतोः सद्विषयकत्व सम्पादनायैव हि चानादिकालादासृष्टेर्वा प्रवहन्ती समागच्छतीयं पावनतमा शिक्षामन्दाकिनीधारा, यामवगाह्य प्राप्तेन हि ज्ञानवैशद्येन भवति जीवनमनुकरणीयं शिक्षितानामन्येषाम्। अतः सर्वथा निर्विचिकित्समिदं यत् ज्ञानं सर्वाधिकमहत्वयोगीति। भोगमोक्षावेव हि प्राणिनां सर्वेषां स्वकीय-हार्द-परिस्थित्यनुसारं भवतो वाञ्छनीयौ। उभयोरपि तयो मूलतामाधत्ते ज्ञानमिति किमतः परं वैशिष्ट्यं प्रतिपादनीयं तस्य ?

ज्ञानस्यास्य वर्धनमुद्दिश्य विधीयमाने ननु विवेचने, इदतावदन्तर्दृष्टिपथमवतरति यत्, द्विविधं भवति तत्वतो ज्ञानस्य वर्धनम्। एकं विषयगतं सत्त्वमपरं विषयगतमाधिक्यम्। विषयगतं सत्त्वमेव हि फलतो ज्ञानस्यार्थाव्यभिचारः। य एव हि खलु प्रमात्वनाम्नाऽपि व्यपदिश्यते लोकैः। सद्विषयकत्वलक्षणायां वृद्धौ ज्ञानेषु सम्भवन्त्यां ज्ञाता ज्ञानवृद्ध इति गीयते, नैतावदेवफलं प्रोक्तलक्षणायाः ज्ञानवृद्धेः। किन्तु तत्प्रभावादाचरणान्यपि भवन्ति ज्ञातॄणां सन्तीति प्रभवति सर्वथा जीवनसाफल्यमपि। वृद्ध्या ह्यनया प्रथमया सह प्रोक्ता द्वितीयाऽपि वृद्धिरत्यन्तंनामापेक्षिता प्राणिनां, विशेषतो मानवानाम्। यतः प्राण्यपेक्षानुसारं प्रभवन्त्यानन्त्येन नवानां नवानां वस्तूनां समुत्पत्तयः प्रादुर्भावा वा प्रतिक्षणमिति सामान्यतो विदितप्रायमेवाधुनिकानां विस्फारितान्तश्चक्षुषाम्। परन्तु नहि सामान्येन हि ज्ञानेन तत्तद्विषयकेन समुपयोक्तुं शक्यते सारल्येन वस्तु तत्तदिति, विशेषतस्तत्तद्वस्तुज्ञानं, भवति नन्वपेक्षितम्। एतत विशेषतो जायमानं वस्तुज्ञानमपि क्रियमाणे विवेचने प्रतीयते द्विविधम्। औपदेशिकमनौपदेशिकञ्च। यद्ध्यनौपदेशिकं, यथाऽगृहीत पदपदार्थसम्बन्धानां मानवामन्येषां वा प्राणिनां तेषां तेषां, स्वतो जायमानं प्रत्यक्षस्वार्थानुमित्यादिरूपम्. तत्तु तत्तत्परिस्थित्यनुसारं विषयी करोत्येव सन्निकृष्टमसन्निकृष्टमपि वा ज्ञापकव्यापकादिकमिति तत्र प्रोक्तवृद्धिप्रयासोनार्हति तथा प्राप्तुं साफल्यं, यथा नन्वौपदेशिकज्ञानस्थलीयोऽसौ। यतः क्वचिदेकत्र स्थितस्य ज्ञानर्थिनः कियन्ति नाम वस्तूनि भवितुं शक्यानि तदिन्द्रियसन्निकृष्टानि ? विप्रकृष्टान्यविप्रकृष्टानि च तानि गृहीत-स्वज्ञापकानि ? अतस्समपेक्षितानां हि तेषांमुपयोगिनां विषयाणामौपदेशिकमेव हि ज्ञानं शक्यते सम्पादयितुं सारल्येन तैस्तैर्जिज्ञासुभिरिति मन्तव्यमेव। अन्यथा समुपस्थापिते हि तेषामेवमस्वीकुर्वतां पुरतः किं नाम प्रयोजनं शिक्षासंस्थानामिति प्रश्ने, किं नामोत्तरं दातुं शक्नुयुर्महानुभावास्ते ? परन्त्वौपदेशिकस्य हि ज्ञानस्य प्रोक्ता सद्विषयकत्वरूपा प्रथमा हि वृद्धिरपेक्षतेऽत्यन्तं मनोयोगमुपदेशविषये तत्समये।

यतश्शब्दार्थयोर्द्वयोरेव सममभ्यर्हितम्वा प्रभवति तत्र ग्रहणापेक्षा। उपदेशात्तद्विषययोरुभयोरपेक्षितो हि मनोयोगस्तदेवार्हति भवितुं शक्यसम्पादो, यदा तदानीं न भवेद्विषयान्तरञ्चारोमनसः । तत्रान्यत्रान्यत्र वा संलग्ने मनसि वाक्यमिदमेवहि चारितार्थ्यं भजते यत् "शृणोति शृण्वन्नपि नो पश्यन्नपि न पश्यतीति" कृते विषयान्तरमनस्सञ्चारचतुराणाम्। यन्निदर्शनस्य नास्त्यभावोऽसौ यो हि समपेक्षितस्सर्वथा शिक्षालयेषु सर्वेषु तेषु तेषु। औपदेशिकं हि ज्ञानमाप्नुवद्भिस्सावधानतया मनस्ते विषयान्तरसञ्चारमवरुध्यविधेयं स्वकीयं प्रोक्तप्रकारं ज्ञानवर्धनमित्यास्तामिदानीम्।

काव्य-हेतु-विवेकः

(डा० सत्यव्रतसिंहः संस्कृतविभागाध्यक्षः, लखनऊविश्वविद्यालयः)

[१]

क्रान्तं सारस्वतं यत्कविकृतमुदितं काव्यमित्याभिजात्यं
तस्यैतस्य प्रतीतं सहृदयहृदयस्यैव सत्यापनाभिः ।
प्राज्यं किं हेतुचक्रं तदुदयविभवे, हेतुरेकोऽथवाऽलं
चिन्ता चंचूर्यते ऽत्राकलितनवनवाकल्पना प्राक्तनानाम् ॥

[२]

शक्तिर्नैसर्गिकी वा प्रभवति कविताकामधेनुः स्मृता या
व्युत्पत्तिर्लोककाव्याद्यधिगतविविधाचारचर्चा ऽथ वा किम् ।
किंवा ऽभ्यासेन लोको भवति कविरिहोट्टङ्कितार्थाभिधानः
सर्वं वैतत् समस्तं ललितकविकलाप्रोद्भवे हेतुतत्त्वम् ॥

[३]

शक्तेः काव्योद्भवत्वं ध्वनिकृदभिदधे निष्प्रकम्प्यैः प्रमाणैः
व्युत्पत्तेः काव्यकृत्त्वं कतिचन जगदुर्वैबुधीहृद्यसृष्टेः ।
प्राज्योऽभ्यासप्रपञ्चे कविजनमहितां सिद्धिमाहुर्निकामं
नानात्वं काव्यतत्त्वप्रवचनपटुभिर्दर्शितं काव्यहेतौ ॥

[४]

यस्मिन् काव्ये प्रकामं रसमनुभवतां भावनासंप्रहर्षः
यस्मिन्नैवाभिधायाः प्रसरति पटुता, नैव शब्दो नवाऽर्थौ ।
नूनं प्राधान्यमाप्तुं प्रभवति, परमं तत्त्वमेकं रसाख्यं
तस्मिन् शक्तिः समन्ताद् विलसति सकलैर्हावभावैस्स्फुरन्ती ॥

[५]

यद्वा व्युत्पत्तिगम्यं सकलमपि तदुद्भासितं शक्तिभूम्ना
कान्तिं काञ्चिद् बिभर्ति, प्रभवति सुधियां भावनोद्भूतये च ।
प्रोद्यन्हार्दप्रसादः किमपि च कुरुते सौमनस्यं निकामं
काव्ये ऽभ्यासः कियान्वा कृत इति कविना, नैव तस्मिन् चि हिन्ता ॥

[६]

व्युत्पत्त्युत्थं तु काव्यं विलसति सुमहच्चाकचिक्याभिरामं
लोकादेः प्रत्यवेक्षा फलति कविकृता कल्पनाकोरकाढ्या ।
तास्ताः विद्याः कलाश्च प्रकटितविभवाः काव्यशय्याधिरूढाः
वाक्साम्राज्ये ऽत्र केषां विदधति न मनो हन्त ! चित्रीयमाणम् ॥

[७]

शाब्दीं व्युत्पत्तिमेकेऽभिदधति महतीं काव्यनीवीं कवीनाम्
केचित् प्राहुः कवित्वोद्भवविभवमयीं नैपुणीमर्थगाञ्च ।
प्राञ्चः शब्दार्थसेवाप्रमुदितमनसः काव्यमित्थं गतार्थं
सौशब्द्ये स्वर्थसार्थे ऽनुगतरसभरे भावयन्तः कृतार्थाः ॥

[८]

यद् वाग्वैमल्यमुक्तं यदपि च विमलार्थत्वमुक्तं रसानां
निष्कालुष्यं च काव्ये, सकलमिह भवेद्धेम्नि सौरभ्ययोगः ।
किंत्वेतन्नाधिगम्यं परिचयनिचयैः काव्यशिक्षाविधीनां
वाग्वै निष्यन्दते तन्निरुपधि नियतं कामदं यत् कवीनाम ॥

[९]

यच्चारुत्वं चमत्कृत्युपगतमुदितं चर्वणाद्दृष्टतत्वं
यस्यैतस्यावतारान् दश जगदुरनुप्राणिताशेषकाव्यान् ।
स्वारस्यं तत्तदीयं यदि जगति कविः कर्तुकामः स्वकाव्ये
कुर्यात् स्वान्तं नितान्तं गतमलमखिलैः शिक्षितैर्वाग्विकल्पैः॥

[१०]

औचित्यं यद्धि काव्ये ऽङ्गिनि भवति, तथा चाङ्गभङ्गे तदीये
तत्सर्वं तत्त्वमर्थ्यं हिततममुदितं चिन्तितौचित्यतत्त्वैः।
प्रोक्तं यत् प्रातिभं यत् सपदि च विपुलाहङ्कियाहुङ्कृतेन
श्लोकेनोदाहृतं च, प्रथयति नितरां तत्त्वनौचित्यचिन्ताम्॥

(इति प्रथमदशकम्।)

[११]

यत् काव्यं प्रतिभाप्रसूतमुदयत्यन्तर्मनस्कात् कवेः
तद्ध्येतन्मधुवर्षि धर्षितसुधं शक्तेः परिस्पन्दितम्।
व्युत्पत्तिः प्रभवेत् कुतो ऽत्र गदिता या ऽहार्यशक्तिर्बुधैः
दीपः किं कुरुते प्रभोर्भगवतस्सूर्यस्य दीप्तत्विषः॥

[१२]

यत्स्वोन्मेषविजृम्भितं भवति तल्लोकोपजीव्यं सदा
वाल्मीकेः प्रतिभाप्रभातवदहो ! श्रीभारतोल्लासवत्।
लोको ऽत्रा ऽभिनवे निलीय मनसा यद्येकनीडंस्थितः
काव्ये, किं तदिहास्ति यन्न लभतां काव्यस्य शक्त्यै नुमः॥

[१३]

व्युत्पन्नैर्वचनैर्विरच्यबहुभिः काव्यानि प्राप्तं यशः
किं तेन क्षणभंगुरेण भजता विद्युल्लताडम्बरम्।
कल्पस्थायिनि काव्यनामनि मनाक्तत्त्वेऽभियुक्ताः जनाः
यत्तन्वन्ति महाकवेः सुयशसां तद्ध्यम्बरस्याम्बरम्॥

[१४]

शक्तस्य प्रतिभाति शक्तिसहितो व्युत्पद्यते काव्यकृत्
शक्तिः संप्रसरीसरीति प्रतिभा-व्युत्पत्तिविच्छित्तिभिः,
एवं वादिभिरत्र भेदसरणिर्या काव्यमीमांसकै—
र्दृष्टा, सा तु न रोचते सहृदयस्वान्ताय सत्यं त्विदम्।

[१५]

यो ऽयं हन्त समाधिरित्यभिहितः शक्तेस्समुद्भासकः
येयं च प्रतिभा कृता कविनुता शक्तेस्समाराधिका ।
वैचित्र्याय भवेत्तदत्र सकलं, तत्त्वं तु विद्मो वयं
यत् काव्यैकनिदानमेकनियतं तच्छक्तिरूपं स्मृतम् ॥

[१६]

शिक्षाभिः समुदेति शक्तिरिति यत् क्षेमेन्द्रसिद्धान्तितम
यच्छिक्षाशतकं च काव्यपदवीपाथेयमित्यादिकम् ।
तत् स्यात् प्राप्तवचस्त्व एव नियतं ना ऽलं कवित्वे पुनः
किं दीपप्रकरैः कदापि कमलं व्याकोशतामश्नुते ॥

[१७]

अभ्यस्तं न कियत्पदार्थरचनं लोकैः कवित्वार्थिभिः
किन्त्वेकस्य कवेः स्मरन्ति सुधियः श्रीकालिदासस्य किम् ?
सर्वो ऽभ्यस्यति वै हठात्पदविधीन् क्लिश्यन् गुरूणां कुले
किन्त्वेकं वृणुते कविं भगवती वाणी प्रसन्ना स्वयम् ॥

[१८]

योऽयं काव्यकविबुधैर्निगदितो भेदैर्विभक्तोऽष्टभिः
यद्वा भेदकमुक्तमत्र रचना-शब्दादिरूपाञ्चितम् ।
व्युत्पत्तिः प्रतिभासखी च जननी काव्ये ऽष्टभेदेऽत्र या
तत्सर्वं महतां मतेर्विलसितं तत्त्वं भवेद्वा न वा ॥

[१९]

जन्माद्यस्य यतस्तदेव निपुणं काव्यस्य बीजं भवेत्
तत्त्वं तद्धि तदेकमेव रुचिरं यत्प्रातिभं ज्ञायते ।
शक्तिर्वा प्रतिभा ऽथवा भवतु तत् संभावना, कल्पना,
यद्वान्यत् किमपीह नाम लभतां, तत्त्वं त्वनौपाधिकम् ॥

[२०]

शक्तिस्सा प्रतिभा कवेः स्वरसजा या कारयित्री स्मृता
तत्स्पन्दात्मकतां तथा च दधती या भावयित्री पुनः।
ताभ्यामेव, तयैव वैकरसया, काव्यं समुद्भाव्यते
यद्वे का जननी कवेर्भवति सा धात्री द्वितीया पुनः॥

(इति द्वितीयदशकम्।)

[२१]

समुल्लसन्ती कविमानसे स्वयं
स्वयं प्रदात्री सुमनोभिवाञ्छितम्।
विराजते शक्तिरियं कवीश्वरी
विचित्ररूपा कविकल्पनाभिधा॥

[२२]

किमात्मिकेयं यदि चिन्त्यते, तदा
तनोति चिन्ताततिमेवमात्मिकाम
कवेर्हि कारुण्यविदो विजृम्भते
सुरस्रवन्ती किमु भावनामयी॥

[२३]

करोति भावान् हृदि शब्दरूषितान्
करोति शब्दांश्च सदर्थभावितान्।
तनोति शय्यां कविकल्पनासुखां
किमस्ति नालंक्रियते हि तद् यया॥

[२४]

चकार वाल्मीकिरमन्द सुन्दरं
तदीयसंरम्भभरेण तत्तथा।
ध्वनिर्यदीयो हृदयाम्बुधौ सदा
रसोत्सरूपस्सुधियां विवर्तते॥

[२५]

हृदश्शमोदन्वत एव केवलात्
मनस्क्रियानिर्मथितान्महाकवेः ।
उदेति सा भारतकाव्यकौमुदी
कृतं जगद्यत्सुधया रसाप्लुतम् ॥

[२६]

स्थितासु रामायणरम्यसूक्तिषु
स्थिते च वैयासिकवाङ्मयेऽखिले ।
समुल्लसन्ती कविकालिदासजा
प्रकृष्टशक्तिः प्रसभं विराजते ॥

[२७]

कियद्गभीरं ननु भावनिर्भरं
भवेद्धि लोके हृदयं मनस्विनाम् ।
इतीव संरम्भभरेण व्याप्रृता
करोति काव्यं भवभूतिकल्पना ॥

[२८]

महाकवेर्बाणकवेर्विनिःसृता
चकास्ति काव्यप्रतिभा महीयसी ।
बहुज्ञतामूर्धनि पादताडितं
यदीयमद्यापि विभाव्यते बुधैः ॥

[२९]

न दर्शनं काव्यधुराधिरोहणं
विना नवोल्लेखसमर्थवर्णनाम् ।
ऋषिर्हि पश्येद्यदिहास्ति नास्ति वा
कविस्तु तत्तत् सृजतीह नूतनम् ॥

[३०]

न चास्ति किञ्चन्मनसामगोचरं
न चास्ति किञ्चिद्वचसामगोचरम् ।
भवन्ति केचिद् ऋषयो मनस्विनः
भवन्ति केचित् कवयो वचस्विनः ॥

(इति तृतीय दशकम् ।)

[३१]

काव्यानि तानि रचितानि कदर्थनार्थं
व्युत्पन्नवाग्वितितिभिः कविकर्मकृद्भिः ।
सौख्यहारिहृदयानि यतः क्रियन्ते
नूनं रसारुचिपराणि रसोत्सुकानाम् ॥

[३२]

व्युत्पत्तिरेव कविताजननी तदात्वे
काव्यं चकास्तु ननु राघवपाण्डवीयम् ।
रामायणं गिलति यत्, कवलीकरोति
प्राज्यं महत्तमवपुर्ननु भारतञ्च ॥

[३३]

तस्मिन् ध्वनौ सुकविता सुमहारहस्ये
भावाः स्वभावसुकुमारतया भजन्ते ।
सख्यं हि तादृगमितं, न यथा सहन्ते
व्युत्पत्तिबन्धमतिबन्धुरचित्रबन्धम् ॥

[३४]

काव्यं हि भावमनुभावयितुं क्रियेत
स्वाभाविकेन रमणीयगुणोत्करेण ।
व्युत्पादनं न कवनं बहुवाग्विकल्पै—
र्भावा यतो विलुलिताश्शकलीभवन्ति ॥

[३५]

वाल्मीकिमार्गपतिताः कवयः कियन्तः ?
वैयासकीं न पदवीं बहवोऽधिरूढाः
या कलिदासकमनीयनिषेव्यपद्या ।
सा दूर एव गगनस्य सुरस्रवन्ती ॥

[३६]

सर्वेऽपि हन्त कवयः प्रतिभासहायाः
शब्दार्थसार्थगहने निभृतं प्रयान्ति ।
व्युत्पत्तिमेव तरसा समुपाश्रयन्त :
यान्तोऽपि यान्ति नहि काव्यशुभाग्रभूमिम् ॥

[३७]

रम्यं जुगुप्सितमुदारमथापि नीचं
सद्वस्त्ववस्तु सकलं प्रतिभाति यद् यत् ।
काव्याहितं समधिकं सहसा हि तत्तत्
प्रोद्भिन्नतत्त्वहृदयं रसमातनोति ॥

[३८]

अभ्यस्यतां ननु जनैः रचना कवीनां
शब्दार्थसंघटनया समनोऽभियोगम् ।
काव्यं तु नात्र किमपीह भवेद्, यतो वै
नास्तीह दर्शनलवो नहि वर्णना वा ॥

[३९]

संवादिवर्णरचना कविता यदि स्यात्
संगीतिरेव कविता, न हि तत्त्वमन्यत् ।
संवाद्यते हि कविभिर्हृदयं जनानां
वार्णाः वदन्तु सह वा न वदन्तु वा ते ॥

[४०]

शास्त्राणि तानि, विविधाश्च कलाविलासाः
विद्याश्च ताः बहुविधाः सकलं च शिल्पम् ।
व्युत्पत्तिवैभवमनन्तमिदं समस्तं
काव्याङ्गभावमधिगच्छति शक्तिसत्त्वे ॥

(इति चतुर्थ दशकम्)

ध्वनेः काव्यात्मभावत्वे शक्तेस्तत्स्फूर्तिहेतुता ।
व्युत्पन्नावपि शब्दार्थौ यां विना बद्धशक्तिकौ ॥४१॥

कवेः प्रतिभया योऽयं शोकः श्लोकत्वमागतः ।
रसात्मकत्वं काव्यस्य तदुपज्ञं प्रतीयते ॥४२॥

बुद्धिवादाः विवादाश्च शास्त्रप्राणाः स्मृतास्ततः ।
काव्ये हृदयसम्वादः प्राणरूपः प्रतिष्ठितः ॥४३॥

व्युत्पन्नत्वं बहुज्ञत्वं शास्त्रकृत्त्वे समीहितम् ।
काव्यकृत्त्वे तु भावानां भावनंवाऽनुभावनम् ॥४४॥

कवेर्या भावनाशक्तिस्सा हेतुः काव्यसंभवे ।
शब्दार्थसारे संसारे काव्यमुल्लास्यते यया ॥४५॥

व्युत्पत्तिवात्या या कापि सर्वा संशाम्यति स्वयम् ।
तद्वर्षामृतसंभारे मग्नोन्मग्ना तदुन्मुखी ॥४६॥

अभ्यासेन हि काव्ये यच्छायाच्छुरणमाहितम् ,
तत्सर्वं शक्तिजीवातु, प्रमाणं कविवेधसः ॥४७॥

क्षणं शयानाः कवयः विबुद्धाः क्षणमेव च ।
काव्यं कुर्वन्ति यत्नेन सिद्धा शक्तेर्विजृम्भणा ॥४८॥

शक्तिस्नेहो निपुणतावर्तिकः काव्यदीपकः ।
सदभ्यासशलाकाग्रप्रगुन्तः सुखमेधते ॥४९॥

शक्ति शक्तिमतोरैक्यं, स्पन्दते प्रतिभा कवेः ।
रसना रसिकानाञ्च स्यन्दते, किमतः शुभम् ॥५०॥

(इति पञ्चम दशकम्)

शैवसिद्धान्ते 'पशु' स्वरूपम्

[श्रीमदाचार्याः रुद्रप्रसाद अवस्थिमहाभागाः]

कोऽयं पशुपदार्थ इति चेत्, अत्र उच्यते, पशुर्नाम देहेन्द्रियादि व्यतिरिक्तो नित्यश्चिदात्मकोऽनेको विभुरनादिमलावृतोऽस्वतन्त्रः कर्ता च। अत्र देहेन्द्रियादि-व्यतिरिक्त इत्यनेन देहेन्द्रिय प्राणबुद्धयात्मवादानां निरासः । नित्य इत्यनेन क्षणिकात्मवादस्य, चिदात्मक इत्यनेन जडात्मवादस्य, अनेक इत्यनेन एकात्म-वादस्य विभुरित्यनेनाणुपरिमाणमध्यमपरिमाणात्मवादयोः, अनादिमलावृतोऽस्वतन्त्र इत्याभ्यामात्मेश्वरवादस्य च व्यावृत्तिः। कर्तेत्यनेन साङ्ख्यात्मवाद निरासः ।

तथाचोक्तम्—

अत सातत्यगमने व्युत्पन्ना ज्ञ स्वाभावतः
परामर्शात्मकास्तेऽतो गतेर्ज्ञानार्थता यतः ॥
आत्मनो व्यापिनो ऽ नन्ताश्चिद्रूपाः पशवस्त्रिधा । इति

श्रीमन्मृगेन्द्रे च—

नाव्यापको न क्षणिको नैको नापि जडात्मकः
नाकर्ता भिन्नचिद्योगी पाशान्ते शिवताश्रितः ॥ इति

श्रीमत्पराख्ये च—

देहान्योऽनश्वरो व्यापी विभिन्नः समलोऽजडः
स्वकर्मफलभुक्कर्ता किञ्चिज्ज्ञः सेश्वरः पशुः ॥

स च पशुरात्मा विभुः तस्य धर्मः ज्ञातृत्वमपि विभु तथा हि विभ्वात्मधर्मत्वाद्विभु न क्वाचित्कं ज्ञातृत्वम्। अतएवात्मा सर्वार्थ दृक्क्रियः। यदि त्वस्य ज्ञातृत्वं क्वाचित्कं स्यात् तस्यास्मनो विभुत्वं भज्येत। लोके हि धर्मिणो यावती व्याप्तिस्तावती धर्मस्यापि व्याप्तिर्दृश्यते । यथा पटगतं शौक्ल्यं पटमखिलं व्याप्य तिष्ठति एवमात्मानमपि ज्ञातृत्वं व्याप्य तिष्ठति। न च विषयासन्निधाने ज्ञानस्यानुदय इति वाच्यम्। स्वरूप-स्यैव विषयत्वात्। तदुक्तं श्रीमत् पौष्करे—

ज्ञातृत्वमपि तन्नित्यं धर्मत्वन्नित्य वस्तुनः
नानित्यधर्माधर्मीस्यान्नित्य आत्मा मुनीश्वराः ॥
तच्चेह विभुधर्मत्वान्न च क्वाचित्कमिष्यते
नित्यत्वमिव तेनात्मा स्थितः सर्वार्थ दृक्क्रियः
ज्ञातृत्वमपि यद्यस्य क्वाचित्कं विभुता कुतः
धर्मिणो यावती व्याप्तिस्तावद्धर्मस्य च स्थितिः ॥
यथा पटस्थितं शौक्ल्यं पटं व्याप्याखिलं स्थितम् ।
स्थितं व्याप्यैवमात्मानं ज्ञातृत्वमपिसर्वदा ।
न च निर्विषयं ज्ञानं परापेक्षं स्वरूपतः । इति ।

नन्वात्मनो व्यापकत्वे सिद्धे तद्धर्मस्य व्यापकता सिद्ध्येत् । न च तत्सम्भवति । देहादन्यत्रानुपलम्भेनात्मनो व्यापकत्वायोगात् । तत्राणुपरिमाण एवात्मेति पाञ्चरात्रा वर्णयन्ति—

बालाग्रशतभागस्य शतधाकल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ इति ।

क्षपणकास्तु प्रदीपप्रभावत् सङ्कोचविकासवानात्मादेहानुरुपपरिमाणवानिति वर्णयन्ति । पक्षद्वयमपि न सङ्गच्छते । आत्मा विभुः देहादन्यत्र स्थितार्थग्राहकत्वात्, यन्नैवं तन्नैवं यथा घटः । किञ्च आत्मा विभुः, सर्वत्रोपलभ्यमान कार्यत्वात्, इति व्यापकत्व सिद्धेः । किं च मध्यमपरिमाणत्व आत्मनो नित्यत्वं न स्यात् । यन्मध्यमपरिमाणं तदनित्यम्, यथा घट इत्यनुमानात् । तस्माद्व्योमवद्व्यापक आत्मा । तद्धर्मभूतमपि ज्ञानं व्यापकम् । तस्मात् प्रत्यक्षत एव निरस्तो वैशेषिकात्मवादः । तथा चोक्तं श्रीमत्पौष्करे—

ऋषयः—

व्यापकत्वे ह्यणोः सिद्धे धर्म व्यापकता भवेत् ।
अन्यत्रानुपलब्धस्य देहाद्व्यापकता कुतः ॥

ईश्वरः—

न देह परिमाणत्वमणूनामुपपद्यते
तस्माद्देहादतोऽन्यत्र स्थितार्थग्राहकत्वतः ।
किं चाभिव्यञ्जको यत्र-यत्र देहेन्द्रियादिकम्
तत्र सर्वत्र तत्कार्यदृष्टेर्व्यापकतात्मनः

व्यापको ऽ यममूर्तत्वाद्यथा व्योमततस्तथा
तद्धर्मभूतज्ञानं च व्यापकं विषयोन्मुखम् ॥
तन्नित्य रूपं विज्ञानं तच्च निर्विषयात्मकम्
पत्तोऽध्यत्त निरस्तोऽयं स्वपरग्राहकत्वतः ॥
अणोः प्रत्यात्म सिद्धत्वान्नानुमाध्यत्त बाधिका
नेह ग्राहकता बुद्धेः साधितत्वाज्जडत्वतः ॥
किं चैतद्ग्राहकत्वं च न भेदादात्मनां स्थितम्
स्वरूपं तु ततस्तेषां ग्राहकत्वेन संस्थितेः ॥

अत्रेदं विचार्यते पशुशब्दस्य लोमवल्लाङ्गूलवति शक्तिर्लोकव्यवहारात् गृह्यतो अपि "च पशुना यजेत्" इति विधिवाक्य घटक पशुशब्दस्य लोमवल्लाङ्गूलविशिष्टे एव शक्ति स्वीकारे एव सार्थकता भवति नान्यथा अन्याश्चानेकार्थत्वमिति जीवे पशुशब्दो लत्तिक एव वक्तव्यः माणवके सिंह शब्द इवेति पशुजीवयोः अविवेक पुरस्सरः प्रत्यत्तादि व्यवहारः साधारणोधर्मः तथा युक्तो जीवे पशुवद् प्रयोगः किञ्च जीवोऽनादिमलावृतः इतिशैव सिद्धान्तः मलिनसत्त्व प्रधानाविद्यावच्छिन्नः चित् जीव इति शाङ्कर सिद्धान्त इति। अन्ततोगत्वा शाङ्कर सिद्धान्त एव आसनं सुस्थिरं भवति। पति शब्दोऽपि परमेश्वरे सार्थक शाङ्करसिद्धान्ते एव यतः अल्पज्ञो जीवः सर्वज्ञः परमेश्वरः अल्पवस्तु विशिष्टस्य सर्ववस्तु विशिष्ट इति एवं विचारे कृते शाङ्करमते एव पाशुपत्यादिमतानां समावेशः अन्यथा वेद विरुद्धत्वात् तेषां मतानामनुपादेयतैव स्यात्। "पत्युरसामञ्जस्यात्" इति वेदान्तसूत्रेण व्यास देवेनैव बोधित मिति।



दासप्रथाम्प्रति कौटिल्यः

[आचार्यः दीपङ्करः एम० एल० ए०; नेता—सोशलिस्ट-एकता-पार्टी
उत्तरप्रदेश-विधानसभा, लखनऊ]

महामात्यकौटिल्यस्य नामापि मनसि अस्माकं राष्ट्रियगौरवमुद्बोधयति। ऋषिकल्पोऽयं राजनेता भारतवर्षस्य सुरक्षायै राष्ट्रस्यैकतायै अर्थव्यवस्थायाश्च राजनीत्या सह संयोगे यत् कर्म चकार तदसाधारणमेव आसीत्। परमस्य केवलमेतावदेव महत्वं नास्ति। प्रायो लोकाश्चिन्तयन्ति कथयन्ति च यत् कौटिल्यस्तु भृशं कुटिल आसीत्, मानवीया भावास्तस्य मानसे नासन्, स तु केवलं येन केन प्रकारेण स्वस्वार्थसिद्धिमेव शास्त्रं मन्यते स्म, अथ च साध्यप्राप्तिरेव तस्य साधनानां गरीयस्त्वं प्रमाणयति स्म। एतत् सत्यहीनं, निराधारं उन्मत्तजल्पितञ्च अस्ति। उदाहरणार्थं दासानां विषये तस्य विचाराः समालोकनीयाः एतच्च पुरःस्थाप्यते।

द्विसहस्रवर्षेभ्योऽपि पूर्वं महामात्यकौटिल्योविशालमौर्यसाम्राज्यस्य स्थापनां कारयित्वा यां राष्ट्रगतामेकतामतनोत् तत्तु सर्वोऽपि जानाति। परन्तु तस्मिन्काले दासानां स्थितिः समाजे असह्ययातनामयी, व्यथापूर्णन्तु आसीदेव, ततोऽप्यधिकं समाजे तेषां कृते कापि सुरक्षा नासीत्, अथ च कस्यापि पुरः ते स्वकीयां व्यथां क्रन्दितुं न साधिकारा आसन्। कस्यापि नासीत् साहसो यस्तेषां कृते सहानुभूतेर्द्विशब्दमपि व्याहरेत्। किमधिकं, करुणावतारेण तथागतबुद्धेनापि स्वसंघे तेषां प्रवेशो निषिद्ध आसीत्। एको दासो भ्रान्त्या तस्य संघे प्रविष्टो यदा तदा दासस्वामिभिस्तीव्रो विरोधः संगठित आसीत्। यद्देषबुद्धस्तेषां दासान् विद्रोहे प्रवर्त्तयतीति।

अथ च, एतैरेव दासैर्रोमदेशे सेनापतेः स्पार्टाकसस्य नेतृत्वे स्वमुक्त्यै मृत्युपर्यन्तं युद्धं कृतं आसीत्। लोका अद्यापि स्पार्टाकसं तस्य सेनां च स्मरन्ति नतशीर्षाश्च भवन्ति। परन्तु एतेन भारतीयस्पार्टाकसेन दासानां मोक्षाय या कथा व्याहृता आसीत् सा न केवलं तस्य शौर्यमपि वदति यत् तेन महामतिनां रूढिवादिसमाजस्य विरोधोऽपि न गणितो, न च दुष्कर्मणः पुर आत्मसमर्पणं कृतम्।

एतासु पंक्तिषु दासानां पक्षे यद् विधिविधानं कौटिल्येन निर्मितं, तस्य विवरणं प्रदीयते। एतेन द्वे प्रयोजने सिद्धे भवतः। प्रथमन्तु कौटिल्यस्य दासानां प्रति विचारा ज्ञायंते, द्वितीयं च तस्मिन् समाजे दासानां यातनापूर्णा स्थितिरपि सविस्तरं ज्ञातुं शक्या।

तस्मिन् समाजे मनुष्याणां—स्त्रीपुरुषाणां क्रयं विक्रयञ्च तथावदेव भवति स्म, यथाधुना गवांपशुपक्षीणां च भवति। स्वामी पुरुषमेकं दत्त्वाऽन्यं स्त्रियं तस्य बालकं बालिकां च विक्रेतुं शक्नोति स्म, न च कस्यचित् प्रभुता आसीत य एतस्य व्यापारस्य विरोधे जिह्वामपि चालयेत् किमंग विरोधस्य। कौटिल्यस्य प्रथमं विधानं आसीत् यत् यः कश्चिदपि आर्याणां जीवननिर्वाहसाधनभूतं उदारदासं अन्तरेण शूद्रं विक्रीणीते, कस्यापि पुर आधत्त च स विक्रेता आधत्ता च द्वादशपणदण्डभाक् भवेत्। यदि वैश्यं क्षत्रियं ब्राह्मणं च विक्रणीते आधत्ते च तदा दण्डः प्रथमात् द्विगुणः त्रिगुणश्चतुर्गुणश्च दण्डः क्रमशः स्यात्।

अत्रैव तस्य भावो न शाम्यति। स कथयति यद्यदि कश्चित् परजनं शूद्रादिकं अप्राप्तव्यवहारं, बालकं बालिकां वा विक्रीणीते आधत्ते वा तस्मै पूर्वसाहसो, मध्यमसाहस उत्तमसाहसो वा दण्डः। कौटिल्यस्य मते अर्थदण्डे स तु कठिनतमो दण्डः। स न केवलमेतेनैव सन्तुष्टः। यदि धर्मस्थीया विवादनिर्णेतार उचितं मन्येयुः प्राणदण्डोऽपि तस्मै नीचाय अभिप्रेतः कौटिल्यस्य। एष दण्डो न केवलं तस्मै यो विक्रीणते, प्रत्युत यो गृह्णाति तस्मात् यश्च साक्षीभवति तस्मा अपि प्राण दण्डः पूर्वाश्च दण्डाः प्रदेयाः।

कौटिल्यस्यैव शब्देषु— "परजनस्य पूर्वमध्यमोत्तमवधा दण्डाः क्रेतृश्रोतॄणां च"। महामात्यः कस्मादस्मिन् दुष्कर्मणि कुपित इति प्रश्ने तु स स्वयमेवोत्तरतिः—या म्लेच्छ जातयस्तासु दासप्रथाया आधिक्येन स्वसन्तानस्य विक्रये आधाने च दोषो न मन्यते। यवनदेशेषु परम्परागतरूपेण सर्वमेतत् प्रचलितमस्ति। परन्तु आर्यस्य स्वतंत्रस्य कथमपि दासभावः समुचतो नास्ति, न च स्वीकार्य इति। स स्वयमेव कथयति—"म्लेच्छानामदोषः प्रजां विक्रेतुमाधातुं वा। नत्वेवार्यस्य दासभावः।"

अथ च तेषु दिवसेषु निरधिकारा दासा यस्मिन् कस्मिन्नपि, निकृष्टादपि निकृष्टे कार्ये नियोज्या आसन् अभद्रव्यवहारा विभिन्नाश्च यन्त्रणास्तान् अहर्निशं प्रतीक्षन्ते स्म । मानवीयभावेनोद्रिक्तो महामात्यः प्रतिपादयति यत्—यदि कश्चिद् दासस्वामी स्वदासं शवं मलमूत्रे उच्छिष्टञ्चोत्थातुं बाधयति, दास्यै अनुचितदण्डं ददाति, नग्नस्तस्याः सम्मुखं गच्छति तां वा नग्नां स्वसम्मुखमानयति, अङ्गारैस्तां दासं वा तापयति, दासीं च बलात्कारेण बाध्यति, तदा स दासो दासी वा स्वकीयमूल्य-प्रदानेन विनैव स्वतंत्रा आर्याः स्युः । गृहकर्मसु नाना दासा दास्यश्चापि समानमेवा-धिकारं लभेयुः ।

एतेन बहूनां दासानां नष्टा मानवाधिकारा सुरक्षिता अभविष्यन्त इति तु विनिश्चितमेव ।

दासस्त्रीणां कन्यकाञ्च विशेषतो दुर्दशा आसीत् । ताभिः सह दासस्वामिनोऽकरुणं हृदयहीनममानवीयञ्च व्यवहारं यथाकामं निःशङ्कं निर्विरोधञ्च कुर्वन्ति स्म । परन्तु स्त्रीणां निस्तारणार्थं विशिष्टा नियमास्तेन प्रतिपादिता यत् यदि कश्चित् धात्रीं आहितिकां च दासीं या विषयं तेन समं न वाञ्छति तां स्ववशां करोति बला-त्कारं तया सह करोति स पूर्वसाहसदण्डस्य भागी, अथ यदि सा परवशा, तामपि च बलाद् गच्छति स दासस्वामी मध्यमसाहसदण्डं प्राप्नुयात् । यदि च कश्चित् पुरुषः कन्यामाहितिकां स्वयं दूषयति अन्यञ्च वा तथाकरणे प्रेरयति तस्य कन्या-क्रयणे दत्तं धनं नष्टं स्यात् कन्यायै च प्रतिकरं प्रदातव्यं, प्रतिकरस्य द्विगुणञ्च दण्डं राज्याय प्रदातव्यम् ।

न केवलमेतावदेव तेन कृतम् । तस्मिन् काले निर्धनमनुष्या ऋणादिमाना प्रायेण आत्मानं विक्रीय ऋणमुक्तं कुर्वन्ति स्म, जन्मपर्यन्तञ्च दासतां लभन्ते स्म । य एकवारं दासतां प्राप्त आसीत् तस्य पुत्राः प्रपौत्रा अपि सोत्तराधिकारेण दासतां लभन्ते स्म । इति क्रूरां व्यवस्थां विनाशयितुं महामात्यः कौटिल्यो नियमं प्रतिपादित-वान् यत् य आत्मानं विक्रणीते आधत्तो वा तस्य सन्ततिः आर्यैव भविष्यति तस्य पुत्राः प्रपौत्राश्च दासतां नैव गमिष्यन्तीति ।

न केवलमत्रैव तस्य दयालोर्लेखिनी विश्राममभजत् । अतोऽग्रे तेन प्रतिपादितं यद् यदि स दासः स्वस्वामिनोऽनुमतिं लब्ध्वा तस्य कर्माणि कुर्वन्नपि अतिरिक्तं

समयेऽन्यस्य कर्म कृत्वा किञ्चित् धनमर्जयति तत् स्वामिनं न गमिष्यति तस्य स्वामी स दास एव स्यादथ च पितुरर्जितं धनमपि स दायभागे लभेत। अतोऽपि परं, यदि स स्वस्वामिनो मूल्यं प्रत्यावर्त्तयति तदा आर्यत्वं, स्वतन्त्रत्वं लभेत। एतेनैव च प्रकारेण उदरदासः (केवलमाहारमात्रेण क्रीतः) आहितकः (येन आत्मा निश्चित-धनमात्रायां परस्य हस्ते निक्षिप्तः) सोऽपि दास आत्मन आर्यत्वं अधिगच्छेत्।

पुनश्च यया मात्रया यो क्रीतः प्रक्षिप्तश्च परस्य हस्ते तस्य निष्क्रयस्य मात्रा अपि तावती एव भविष्यति। यदि कश्चिद् आर्यो राजदण्डदानेऽसमर्थः सन् दासतामधिगतः स्यात्, सा तस्मिन्नेव क्षणे स्वतंत्रः स्याद् यदा राजकोशं तस्य दण्डो गच्छति। यदि च स दासस्तस्य दण्डस्य स्थाने शारीरिकं श्रमं करोति तेनापि तस्य दासता निवृत्ता स्यात्।

अथचार्यप्राणः कश्चिद् युद्धे बन्दीकृतो दासो नियतावधिपर्यन्तं तस्य पार्श्वे कर्म करोति, तस्य दासत्वसम्पादने भृतस्य व्ययस्यार्धं वा भागं प्रयच्छति सोऽपि तत्कालमेव स्वतंत्रो भवेत।

योऽपि कश्चित् अष्टवर्षन्यूनायुषं दासकुमारकं तदिच्छाविरुद्धं नीचकर्मणि नियोजयति, विदेशं नीत्वा तं विक्रीणीते आधत्ते च, सगर्भां वा स्वदासीं तस्याः प्रसवस्य सुव्यवस्थामकृत्वा विक्रीणीते आधत्ते च कस्यचिद् हस्ते, दूरदेशे नीत्वा च वा सर्वमेतत् तया सहकरोति तस्मै पुरुषाय पूर्वः साहसदण्डः प्रदातव्यः। ये च साक्षिणो दुष्टा अस्मिन् कर्मणि श्रोतारश्च तेभ्योऽपि तमेव दण्डं दद्यात्।

यश्च दासस्वामी अनुरूपं निष्क्रयं प्रयच्छमानोऽपि दासमार्यं न करोति तस्मै द्वादशपणो दण्डः। यदि च कारणं अदर्शयित्वा एव तं न मुञ्चति तदा स दास-स्वामी कारागारे निपातितव्यः। कौटिल्यस्यैव शब्देषु—

"दासमनुरूपेण निष्क्रयेणार्यमकुर्वतो द्वादशपणो दण्डः।
संरोधश्चाकारणात्।" (धर्मस्थीये ३ अधिकरणं, अर्थशास्त्रे)

दासस्वामी च तस्यामेवावस्थायां दासस्य सम्पत्तिं तस्य मृत्यन्तरे लभते यदा दासस्य ज्ञातयो बन्धुबान्धवाश्च न स्युः। अन्यथा त एव उत्तराधिकारं लभेरन्।

अथ च यदि स्वामी स्वदास्यां मैथुनं कृत्वा सन्तानमुत्पादयति तदा स बालको बालिका वा मात्रा सह आर्यत्वं लभेत। यदि च सा दासी तस्य पत्नीव गृहे निवासकामिनी स्यान्निवसेच्च तदा तस्याः सम्पूर्णोऽपि परिवार आर्यत्वं गच्छेत्।

एकबारं प्राप्ते आर्यत्वे यदि कश्चित् पुनः दासीं दासं वा विक्रीणीते आधत्ते च स द्वादशपणभागी स्यात्।

संक्षिप्तादस्माद् विवरणाद् तत्कालीनभारतस्य सामाजिकस्थितिरपि ज्ञायते यत्र दासनामका इमा मानवा पूर्णरूपेण मानवाधिकारेभ्यो वंचिता आसन्। परमेतेन एतदपि ज्ञायते यद् तस्मिन् भारते यवनदेशेषु इवदासप्रथां लोका सामाजिक-जीवनस्य अर्थतन्त्रस्य च आधारभूतं न मन्यन्ते स्म यथा यवनदेशेषु "प्लेटो" आदि-दार्शनिका सभ्यताया आधारभित्तिं मन्यन्ते स्म। विपरीतमिह दासप्रथा समाज-स्य भारभूतं कलंकमिव च गणनां गतमासीत्। तृतीयश्च निष्कर्ष एष अस्ति शेष-देशेषु यथा मानवसमाजः सामाजिकविकासस्य विभिन्नावस्थासु अवतरन् दास प्रथा-मतरोत् तथैव भारतवर्षोऽपि। चतुर्थन्तु यथान्यदेशेषु अति-आधुनिककालपर्यन्तं दासप्रथा निर्बाधं गच्छति स्म, जनता चा एतस्या विरोधेऽनवरतं सरक्तं युद्धमकरोत तथा न भारते देशे यत्र देशस्य सर्वमान्यो प्रामाणिक ऋषिकल्पो राजनेता कौटिल्यः स्वयमेव तस्या उच्छेदाय आन्दोलयति स्म, विधिविधानं ततान बन्धनानि च तेषां मुमोच। परन्तु दुःखदा तु पुनरपि एषा चर्चा अस्त्येव यत् तेषां मुक्त्यै संघर्षमानो महर्षिस्तेषां बन्धनानां निर्मूलीकरणे चिन्तयितुमपि सक्षमो न आसीत्।

तथापि श्रद्धया नतशीर्षा वयं नमामस्तस्मै करुणाकराय महामुनये येन सन्तप्तमानवानां मुक्त्यै सर्वतः प्रथमं उद्घोषः कृत आसीत्।



त्रिकतत्त्वेषु शुद्धाध्वपंचकम्

• • • • •

लेखकः—रामचन्द्र द्विवेदी एम० ए०, साहित्यदर्शनाचार्यः
प्राध्यापकः लखनऊ-विश्वविद्यालयः

श्रीशिवादिधरण्यन्तं तत्वचक्रं स्फुरद्वपुः ।
यदन्तर्भाति यत्सारं हृद्देशे तं स्तुमः शिवम् ॥

त्रिक-षडर्धसार-स्पन्द-प्रत्यभिज्ञाप्रमुखाभिर्भिन्नाभिरभिख्याभिरभिधीयमानं शिवाद्वय-प्रतिपादकं माहेश्वरदर्शनं साम्प्रतिकैर्विद्वदग्रेसरैः काश्मीरशैवदर्शनमिति प्रख्याप्यते । शैवदर्शनमिदं विश्वोत्तीर्णस्य विश्ववपुषः परमशिवस्याभासरूपाणि षड्त्रिंशत्तत्त्वानि प्रथयतितमाम् । महाद्वैतवादिनः शैवाः स्वात्मसात्कृताशेषषट्त्रिंशत्तत्त्वकलापस्य परम-शिवस्य व्यापकत्वाभिप्रायेण सप्तत्रिंशत्त्वमविकल्पात्मना च भाव्यं विश्वोत्तरेणेत्यवि-कल्पात्मकस्य मनसो वाचां च पारे वर्तमानस्य विश्वोत्तीर्णस्य तत्त्वस्याष्टात्रिंशत्त्वम-प्युद्घोषयन्ति । यदुक्तं श्रीतन्त्रवटधानिकायाम्—

षड्त्रिंशत्तत्त्वपर्यायस्तदभिन्नः परः शिवः ।
उपदेश्यतया सोऽपि स्यादवच्छेदभागतः ॥
अष्टात्रिंशं परं धाम यत्रेदं विश्वकं स्फुरेत् ।

प्रत्यभिज्ञाप्रक्रियायान्तु शिवादिधरणी-प्रान्तानां षड्त्रिंशत्तत्त्वानामेव निर्णयः । वस्तु–प्रमेय–सामान्य-पदार्थपर्यायं किमिदं तत्त्वं नाम ? तस्य भावस्तत्त्वमिति व्युत्पत्त्या भेदेन स्थितानां बहूनां वर्गाणां बहुष्वंगेषु सामान्यतया स्थितं 'यद्रूपं बहुधानुगामि' तत् सामान्यस्पन्दरूपत्वेन निखिलव्यक्तिरूपाभासान्तरयोगेन तननसहिष्णुत्वादविभक्तं वर्गीकरणं तत्त्वम् । यथा गिरिवृक्षपुरःप्रभृतीनां समानधर्मिणां भिन्नानां वर्गाणां पृथिवीरूपत्वम् । "स्वकार्ये" धर्मसमुदाये, स्वसदृग्गुणे सामान्यतस्तननाद्–व्याप्तृभावतस्तत्त्वशब्दस्यात्मार्थ-लाभः । यथाहुः श्रीमदभिनवगुप्तपादाः—

स्वस्मिन् कार्येऽथ धर्मौघे यद्वापि स्वसदृग्गुणे ।
आस्ते सामान्यकल्पेन तननाद् व्याप्तृभावतः ॥
तत् तत्त्वम् ··· ···· ···· तन्त्रालोके ६, ४–५

त्रिकदर्शने प्रातिभज्ञानोपकृतो युक्त्याऽप्यवगतस्तत्त्वग्रामः प्रत्यक्षानुमानयोः परिच्छिन्नत्वात् शैवागमानेव परमं प्रमाणयति। जडचेतनलक्षणस्य परमशिवाभासरूपस्य तत्त्वसन्दोहस्यायं विभाग उपपद्यते । शुद्धाशुद्धत्वेन द्विविधस्तावदध्वाः। [1]शिवेच्छैव स्वातन्त्र्यशक्त्या यत् पञ्चधा प्रविभज्यते तत् शुद्धाध्वपंचकम् । यदाहुः—

तदेवं पंचकमिदं शुद्धोऽध्वा परिभाष्यते[2] ।
तन्त्रालोके षष्ठो भागः श्लोक संख्या ५५.

अपरस्तावद् शुद्धेतरोऽध्वा श्रीमताऽधौरेशेनावभास्यते—तथाहि तत्रैव

ईश्वरेच्छावशक्षुब्धभोगलोलिकचिद्गणान् ।
संविभक्तुमथोदेशः सृजतीह सितेतदम् ॥[3]

एतस्मिन् सितेतराध्वनि वेदान्तिनां माया, सांख्यानां पंचविंशतितत्त्वानि, शैवदर्शनाभिमताः पंच शक्तयश्च संगृह्यन्त इति माया, कला-विद्या-काल-राग-नियति-रूपं परमेश्वरशक्तिपंचकम्, पुरुषः, प्रकृतिः, महदहंकारमनोरूपं त्रिविधमन्तःकरणं, बुद्धिकर्मेन्द्रियाणि दश, स्थूलसूक्ष्मत्वभेदतश्च दशधा कार्यवर्गः (तन्मात्रपंचकं भूतपंचकं च) इत्येवमत्रैकत्रिंशत्तत्त्वानि । इत्थमस्त्ययं तत्त्वप्रकाशः—

१—तत्र साक्षाच्छिवेच्छैव कर्त्र्याभासितभेदिका
तन्त्रालोके ६–५५ ।

२—शिवः स्वतन्त्र्यदृग्रूपः पंचशक्तिसु निर्भरः ।
स्वातन्त्र्याभासितभिदा पंचधा प्रविभज्यते ॥
तन्त्रालोके ६--४८ ।

३—शुद्धेऽध्वनि शिवःकर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः ।
तत्रैव ६–५६ ।



तत्र तावदसिताध्वाः मनाक् दिग्भेदेन शास्त्रान्तरसाधारणः। शुद्ध एवाध्वाः त्रिकदर्शनस्य तदितरदर्शनवैलक्षण्यं प्रतिष्ठापयति। अतस्तत्त्वपंचकस्य स्वरूपं तावत् निरूपणीयम्। शैवशासननये प्रकाशविमर्शात्मनः परमशिवस्य सर्वज्ञत्वं सर्वकर्तृत्वं च आम्नातम्, ज्ञानक्रिययोरभेदाभ्युपगमाद् प्रकाशविमर्शयोर्भेदो वस्तुत औपचारिक एव। विमर्शो हि चित्, चैतन्यं, स्वरसोदिता परावाक्, स्वातन्त्र्यं परमात्मनो मुख्यमैश्वर्यं, कर्तृत्वं, स्फुरत्ता, सारो, हृदयं, स्पन्द इत्यादिभिः शब्दैरागमेषूद्घोष्यते[1]। अनवच्छिन्नपरप्रकाशः परमेशः स्वस्वातन्त्र्यवशात् शिवादितत्त्वात्मना प्रविभज्यते तदात्मना स्फुरति प्रकाशते वा। सृष्टि-

---

१—पराप्रवेशिका पृ० १-२।

क्रमावभासे हि क्रमेण चिदानन्देच्छाज्ञानक्रियाशक्तीनां प्राधान्यम्।[1] उपपन्ना ह्येतासां शक्तीनां मनोविज्ञानदिशा क्रमप्रथा[2]। उपनिषदोऽप्यमुमेव क्रममवगमयन्ति। तथाहि—

सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्........तदैक्षत बहु स्याम्, प्रजायेय, इति, तत्तेजोऽसृजत (छान्दोग्ये ६, २, १–३)। शिवादिसद्विद्यान्ततत्त्वोन्मीलने परमशिवस्यापरिच्छिन्नं शुद्धस्वातन्त्र्यमेव तत्तद्वैचित्र्येण स्फुरतीति, मायीयमेयत्वाशुद्ध्यभावादयं शुद्धोऽध्वा। अत्र च तत्त्वपंचके क्रमशः शाम्भवशक्तिज मन्त्रमहेश-मन्त्रनायक-मन्त्रख्या शुद्धचैतन्यात्मा प्रमातृवर्गः। यथाहुः

शाम्भवाः शक्तिजा मन्त्रमहेशा मन्त्रनायकाः
मन्त्रा इति विशुद्धाः स्युरमी पञ्चगणाः क्रमात्।
तन्त्रालोके ६, ५३-५४।

चिच्छक्तिप्राधान्ये विश्वप्रतिष्ठाभूमिर्विश्वैकविग्रहो निखिलविश्वक्रोडीकारेण द्योतमानः शुद्धाहमामर्शरूपः प्रकाशैकघनः शिवः। शिवतत्त्वमिदं सर्वप्रमातॄणामन्तःस्फुरत्पूर्णाहन्ताचमत्कारमयं विश्वोत्तीर्णमपि विश्ववपुरवियुक्तज्ञानक्रियारूपं क्रियाद्वारेण सकलतत्त्वराशिगतसृष्टिसंहारशतप्रतिबिम्बसहिष्णु 'महाप्रकाशवपुरिति' वर्ण्यते। यदुक्तं श्री शिवदृष्टौ—

आत्मैव सर्वभावेषु स्फुरन्निर्वृतचिद्वपुः
अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः॥

यथा च श्रीविज्ञानेन्दुकौमुद्याम्—

सर्वव्यापकताभूमिर्ज्ञत्वकर्तृत्वसम्मता।
निजाभासचमत्कारमयी शिवदशा स्मृता॥

१—एकैकत्रापि तत्त्वेऽस्मिन् पंचशक्तिसु निर्भरे।
तत्तत्प्राधान्ययोगेन स स भेदो निरूप्यते॥
तन्त्रालोके ६, ५१-५२।

२—विस्तरेणाववोधायावलोकनीयम्—
अभिनवगुप्तः—डा० के० सी० पाण्डेयः।

शिवैकरूपं विश्वं न ततोऽतिरिच्यमानमिति शिवतत्त्वं सर्वतत्त्वानां साम्यावस्था । तथाहि श्रीशिवदृष्टौ—

एवं सर्वपदार्थानां समैव शिवता स्थिता ।
परापरादिभेदोऽत्र श्रद्धानैरुदाहृतः ॥

निर्विशेषाद्वैतवादिनां ब्रह्मनित्यशुद्धबुद्धमुक्तस्वभावतया प्रकाशैकघनमपि जडमणिरिव निर्विमर्श-मेव । सेश्वरसांख्यानामीश्वरः न केवलं पुष्करपलाशवत् सृष्टेर्निरपेक्षः अपितु तस्याः प्रकृत्यु-पादानतया तदस्पृष्टत्वमपि सुतरामापतति । सहकारिकारणपरतन्त्रस्य नैयायिकानामीश्व-रस्स नाम्नैव न पुनः वास्तवं, सर्वज्ञत्वं, सर्वकर्तृत्वं च घटते । सर्वं क्षणिकमुद्घोषयन्तः प्रकाशविमर्शात्मकं विश्वोत्तीर्णं परतत्त्वं कथं प्रतिष्ठापयेयुः ? कर्ममीमांसकानां जैमिनीयानां निरीश्वरत्वादित्वं सुप्रथितमेव । स्याद्वादिनां च नये विश्वोत्तीर्ण-विश्वपुश्च परतत्त्वमना-स्थमेवेति शिवस्वरूपनिर्वाहे सर्वशास्त्रविलक्षणा शैवशासनसरणिः । शाम्भवप्रमातुरत्र शुद्ध एवाहमामर्शः ।

शक्तितत्त्वम्

शैवदार्शनिकैः शिवशक्त्योर्नित्याव्यभिचरद्रूपत्वमाम्नायते । शक्त्या विरहितः शिवः शव एवेति तेषां सिद्धान्तः । वह्निदाहिकयोरिवानयोर्नित्यं तादात्म्यम् । यथाहुः—

शक्तिश्च शक्तिमद्रूपात् व्यतिरेकं न वाञ्छति ।
तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव ॥

श्रीमदभिनवगुप्तपादकृता वौधपंचदशिका श्लोक संख्या ३ ।

अमुमेवार्थं श्लोकयामासुर्भगवत्पादश्रीशंकराचार्याः—

शिवः शक्त्यायुक्तो यदि भवति शक्तः प्रभवितुम्
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ॥

आनन्दलहरी १ ।

शिवो यदा आनन्दचमत्कारोद्रेकेण स्वस्वातन्त्र्यमाहात्म्यात् बहिरुल्लिलसिपया-विश्वमेषितुं, ज्ञातुं, कर्तुं, चोन्मुखो भवति तदा शक्तिस्वभावोऽभिधीयते । शिवस्यैव विश्व-वैचित्र्यावभासनोन्मुखस्य किञ्चिदुच्छूनतावस्थायां शक्तितत्त्वव्यपदेशः । शक्तिलक्षणस्या-नन्दशक्तिप्रमुखायां शक्तितत्त्वावस्थायाम् अहमस्मीत्यामर्शः ।

सदाशिवः

इच्छाशक्तिप्राधान्येऽनन्योन्मुखस्वात्प्रकाशताविश्रान्तिरूपाया अहन्तालक्षणाया। ज्ञानशक्तेरुद्रेके शिवस्यैव सदाशिवतत्व्यपदेशः। "किन्त्वान्तरवशोद्रेकात् सादाख्यं तत्त्वमादितः" भास्करी पृ० २१७।

मन्त्रमहेशरूपशुद्धचैतन्यवर्गस्य विश्वमुन्मीलितमात्रचित्रकल्पतयेव भाति न पुनर्व्यक्ताकारतया यस्य चाहमित्यधिकरणे इदन्तोल्लासरूपः 'अहमिदम्' आमर्शः। यथाह श्रीभास्करः भावानान्तु स्तोकमिदन्तास्पर्शरूषितया अहन्तया ग्रहणम्, यत्सर्वमिदं तदहमेव न त्विदमाख्यं किमपि वस्तु भवति, एकस्य चिन्नात्रस्यैव सत्त्वात्" भास्करी पृ० २२६।

आरोहक्रमेण (संहारक्रमेण) विश्वस्यास्फुटत्वापादनादहन्तारूपतोद्रेचनाच्च अन्तःनिमेषः सदाशिव इत्यपि व्यपदिश्यते।

ईश्वरः

चिदानन्दप्रभृतिषु पंचशक्तिषु ज्ञानस्य स्फुटत्वे इदन्तालक्षणायाः क्रियाशक्तेश्चोद्रेके ईश्वरतत्त्वम्। सदाशिव तत्वेऽन्तःकरणैकवेद्यस्य ध्यामलप्रायस्य विश्वस्येश्वरतत्वे व्यक्ताकारतयाऽनुसन्धानम्। इदन्ताया अहन्तापेक्षया किंचिदुद्रिक्तत्त्वाद् 'इदमहम्' इति मन्त्रेश्वरवर्गस्यामर्शः। यथाहुः 'इदमहमिति तु इदमित्यंशे स्फुटीभूतेऽधिकरणे यदाहमंशविमर्शं निषिञ्चति तदेश्वरता। इदन्तारूपस्य विश्वस्य स्फुटत्वापादनात् बहिरुन्मेष एवेश्वरः। तत्र तावत् सदाशिवतत्वं विन्दुलक्षितमस्फुटं चित्रमिव, ईश्वरतत्वं च स्फुटं चित्रमिवेति वर्णयन्ति साम्प्रतिकाः।[1]

सद्विद्या

अहन्तेदन्तयोरैक्यप्रतिपत्तिः सद्विद्या। प्रमातरि अहमिति, प्रमेये च इदमिति धीर्वैयधिकरण्यमुच्यते तयोः पुनः सामरस्यम् "अहमिदंधियोः सामानाधिकरण्यमेव सद्विद्यात्वम्। यथाहुः "सामानधिकरण्यं च सद्विद्याहमिदंधियोः"। तथाह यत्र अहमिदम् इति समधृततुलापुटन्यायेन विमर्शः। सद्विद्या नाम सती शुद्धा विद्या। शुद्धिः पुनरस्या

१—पश्यन्तु—अभिनवगुप्तः पृ० २४२—डा० के० सी० पाण्डेयः।

वहिष्ठत्वेनावभासमानस्येदन्तास्पर्शरूषितस्य वेद्यवर्गस्य अहमिति परामर्शोपपादनम् यथाहुः शुद्धिर्वहिष्कृतार्थानां स्वाहन्तायां निमज्जनम् । परमार्थतश्चिदेकरूपा अपि भावा अचिदात्मना प्रमेयत्वेन (इदन्तया) स्फुरन्तीति तेषां यथावस्त्वभावसनमेव शुद्धिरुत्कृष्टत्वमविपरीतता वा । अन्ये पुनः शुद्धिमित्थमस्या मन्यन्ते - यत् सदाशिवादिष्वहमिदमिति सामरस्यशालिनी संविदस्ति, तेन सामानाधिकरण्यादेकरस्ययोगेऽपि मायीयस्येदन्तांशोल्लासस्यावर्जनीयत्वात् सदाशिवादीनां च मायावार्तानभिज्ञत्वात् सोयमिदन्तांशो मायीयतादोषव्युदासादहम्भागवदनयाप्रतीयमानत्वेनावस्थाप्यते । तत्प्रतीतिव्यतिरेके तु तत्सामानाधिकरण्यमेव भज्येत । अहमंशस्याच्छादकत्वाभासनं मायीयदोषनिरासपूर्वमिदन्तावभासनं वा शुद्धविद्येत्याचार्याः । अत्र च क्रियाशक्तेः प्राधान्यम् । मन्त्रवर्गश्चात्र प्रमाता । तत्र सदाशिवतत्वे-सदाशिवोऽधिष्टाता, ईश्वरतत्वे ईश्वरः, विद्यातत्वे च सदाशिवेश्वरौ । अधिष्टातृदेवतानां तत्वान्तरत्वं नाशंकनीयम् । यथा पृथिवी तत्वमिति स्वीकारेऽपि नृपं न कोऽपि शास्त्रकारस्तत्वान्तरत्वेन मनुते तथैव सदाशिवादीनामधिष्ठातृदेवानामपि तत्वान्तरत्वं कथंकारं स्यात् ?

तत्वपंचकमिदं परमशिवस्यैव चिदादिशक्तिव्यापारोल्लासादवस्थाभेदरूपम् । शिवस्वातन्त्र्यमेव स्वात्मनि स्वरूपभेदं तावद् दर्शयति । तत्वपंचके चास्मिन् देशकालरहितत्वात् तत्कृतः क्रमोऽपि नास्ति । चित्रशक्तिशतखचिते शिवे शक्तिव्याप्तातिभेदादुपदेशार्थं भिन्नतत्वप्रकाशः शैवशासननये कल्प्यते वस्तुतस्त्वभेद एव । यथोक्तमध्वसिद्धौ—

चित्रशक्तिसहस्राढ्यं शिवतत्त्वं समातिगम् ।
विभक्तं पञ्चधा चैकं शक्त्युल्लासविभेदतः ॥

भारतीयकलायाः वैशिष्ट्यम्

[ले० डा० शिवशेखर मिश्रः, एम० ए०, पी-एच० डी०]

का कला, किं तत्प्रयोजनम्, कोऽर्थः कलायाः, इत्यादयः प्रश्नाः चिरचर्चिताः अनन्तकालं यावच्च विचारयिष्यन्ते। साम्प्रतं लोके केवलार्थोपार्जनपराः कलेति-नाम्ना कलाविकृतिं प्रदर्शयन्ति । नूनं ते कलाघातकाः समाजद्रोहिणश्च । एवं सत्यस्वरूपा कला परोक्षैव संभाव्यते विद्वद्भिश्च सा हेयदृष्ट्याऽवलोक्यते ।

कला नाम अनादिः, अनन्ता, सर्वव्यापिनी, शान्तिकल्याणप्रदायिनी च । कलारहितं जीवनं शून्यमेव । एषा खलु कलासम्बन्धिनी गवेषणा अतिदुष्करा। यथा धर्मो न व्याख्यातुमर्हः तथैव कलाऽपि न परिभाषितुम् शक्यते। कला आत्मविकासमातनुते । तस्याः सेवायाः साहचर्यें वा उत्तरोत्तरं विकासः सम्पद्यते ।

वर्तमानयुगे पाश्चात्यदेशेषु विज्ञानस्य अतीवोन्नतिः सञ्जाता, किन्तु कलादर्शनयोः क्षेत्रे अधुनापि भारतं तेषां गुरुरेव । निखिलो लोकः भारतीयकलायाः प्रशंसको वर्तते । भारतवर्षे प्राचीनमहर्षिभिः या पुरुषार्थचतुष्टयस्य कल्पना कृता सा अतीव वैज्ञानिकी व्यावहारिकी च । पुरुषस्य सकलासु प्रवृत्तिषु पुरुषार्थस्यैव प्राधान्यं दृश्यते । पुरुषार्थेषु मोक्षः परमपुरुषार्थः । तस्य साधनमेव सर्वेषां शास्त्राणां लक्ष्यम् । कलायाः प्रवृत्तिरपि ईदृश्येव । यथा कथितं संगीतशास्त्रे--

तस्य गीतस्य माहात्म्यं के प्रशंसितुमीशते ।
धर्मार्थकाममोक्षाणामिदमेवैकसाधनम् ॥

संगीतरत्नाकरः

तथैव विज्ञानेश्वरेण याज्ञवल्क्यस्मृतिटीकायां लिखितम्--

वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं स गच्छति ॥

आधुनिकैः कलायाः विविधानि प्रयोजनानि वर्ण्यन्ते। 'कलायै कला' इति केचन वदन्ति। व्यवसायिनः पाश्चात्याः पाश्चात्यसभ्यतायां रञ्जिताः भारतीयाः वा किमपि कथयन्तु। तेषां कृते 'कलायै कला' भवतु, 'आपणाय कला' भवतु, 'अशिष्टत्वाय कला' भवतु, यद्वा 'स्वेच्छाचाराय कला' भवतु, वस्तुतस्तु भारतदेशे कदापि कलाविषये एवंभूता धारणा नासीत्। धर्मस्य सत्तायामविश्वासभाजोऽपि कलानैतिकतायाः मूल्यं स्वीकरिष्यन्त्येव। 'रामादिवद्वर्तितव्यं न रावणादिवत्' इयमेव उपदेशात्मिका भावना सर्वत्र भारतीयकलायां निहिता।

'विनोदाय कला' इत्यन्ये। मन्ये, कलया विनोदो भवत्येव किन्त्वयं वाह्यो लाभः। कलायाः चरमं लक्ष्यं तु अन्यदेव। 'जीवनयाथार्थ्यात् पलायनाय कला' इति वदन्ति केचन। जीवनस्य कटुतामनुभवन्नेव एवं कथयितुं शक्नोति। यः जीवनस्य याथार्थ्यमनुभवति, तस्य प्रत्येकक्षणात् प्रेरणाञ्च प्राप्नोति स कथमपीत्थं न वक्ष्यति। अत एव जीवनद्रोहं परित्यज्य नरैर्यथार्थजीवने प्रवेष्टव्यम्। इत्थम् अन्यान्यपि प्रयोजनानि वर्णितानि; यथा 'सेवायै कला', 'आत्मप्राप्तये कला', 'जीवनाय कला', 'वैरस्याद्विरतये कला', 'आनन्दाय कला', 'अदम्यपरिश्रमापनोदाय कला' इति।

वस्तुतः भारतीयकलायाः अधोलिखितानि विशिष्टलक्षणानि यानि कस्यापि देशस्य कलालक्षणेषु नोपलभ्यन्ते-

१—यथा पूर्वमेव उल्लिखितम् परमपुरुषार्थस्य मोक्षस्य साधनार्थमेव भारतीय कलायाः प्रवृत्तिः। कलायाः कामपुरुषार्थेन साक्षात्सम्बन्धः। यथा कथितम् शास्त्रे 'धर्मानुकूलौ अर्थकामौ सेवेत'। एवम् कला धर्ममूलेन कामपुरुषार्थेन मोक्षे प्रवृत्तिं विदधाति। हिन्दुधर्मः दर्शनञ्चैव भारतीयकलायाः मुख्यः आधारः।

२- कला विरसे मिथ्याजगति सौन्दर्यस्य सृष्टिं करोति। सौन्दर्यम् त्रिविधम्-दैवम्, प्राकृतिकम्, कृत्रिमञ्च। मनुष्यः यत्किंचिदपि स्वहृदये अनुभवति तस्य उद्घाटनमेव कला। यावन्मात्रा अस्माकम् अभिरुचिः दैवोन्मुखी भवेत् तावन्मात्रमेव वयम् सौन्दर्यस्य दर्शनं कलया च तस्यानुभूतिम् कर्तुम् शक्नुमः।

प्रकृतिः कलायाः उच्चतमप्रतीकभूता। अतः केचन विद्वांसः कलायां प्रकृतेः यत्र-तत्र विकसितानां सौन्दर्याणाम् समन्वयं मन्यन्ते। यदा कलायां नैतिकसौन्दर्यस्य वृद्धिर्भवति तदा तस्याः शोभा अतीव वर्द्धते।

३—भारतीयकलायाः प्रादुर्भावः योगदृष्टिसम्पन्नैः महर्षिभिः सञ्जातः। अत एव भारतीयकला सर्वथा श्रेयस्करी।

४—कलानिर्माणविषये शास्त्रेषु लिखितम् यत्—'ध्यात्वा कुर्यात्'। प्राचीन-भारतीयकलाकारः कोऽपि साधारणः व्यक्तिः नासीत्'। यतः 'न नरेणावरेण प्रोक्त एष' 'न सुविज्ञेयो बहुधा चिन्त्यमानः'। शिल्पशास्त्रमते स एव कलाकारः भवितुम-र्हति येन स्वयमेव हृदये ब्रह्मणः दर्शनं कृतम्।

५—भारतीयकला न केवलं सौन्दर्यमपि तु सत्यं प्रतिपादयति। वास्त-विकतायाः प्रतिपत्तिरेव कलायाः प्रयोजनम्।

६—उपनिषद्ग्रन्थेषु यस्य ब्रह्मणः यत् निराकाररूपं वर्णितं तस्य ब्रह्मणः विविधं तत्तद्रूपं प्रकल्प्य विविधप्रतीकानाम् योजनापि भारतीयकलायाः महती विशिष्टता।

७—कलासम्बन्धिनः त्रिविधाः पुरुषाः—कारयितारः, उपभोगिनः, कर्तारश्च। उपभोगिनस्तु द्विविधाः—तत्स्वामिनः बाह्याः तत्प्रेक्षकाश्च। कला तेषां सर्वेषां जनानामावश्यकतापूर्तिं करोति। सन्ति केचन कलाकाराः ये 'स्वान्तः सुखाय' कलानिर्माणं कुर्वन्ति। तत्र एकस्मिन्नेव पुरुषे कारयितृत्वकर्तृत्वभोक्तृत्वानाम् समावेशः।

८—कलया आनन्दप्राप्तिर्भवति।

ऋक्सामसन्बन्धविचारः

[डा० मातृदत्त त्रिवेदी, एम० ए०; पी-एच० डी०]

जैमिनिः पूर्वमीमांसायां मन्त्रावान्तरविशेष निर्णये ऋक्साम्नोः स्वरूपं सूत्रद्वयेनैवं निरूपितवान्—"तेषामृग्यत्रार्थवशेन पादव्यवस्था" (२।१।३५), "गीतिषु सामाख्या" (२।१।३६) इति। तदनन्तरं स यजुर्लक्षणं सूत्रयति—"शेषे यजुः शब्दः" (२।१।३७)। अत्र प्रश्नोऽयं समुल्लसति यदृक्सामयजुषामयमेवक्रमः आहोस्वित्कोऽप्यन्यः? नूनं वेदवाङ्मये कुत्रचिदेवंविधः क्रमो दृश्यते, परं बाहुल्येन तत्र क्रमविपर्यय एव दृष्टिपथमायाति। वेदेष्वनेकशः ऋग्वेदानन्तर यजुर्वेद आम्नायते तदनन्तरं सामवेदो न तु यजुर्वेदात्प्राक् सामवेदः। वस्तुतोऽयमेव क्रमः श्लाघ्यः। श्रुतिरप्येवं भवति—"त्रयो वेदा अजायन्ताग्नेर्ऋग्वेदो वायोर्यजुर्वेदः सूर्यात्सामवेदः" (श०ब्रा० ११।५।८।३) इति। तथा च स्मर्यते-

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुः सामलक्षणम्॥ (मनुस्मृतिः १।२३)

अत्र विचार्यते, अग्निः पृथिवी स्थानो वायुरन्तरिक्षस्थानः सूर्यो द्युस्थानश्च। यथैतेषु लोकेषु परस्परमयमेव क्रमः प्रसिद्धस्तथैव तत्तल्लोकानामधिष्ठातृदेवेभ्यः समुत्पन्नानां वेदानामप्ययमेव क्रमो वरीयान्। परं जैमिनिना तत्र मन्त्रत्रैविध्य विचारे किमपि प्रयोजनमुद्दिश्यैवंविधः क्रमो दर्शितः। प्रथमं तावत्तेन द्वभ्यां सूत्राभ्यामृक्साम्नोः स्वरूपं निर्णीय परस्परं तयोर्यः सम्बन्धः सूचितः स उपरिष्टान्निर्णेष्यते। एतत्सूत्रद्वयव्याख्यानावसरे भाष्यकृच्छबरस्वामी कयाऽप्युत्तमया रीत्या तयोः स्वरूपमुन्मीलयति—"यत्र पादकृता व्यवस्था स मन्त्र ऋङ्नामा" तथा च "विशिष्टा काचिद्गीतिः सामेत्युच्यते। प्रगीते हि मन्त्रवाक्ये सामशब्दमभियुक्ता उपदिशन्ति"। तत्राऽपि जैमिनीयन्यायमालायां माधवाचार्यः "पादेनार्थेन चोपेता वृत्तवद्धा मन्त्रा ऋचः" इत्येवमुक्त्वा ऋग्रूपं सुस्पष्टं विवृणोति। एवं विविच्यमानेऽर्थोऽयं निर्गलति, ये मन्त्रा वृत्तावद्धा अर्थोपेतपादयुक्ताश्च—अर्थात् प्रतिपादं येष्वर्थोऽपीतरपादापेक्षया पूर्णतामिवोपयाति—ते ऋक्पदेन व्यपदिश्यन्ते, एवञ्च ये गीति-

रूपास्ते सामसंज्ञां लभन्ते। केयं गीतिरित्येतदपि विचारितं शबर स्वामिना, उक्तञ्च "गीति-र्नामक्रियाह्यभ्यन्तरप्रयत्नजनित स्वर विशेषाणामभिव्यञ्जिका, सामशब्दाभिलप्या। सा नियतप्रमाणा, ऋचि गीयते।" नूनं न तावद्गीतिर्निराश्रया भवति तस्या ऋच्याश्रितत्वात्। तस्मात् तासु तास्वृक्षु गीयमानासु सामानि समुत्पद्यन्ते दृश्यन्ते च साम्प्रतं समुपलब्धेषु सामवेदग्रन्थेषु नवनवतिसंख्याकान् मन्त्रान् विहाय सर्वे मन्त्रा ऋग्वेदीया एव। येऽत्र न ऋग्वेदीयाः कथ्यन्ते तेऽपि ऋग्वेदस्य शाखान्तरात् संगृहीताः स्युरित्यपि मन्यते विद्वद्भिः। अतो बाहुल्येन ऋङ् मन्त्रा एव यदा क्रुष्टाद्यतिस्वार्यान्तसप्तस्वरैर्गीयन्ते तदा ते सामशब्देनाख्यायन्ते। वाढं, तत्र देवव्रतादीनि कानिचित् सामान्येवंविधानि येषां मूलभूता न काश्चिदृचो दृश्यन्ते, परमेवंरूपाणि सामानि स्वल्पान्येव। प्रायशस्तत्र सामवेदे ऋङ् मन्त्रा एव गीयन्ते, तस्मादृगेव साम्नो योनिरिति कथ्यते। प्रसिद्धञ्च साम्नामृगाश्रितत्वम्। अतो हि छान्दोग्योपनिषदि पौनः पुन्येनाम्नातम् "तस्मादृच्यध्यूढं साम गीयते"। कथमृगुपरि सामाधिष्ठितं भवतीत्येतत्प्रकाशनाय तत्र वहवो दृष्टान्ता दत्ताः। यथा दिवि आदित्यश्शोभते यथा वा नक्षत्रमण्डले चन्द्रमा विराजते तद्वदृचि साम सुप्रतिष्ठितं भवति। अन्यच्च, तत्र ऋक्साम्नोरेवंविधं कमप्यपूर्वं सम्बन्धं दर्शयितुं औपनिषदश्रुतिरेतदपि कथयति "अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम" (छां०उ० १।७।४)। यथाक्ष्णः श्वेतभागे कनीनिकायाः सौन्दर्यं सुस्पष्टमेव तथैव ऋचि साम्नोऽपि सौन्दर्यं सुविदितमेव सर्वेषां सामश्रोतॄणाम्।

जैमिनीयोपनिषद्ब्राह्मणे सामशब्दस्य "तद्यत्सा चाऽमश्च तत्सामाऽभवत् तत्साम्नस्सामत्वम्" (१।५३।५) इति या निरुक्तिः श्रूयते तयाऽपि ऋक्साम्नोः परस्परं सम्बन्ध एव सूच्यते। अत्र ब्रह्मणवाक्ये 'सा' पदेन ऋग् लक्ष्यते अमशब्देन च साम "सैव नाभर्गासीत्। अमो नाम साम" (गो०उ० ३।२०) इति गोपथ वचनात्। तया ऋचा सह सम्बद्धोऽमो नाम क्रुष्टादि स्वरः सामसंज्ञामवाप्नोतीति भवति विशदार्थः। अथवा, तत्र प्रयुज्यमानेन अमशब्देन साम्नो हिंकारस्य ग्रहणं भवति येन विना न साम निष्पद्यते "न वाऽहिंकृत्य साम गीयते" (श०ब्रा० १।४।१।१) इति शातपथीय वचनात्। अतोऽम शब्दो हिंकृतियुक्तं सामैव गृह्णाति। एतन्निर्वचनमाश्रित्यैव वृहदारण्यकोपनिषदि ऋक्साम्नोः किमप्यपूर्वं दम्पतित्वमपि सूचितम् "अमोऽहमस्मि सा त्वं सा त्वमस्यमोऽहं सामाहमस्मि ऋक्त्वम्" (६।४।२०)। अत्राऽमशब्देन पतिर्लक्ष्यतेऽथच साशब्देन कन्या। पतिस्तु सामस्वरूप एवञ्च कन्या ऋग्रूपा। ब्राह्मणमपि भवति "साम वा ऋचः पतिः" (श० ब्रा० ८।१।३।५)। अतस्तयोर्वरवध्वोर्यथा परस्परं सम्बन्धस्तथैव ऋक्साम्नोरस्तीति विज्ञेयम्।

एवं विचार्यमाणे एतदेव दृढी भवति यद्वेदेऽस्मिन् संगृहीतासु तासु तास्वृक्षु सामान्यधिष्ठितानि भवन्ति। तानि सामानि सप्तस्वरैः प्रजायन्ते। तस्मात्साम्नि स्वरस्यैव प्राधान्यमुपदर्शयति। सामविधान ब्राह्मणे उक्तम् "स्वरो वाव साम्नः स्वम्" (१।१।३) अर्थात् स्वर एव साम्नो निजं रूपमस्ति। अपि च छान्दोग्योपनिषदि शिलकादि संवादे स्वरस्यैव सामनिष्पादकत्वमेवमभिहितम्—"स ह शिलकश्शालावत्यश्चैकितायनं दाल्भ्यमुवाच, हन्त त्वा पृच्छानीति। पृच्छेति होवाच। का साम्नो गतिरिति ? स्वर इति होवाच" (१।८।३,४)। एवं रीत्या साम्नि स्वरस्य वैशिष्टयं सूचयित्वोपनिषत्स्वरविदः किमप्यार्थवादिकं फलमप्युपदर्शयति "तस्य वै स्वर एव सुवर्णं भवति हास्य सुवर्णं य एवमेतत्साम्नः सुवर्णं वेद" (बृ०उ० १।३।२६)। सामस्वरा निश्चयेनैव शोभनवर्णाः सन्तस्सुवर्णवद्रमणीयास्तेषाञ्च परिज्ञानेन सुवर्णोपलब्धिर्भवतीति श्रुतेरभिप्रायः। नारदोऽपि स्वशिक्षायां प्राधान्येन तान् स्वरान् वर्णयित्वा ततः कियत्परिमाणं कृत्स्नं स्वरमण्डलमिति संग्रहेण ब्रवीति—

सप्तस्वरास्त्रयो ग्रामा मूर्च्छनास्त्वेकविंशतिः।
ताना एकोनपञ्चाशदित्येतत्स्वरमण्डलम्॥

सामगानस्य खल्वेतावत्स्वरमण्डलं यस्मिन् साम गीयत उद्गातृभिः। एवं साम्नि स्वरस्यैव प्राधान्यं सिद्ध्यति। तत्र क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्राति-स्वार्या इति सप्तस्वराः प्रधानभूताः। तेषां वैविध्येनैव तत्र बहूनि सामानि समुत्पद्यन्ते। कियत्संख्याकान्येतानि सामानीत्यपरः प्रश्नः। "अर्थैकत्वाद्विकल्पःस्यात्" (पू० मी० ९।२।२९) इति सूत्रस्य व्याख्यानावसरे शबर स्वामी "सामवेदे सन्ति सहस्रं गीत्युपाया" इत्युक्त्वा सामगानानां सहस्रत्वमथचापरिमितत्वमानन्त्यं वा प्रतिपादयति। यच्चोक्तं षड्विंशब्राह्मणे "साम वै सहस्रवर्तनि" (१।४) अथवा पातञ्जलमहाभाष्ये "सहस्रवर्त्मा सामवेद" इति तेनाऽपि साम्नामसंख्यात्वमेव प्रतिपादितं भवति 'यदपरिमितं तत्सहस्रमिति' न्यायात्। यद्यप्यत्र प्रयुक्तेन सहस्रशब्देन सामवेदस्य सहस्रसंख्याकाः शाखाः सन्तीति स्वीक्रियते सम्प्रदायविद्भिः, परं यथा वेदान्तराणां तत्तच्छाखानामानि यत्र तत्र निर्दिश्यन्ते न तथा सामवेदस्य सहस्रशाखानामानि। यथा वेदज्ञानमनन्तम् 'अनन्ता वै वेदाः' इति श्रुतेस्तद्वद्वेदस्याऽस्य गानविषयकमप्यानन्त्यं सिद्ध्यति। तानि गानानि प्रथमं तावच्चतुर्धा विभक्तानि, वेयारण्योह्योह्यानीति। सामवेदस्य खलु भागद्वयम्-आर्चिकं गानञ्च। तत्रार्चिकभागे छन्दोगानामृक्पाठाय द्वौ ग्रन्थौ विद्येते-पूर्वार्चिकमुत्तरार्चिकञ्चेति। छन्द उत्तरा चेति तयोरपरे नाम्नी

भवतः । तत्र छन्दोग्रन्थे नानाविधानां साम्नां योनिभूता एवर्चः पठिताः । तास्तु वेयारण्यगानयोराश्रयभूताः । उत्तराग्रन्थे तु ऊहोह्य योर्गानयोर्योनिभूता ऋचःसन्ति । पूर्वार्चिकस्यातिसंख्याका ऋच उत्तरार्चिके पुनरावर्तन्ते । तासां चतुर्ष्वपि हि गानभागेषु बहूनि गानानि भवन्ति । तत्राऽपि बह्व्य ऋचः सन्ति यासां साकल्येन पञ्चविंशानि वाधिकानि गानानि भवन्ति । "पुनानः सोमधारया" इत्येका ऋग्यस्या वेयादिगानचतुष्टये एकोत्तरषष्टितम गानानि गायन्ते सामगैः । एवं गानग्रन्थे ईदृक्सामवैविध्यं दृष्ट्वा तेषामानन्त्यं स्पष्टमेव प्रतिभाति । परं तत्राऽपि महद्वैचित्र्यमिदं यद्वेदेऽस्मिन् बह्व्यऋचो यासां न किमपि गानं विद्यते । किञ्च, तत्र कानिचिद्गानानि येषां मूलभूता न काश्चिदृचो दृश्यन्ते । अन्यच्च, तत्राऽपरं वैलक्षण्यं गान विषयकम् । वेयगाने प्रायशः एकैकस्यामृचि पृथक्पृथगेकैकं साम निष्पद्यते, परमूहगाने नाऽयं नियमः । तत्र तु एकैकं साम तृचेऽधीयते "एकं साम तृचे क्रियते स्तोत्रियम्" इति श्रवणात् । वेयगानस्य स्वरादिकमाश्रित्यैव ऊहगानस्य निर्मितिरिति वेयगानमूहगानस्य प्रकृतिरिति कथ्यते । एवञ्चारण्यकगानमूह्यगानस्य प्रकृतिः । अतो वेयारण्यगानयोः प्रयुक्तानां स्वराणां तत्रोहोह्यगानयोः प्रथनं दृश्यते । एवं सर्वत्र चतुर्विधेष्वपि गानेषु सामस्वराणामेव साम्राज्यं विलसति ।

एवमृक्साम्नोः परस्परं सम्बन्धं पर्यालोच्य ऋचं प्रति साम्नः किमपि संस्कारकत्वं सूचितं भवति । एतदेवर्चं प्रति प्रधानकर्म । गानेन संस्कृतैऋगाक्षरैस्तत्तदिन्द्रादिदेवानां स्तुतिः प्रयुज्यते । सेयं स्तुतिर्ऋक्स्तुतेः प्रबला । यदपि क्वचित्कर्मविशेषे श्रूयते "ऋचा स्तुवते साम्ना स्तुवत" इति तत्र नर्कसामाभ्यां विकल्पेन स्तुतिरपितु ऋङ्निन्दायां सामप्रशंसायामेव च श्रुतेस्तात्पर्यम् । उक्तञ्च,'यदृचा स्तुवते तदसुरा अन्ववायन्, यत्साम्ना स्तुवते तदसुरा नान्ववायन्, य एवं विद्वान् साम्ना स्तुवीत' इत्यृचं निन्दित्वैवाऽत्र सामप्राशस्त्यं विहितम् । तस्मात्साम्नैव स्तोतव्यमिति भवति सिद्धान्तः । सायणाचार्योऽपि सामवेदभाष्योपक्रमणिकायामृग्यजुस्साम्नां परस्परं सम्बन्धमुपदर्शयन्नृचि साम्न एव वैशिष्टयमथच रमणीयकत्वं विस्पष्टीकरोत्यनया श्लोकपरिपाट्या—

जाते देहे भवत्यस्य कटकादि विभूषणम् ।
आश्रितं मणिमुक्तादि कटकादौ यथा तथा ॥
यजुर्जाते यज्ञदेहे स्यादृग्भिस्तद्विभूषणम् ।
सामाख्या मणिमुक्ताद्या ऋक्षु तासु समाश्रिताः ॥

इति यास्कविरचितं निरुक्तम्

[अखिलेश मिश्रः एम० ए०]

महर्षियास्कविरचितनिरुक्तनाम ग्रंथः वैदिकशब्दानाम् व्युत्पत्तिबोधाय एक एव प्रामाणिकः सम्बलः। पूर्वापरव्याकरणतोयनिधीनवगाह्य निरुक्तम् भाषाधरित्र्याम् मानदण्ड इव स्थितम् अनुकथनेऽस्मिन् न काचिदतिरञ्जना। ग्रंथोक्तयास्क प्रामाण्यम् वैदिकसंस्कृत-भाषा अपि दैनिकवार्त्तालापे सामान्यजनेषु प्रयुक्ता इति असंदिग्धताम् प्रमाणयति एव :--

"भाषिकेभ्यो धातुभ्यो नैगमा कृतो भाष्यन्ते" [निरुक्त २ । २]

भाषाशब्दस्य प्रयोगः यास्कमहर्षिणा लोकव्यवहारे प्रयोजनीया अर्थव्यक्तिमाध्यमा-इत्येव अर्थविशेषे गृहीतः। यथा--"भाषायामन्वध्यायञ्च" [निरुक्त १ । ४]

निरुक्तव्याकरणे पुनश्च वैदिक कृदन्त शब्दानाम् व्युत्पत्तिः लोकव्यवहारे बहुप्रयुक्त प्रयोजनवती धातुभिरेव विश्लिष्ट विश्लेषणापरं वैदग्ध्यपूर्वकमेव स्पष्टीकृता तेन महाभागेन। विशालभारतदेशस्य आसमुद्रहिमाचलस्य भिन्नाः भिन्नाः विभागाः जलवायुस्वभावसंस्कारा-चारविचारभोजनपानादिभेदेन व्याप्ता अपि एकस्य एव राष्ट्रस्याविच्छिन्नानि अंगानि एकस्या एव राष्ट्रभारत्याः उपासकाः प्रागैतिहासिक कालतः अद्यावधि सन्ति। अतएव कश्चित् भाषाभेदोऽपि विभिन्नेषु अंचलेषु स्वभावतया दृश्यते। अतिलघुरपि नैसर्गिको विभेदः यास्कमहर्षिणा नोपेक्षितः। निरुक्ते एवंविधाः सर्वे विभेदाः सम्यगालोचिताः विश्लेषिताश्च। शवतिक्रियापदप्रयोगः काम्बोजेषुगमनार्थबोधक आसीत् परन्तु ब्रह्मावर्ते आर्येषु शव संज्ञारूपः प्राणहीनशरीरस्य एव विज्ञापकः (विबोधकः) आसीत् अस्ति च। प्राच्येषु "दाति" क्रियापदस्य प्रयोगः कर्तनार्थविबोधकः परन्तु उत्तराचलवासिषु व्युत्पत्तिसाम्यमुल्लंध्य "दात्र" शब्दो कृषिकर्तने प्रयोजनीयः हंसियाभिधानोपकरणविशेषस्यार्थः। दर्शनीयम् खलु एतद्:--

"शवितर्गतिकर्मा कम्बोजेष्वेव भाष्यते विकारमस्यार्येषु भाषन्ते शव इति। दाविर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु" [निरुक्त २ । २]

विक्रमात् सप्तशतकवर्षपूर्वमेव यास्केन भाषाशास्त्रस्य गौरवास्पदा परिपाटीयं पुरःस्थापिता आसीत् । अद्यावधि भाषाविज्ञानग्रंथानाम् आधुनिकतमविकासवेत्तारः प्रणेतारः अर्थव्युत्पत्तिविरहितं अप्रामाणिकमेव निगदन्ति । सहस्राब्दिद्वय पूर्वमेव तेन महाभागेन प्रशस्त पथः निर्दिष्टः ।

व्याकरणम् वेदांगम् । वेदानाम् अर्थस्य बोधकम् वेदार्थस्य संरक्षकञ्च । तत् अधुना पाणिनीयाष्टाध्यायी एव एतस्य वेदांगस्य प्रतिनिधित्वम् करोति । व्याकरणन्तु पाणिनिना पूर्वमपि, अतिपूर्वकाले प्रागैतिहासिककालेऽपि वर्तमानमासीत् । व्याकरणविरहित भाषाऽर्थ-व्यक्तिमपि न जनयति । वेदत्रयी तु अस्माकम् अर्थव्यक्तिदृष्ट्या न कदाचिद् भावापक्तता । अतएव तेषु संदर्भेषु सामान्य न्यायेनापि व्याकरणस्य उपस्थितिः प्रमाण्यते एवम् ।

पाणिनिविरचिताष्टाध्यायी अपि गार्ग्य, स्फोटायन, शाकटायन, भारद्वाजाद्यनेक-मनीषिणामभिधानम् कृतज्ञताभारावनता एवोल्लेखयति । प्रातिशाख्याभिधानाः ग्रन्थाः तेषाम् अपि पूर्वकालिकाः । प्रातिशाख्यग्रंथेषु स्वरस्य छन्दसामेव च वर्णनविशेषः परन्तु व्याकरण-विषयकापि तेषु प्रचुराऽस्ति सामग्री । एका एका वैदिकी शाखा अनेकान् प्रातिशाख्यान अंगीकरोति । तेषाम् व्याकरणव्यवस्थास्वपि अनुगतानाम् निष्ठाधिक्यम् स्वयं सिद्धमेव । सम्प्रति ऋग्वेदसम्बद्धम् शौनक प्रातिशाख्यम् शुक्लयजुर्वेदेन सम्बद्धम् कात्यायनप्रातिशाख्यञ्च विशेषप्रसिद्धिमाप्तवती निष्ठाढ्यौं च । अन्यानि प्रतिशाख्यानि अपि उपलब्धानि एव ।

निरुक्तम् पृथक् वेदाङ्गम् इति मन्यते । शब्दव्युत्पत्ति विरहितः कोऽपि वेदार्थ संरक्षणे न शक्यः । अवश्यमेव प्राचीनकाले वैदिक साहित्यम् निरुक्तबहुलम् एव आसीत् । अन्यथा वेदाङ्गकोट्याम् अस्य निरूपणस्य न कोऽपि न्यायः । अधुना दुर्भाग्यवशात् एकम् एव निरुक्तम् प्राप्यम्, महाभागाः यास्कमहर्षयः यस्य रचयितारः । अति प्राचीनकालेऽपि निघण्टु-नामकग्रंथस्थ उपलब्धिरनुश्रूयते यस्मिन् वेदानाम् व्यत्पत्युच्चारणार्थदुरूहानाम् शब्दानाम् क्रमबद्धा तालिका संगृहीता । निघण्टुग्रंथस्य भाष्यम् एव निरुक्तम् इति विख्यातम् ।

यास्कविरचित निरुक्त ग्रंथे शब्दव्युत्पत्तिव्याकरणार्थ-व्यक्तिरेवविशेषः । परन्तु इतिहास-भूगोलाद्यान्तं साक्ष्यप्रस्तावकप्रामाण्येऽपि अनुसंधानरतेभ्योऽन्यतमोपादेयता । भारतीयानाम् साहित्येषु वेद-पुराण समकक्षमेव इतिहासस्य महत्वम् निर्धार्यते । यथा—

"इतिहासपुराणाभ्याम् वेदम् समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति।।"—महाभारत

नारदाधीत विद्यासु इतिहास पुराणञ्च पंचमो वेदः । यथा:—

"ऋग्वेदं भगवोध्येमि यजुर्वेदं सामवेदमथर्वण इतिहास-पुराणं पंचमं वेदानाम् वेदम्"
[छांदोग्य ७-१]

यास्कोऽपि ऋक् संगृहीतायाम् इतिहासयुक्तानाम् मंत्राणाम् सन्निवेशम् उद्घोषयति । यथा:––गितम् कूपे वहितयेतत् सूक्तं प्रतिवभौ । तत्र ऋमेतिहास मिश्रमृङ्मिश्रं गाथामिश्रं भवति" [निरुक्त ४।६]

संस्कृतभाषायाः अद्य वैदिकी लौकिकी चेति स्वरूपद्वयम् । वैदिकभाषायाम् तु संहिता ब्राह्मणादि ग्रंथानाम् रचना । अपरस्याम् रामायणमहाभारतोपजीव्यकाव्यलालित्य-सर्वजनहृदयान् रसस्निग्धान् करोति अद्यापि । स्वरूपद्वयेषु उक्तेषु शब्दरूपेषु भेदः विचारणीयः । कानिचिद् दृष्टान्तानि सुव्यक्तानि करिष्यन्ति ।

वेदभाषायाम् अकारान्तपुल्लिंगशब्दानाम् प्रथमबहुवचनरूपं असस् अथच अस् प्रत्ययोः योगात् स्व ग्राह्यं परन्तु लौकिक संस्कृत वाक्वल्लर्याम् रूपपरमेव प्रचलितम्-पुनश्च इष्टमेव प्रामाण्यम् । महाभाष्य मतमेतद् ।

अकारान्त पदानाम् प्रथमा-द्विवचन-रूपं "आ" प्रत्यय योगेन पुनश्च ईकारान्तस्त्री-लिंगशब्दानाम् तृतीयाएकवचनरूपं "ई" प्रत्यय योगेन एव विरच्यते यथा अश्विना (लौकिक्याम् अश्विनौ) सुष्टुती (लौकिक्याम् सुष्टुत्या) । अकारान्त नपुंसक लिंग शब्दानाम् बहुवचन-रूपम् "आ" तथा "आनि" प्रत्यययोगेन प्रापणीयम् वैदिक व्याकरणे यथा विश्वानि अद्भुता-प्रयोगः । लौकिक संस्कृत रचनायाम् अद्भुतानि एव साधुः ।

क्रियापदेषु उत्तमपुरुषवर्तमानकालिक प्रयोगेषु वैदिकभाषायाम् "मसि"-प्रत्यय योगः "मिनीमसि द्यवि द्यवि" आदिषु दृश्यते, परन्तु लौकिक भाषायाम् सैव अर्थप्रतीतिः मिनीयः इति रूपं गृह्णाति । लोट् लकारे बहुवचनस्य प्रत्ययाः वैदिक भाषायाम् त, तन, थन, तात् आदयः सन्ति यथा श्रृणोत्, मुनोतन्, यतिष्ठन्, कृणुतान् । लौकिकभाषायां क्रियार्थकक्रियार्थे च तुमुन्-एव एको प्रत्ययः किन्तु वैदिक भाषायाम् से, असे, कसे, वध्यै, शध्यै, आदयः बहवः प्रत्ययाः । तस्मिन्नेव प्रसंगे व्यवहार्याः येषाम् प्रयोगेन जीवसे (लौ०जीवितुम्) पिबध्यै, दातवै, कर्तवै आदीनि रूपाणि ग्राह्याणि ।

वैदिक भाषायाम् आज्ञा सम्भावना प्रदर्शनाय एको लकारः 'लेट' इत्यभिधानोस्ति। यश्च लौकिक भाषायाम् अधुना कदापि न दृश्यते एकोऽपि प्रयोगः "प्राण आयूंषि तारिषत्" इति। वाक्येस्मिन् "तारिषत्" इति प्रयोगः लेट् लकारस्य व्यवहार एव।

"परमे व्योमन्" आदयः प्रयोगाः वैदिक संस्कृत भाषायाम् सप्तमी विभक्तिलोपमेव उद्घोषयन्ति। लौकिक भाषायाम् तु संदर्भेस्मिन् व्योम्नि अथवा व्योमनि एव साधवः प्रयोगाः।

हिन्दी अद्य राष्ट्रभाषायाःपदे प्रतिष्ठापिता। परन्तु तस्याः न एकोपि प्रामाणिको व्युत्पत्तिकोषः। अतएव अर्थव्यक्तिः प्रायशः भ्रान्तिकरा एव भवति। अन्यासु प्रादेशिक भाषासु अपि व्युत्पत्तिकोषस्याभावः दारिद्र्यमेवोद्घोषयति। कालातिपात संवृत्तेलौकिकेष्ट प्रयोगबहुले उपजीव्यकथा गाथालोकसाहित्यजिह्वाग्रविराजिते गीर्वाणवाणी अपि अद्य बहुशो बहुभ्रमाभिभूता एव संवृत्ता। निरुक्तम्, तस्य कर्तारः यास्क महाभागाश्च अद्य न केवलं अभिनन्दनीयाः अपितु ग्राह्याः। विचारणीयाः तथापि व्यवहरणीयाः अपि।

यज्ञकर्म्मसु सूक्तानामुपादेयत्वम्

[जगदम्बाप्रसाद सिनहा, एम० ए०, एल-एल० बी०, साहित्याचार्यः, संस्कृत-विभागः
लखनऊ-विश्वविद्यालयः]

यज्ञकर्म सूक्तानि च छायातपवत् परस्परसम्बद्धानि अन्योन्याश्रितानि वा सन्ति। इदन्तु न वक्तु ं शक्यते यद्यज्ञसूक्तयोर्किं पूर्वं किञ्च परम्। प्रथमं सूक्तं केन दृष्टं कथं दृष्टमिति ज्ञाते सति प्रथमयज्ञस्यापि रहस्योद्‌घाटनं भवितुमर्हति। एकस्मिन् स्थाने सूक्तेभ्यो यज्ञकर्म्मणां समारम्भः सूचितः अन्यस्मिन्त्विदमुक्तं यद्यज्ञकर्माण्येव सूक्तानां प्रेरकाणि सन्ति।[1] यज्ञसूक्तयोः मिथः सम्बधादन्यत्तु अनेन कथनेन इदन्न ज्ञातं भवति यदनयोः किं पूर्वं किंवा परम्। निरुक्तेऽपि यास्काचार्येण याज्ञदैवतमन्त्राणां विषये बहूक्तं, तत्रापि तु अनयोः पौर्वापर्यमस्पष्ट-मेवास्ति। इदमपि कथयितु ं न शक्यते यत्सूक्तानि यज्ञैः सह सम्बद्धानि न वा यतः आध्यात्मिकीनामृचां यागैः सह कोऽपि सम्बन्धः न दृश्यते; इदमपि तु न सत्यं यदाध्यात्मिक्येतराणामृचां यागैः सह नित्यसम्बन्धः भवितुमर्हति। ब्राह्मण-ग्रन्थेषु यदनुष्ठानविशेषे प्रयुक्तानि सूक्तानि तदंशानि यानि उल्लिखितानि तैरपीद-मेव ज्ञायते यन्न सर्वासामृचां यागे प्रयोग इष्टः, न च तासामृचां यागैः कोऽपि नित्यसम्बन्ध एवोपलक्ष्यते। विषयेऽस्मिन् डा० विन्तरनित्जमहोदयैर्मतद्वयमुल्लि-खितम्। केगी इत्यादयः विद्वांसः विचारकाश्च सूक्तेषु काव्यमेव प्रधानमिति मन्यन्ते न च तानि यज्ञादिभिस्सह सम्बद्धानि। ओल्डेनवर्गादयः अपरे विद्वांसस्तु एवम्मन्यन्ते यत्सूक्तगतं यन्माधुर्यं वा काव्यं वा तत्त यज्ञाधीनमेव, न तस्य

---

१. मा नो मर्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि यत्ते ।
नव्ये देष्णे शस्ते अस्मिन्त उक्थे प्र ब्रवाम वयमिंद्र स्तुवंतः ।।

ऋग्वेद ४. २०. १०

पृथक्सत्ता इति। केगी ओल्डेनवर्गेत्यनयोः कस्य पक्षे सत्यं वर्तते इति निर्णेतुं न शक्यते। यतः काव्यात्मकानि कानिचित् सूक्तानि यज्ञकर्म्मसु प्रयुक्तानि अतएव केगीमहोदयानाम्मते सत्याभावः प्रतीयते अन्यच्च पर्याप्तानां साक्ष्याणामभावे ओल्डेनवर्गमहाभागानाम्मतेऽपि क्वापि युक्तिर्न दृश्यते।

आप्र्यादीनि कानिचित्सूक्तानि नूनमेव यज्ञार्थं दृष्टानि। एषु आप्रीसूक्तेषु यज्ञकर्मविकासस्य अनेकाः अवस्थाः दृश्यन्ते न तथापि इदन्निर्णीतं यद्यज्ञसूक्तयोः किं पूर्वं किं वा परम्। अस्मिन् विषये वैदिकाः ऋषय एव प्रमाणम्। तैर्दृष्टेषु सूक्तेषु एव यज्ञसूक्तयोः पौर्वापर्यं निर्णीतम्। सत्यमेतन्नैतयोः पौर्वापर्यं विचारगम्यं तथापि एकस्मिन्मन्त्रे इदमुक्तं भवति यत्सूक्तान्येव पूर्वाणि, यज्ञकर्माणि च पराणि—

सूक्तवाकं प्रथममादिदग्निमादिद्धविरजनयंत देवाः।
स एषां यज्ञो अभवत्तनूनपास्तं द्यौर्वेद तं पृथिवी तमापः॥

ऋग्वेद १०. ८८. ८

मन्त्रेऽस्मिन् प्रामाण्यमस्ति न वा इदन्तु न कथयितुं शक्यते तथापीदमनुमातुं शक्यते यत्प्राचीनैः ऋषिभिर्मन्त्राणां पूर्वत्वं यज्ञानाञ्च परत्वम्मन्यते स्म। अन्यस्य ऋषेर्मतेन न सर्वेषां सूक्तानां यज्ञपरत्वम्—

का ते अस्त्यरंकृतिः सूक्तैः कदा नूनं ते मघवन्दाशेम।
विश्वा मतीरा ततने त्वायाधा इंद्र शृणवो हवेमा॥

ऋग्वेद ७. २९. ३

सत्यम्, न सर्वेषां सूक्तानां यज्ञपरत्वं साधयितुं शक्यते तथापि सूक्तप्रयुक्तैः यज्ञैः किञ्चिद्विशिष्टं सिध्यति इति कथने न काप्यसङ्गतिः। रूपसमृद्धैः सूक्तैरेव स्तुताः देवाः सन्तुष्टाः इति कृत्वा यज्ञप्रयुक्तानां सूक्तानां किञ्चिद्विशिष्टं वाञ्छितमासीत्। अतएवोक्तम्—

का राधद्धोत्राश्विना वां को वां जोष उभयोः ।

कथा विधात्य प्रचेताः ॥

ऋग्वेद १. १२०. १.

अस्याः ऋचोऽयमर्थः यत् होतृसूक्तमेव यज्ञेषु प्रयोक्तव्यं न चान्येन केनचित्प्रकारेण अश्विनौ तुष्यतः, तस्मादप्रचेतसः जनाः यज्ञं कर्तुमक्षमाः भवन्ति । यज्ञप्रयोक्तव्यस्य बहुगुणोपेतस्य सूक्तस्य लक्षणान्येवमुक्तानि ऋषिभिः—

मन्त्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा ।

पूर्वीश्चन प्रसितयस्तरन्ति तं य इन्द्रे कर्मणा भुवत् ॥

ऋग्वेद ७. ३२. १३.

नूतनानि सूक्तानि देवानामाकर्षणाय भवन्तीत्यपि श्रूयते—

तस्मा उक्थं जनये यज्जुजोषन्नृवन्नवीयः शृणवद्यथा नः ॥

ऋग्वेद ७. २६. १.

यज्ञप्रदत्तसोमाहुतिः सूक्तैरेव वर्द्धते यजमानाय चाभीष्टं फलं प्रयच्छति—

आकलशेषु धावति पवित्रे परिषिच्यते । उक्थैर्यज्ञेषु वर्धते ॥

ऋग्वेद ९. १७. ४.

यदा कदापि ऋषयः एवं कथयन्तःश्रूयन्ते यद्देवः यज्ञकर्मानन्तरमेव बलवन्तः सम्पद्यन्ते, बलञ्च तत् सूक्तेभ्य एवैते लभन्ते । अधोलिखितयोर्मन्त्रयोः वाशिष्ठ सूक्तान्येव इन्द्राय बलप्रदानि कथितानि—

एवेन्नु कं दाशराज्ञे सुदासं प्रावदिन्द्रो ब्रह्मणा वो वसिष्ठाः ॥

ऋग्वेद ७. ३३. ३.

अपि च—

यच्छक्वरीषु बृहता रवेणेन्द्रे शुष्ममदधता वसिष्ठाः ॥

ऋग्वेद ७. ३३. ४.

मन्त्रविहीनं यत्कर्म क्रियते तद्देवेभ्यः समुचितं बलं प्रदातुमक्षमम्। बल-रहिताश्च देवाः याज्ञिकानामिष्टपूर्त्यै न समर्थाः भवन्ति। अतएव रूपसमृद्धैः सूक्तैरेव यत्किञ्चिद् कर्म अनुष्ठीयते तेन देवाः तैश्च यजमानाः समृद्धाः क्रियन्ते। सोमयज्ञेन इंद्रस्य शक्तिर्वर्द्धते यया सः स्वशत्रून् हन्तुं सामर्थ्यवान् भवति। याज्ञिकैः इन्द्राय दत्तः सोमरसोऽपि स्तुतिभिरेव सोमवल्लीभ्यः प्राप्यते। न केवलं देवा एव सूक्तैः समृद्धिमाप्नुवन्ति, मर्त्या अपि स्तुतिरूपैः सूक्तैः देवयजनं विधाय अस्मिन् लोके पुत्रप्रजादिभी राध्नुवन्ति अमुष्मिँल्लोके च सुखपूर्वकं बहुकालपर्यन्तं निवसन्ति। रूपसमृद्धैः सूक्तैः सम्पादिताः यज्ञा एव यजमानाय फलं ददति। ऋषिभिरिदं बारम्बारं कथ्यते यदिन्द्रः मन्त्रहीनैः यज्ञैः कदापि तोषं न प्राप्नोति, न केवलमिन्द्रः अपितु न कोऽपि देवः मन्त्राद्दतेन यज्ञेन वर्द्धते तुष्यति वा। यथा सूक्तानि यज्ञं वोढुं समर्थानि भवेयुः तथा तानि रूपसमृद्धानि स्युः। एकस्मिन् प्रसङ्गे सूक्तानि वृक्षाणां शाखाभिरुपमीयन्ते—

प्र वो यज्ञेषु देवयंतो अर्चन्द्यावा नमोभिः पृथिवी इषध्यै।

येषां ब्रह्माण्यसमानि विप्रा विष्वग्वियंति वनिनो न शाखाः॥

ऋग्वेद ७. ४३. १

अत्रेदं युक्तमभिहितं यत्सूक्तानि वृक्षशाखा इव असमानीति। विभिन्नानां देवानां महत्वस्य पृथक्त्वात्तेभ्यः प्रयोक्तव्यानि सूक्तानि असमानि एव भवेयुः। अनया उक्त्या एषां सूक्तानामद्वितीयत्वमपि ध्वन्यते। देवप्रयुक्तानां सूक्तानां तत्तद्दिदक्षु गम्यत्वात् तेषामितस्ततः प्रसरन्तीभिः शाखाभिः साम्यं युक्तमेव। अलं बहुना, यज्ञेषु मन्त्राणां महत्वमनेनैव सूच्यते यतः तदनुरूपाणां मन्त्राणां द्रष्टारः ऋषयः अन्येभ्यः सर्वेभ्य ऋषिभ्यः श्रेष्ठतमाः मन्यन्त इति—

एते द्युम्नेभिर्विश्वमातिरंत मन्त्रं ये वारं नर्या अतक्षन्।

प्र ये विशस्तिरंत श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्य॥

ऋग्वेद ७. ७. ६

कविकुलगुरुः कालिदासः

[श्री कमलापति मिश्रः, मन्त्री—अखिलभारतीय संस्कृत-परिषद्, लखनऊ]

संस्कृतवाङ्मये महाकाव्यप्रणेतॄणां काव्यतत्वविदां कविकुलगुरुः कालिदासो मूर्धन्य इति न केषामप्यविदितम् । परन्तस्य स्थितिकालो विवादान्वितोऽस्ति । विषयेऽस्मिन्मतत्रयं विद्यते

भारतीया प्रसिद्धिस्त्वेवंविधा, यद्विक्रमादित्यस्य नवरत्नेषु अग्रगण्योऽयमेव । ख्यातिश्चैतादृशी यद्विक्रमीयसंवत्सरप्रवर्तकः विक्रमादित्यो नाम राजा बभूव । डा० हार्नलीमहोदयस्य मतमिदं यद्यशोधर्मनामको नरपतिः कहरूराख्ये समरे (५४४ ई०) हूणवंशोद्भवं मिहिरकुलं पराजित्य 'विक्रमादित्य' पदवीमलंचकार । विजयमिममधिकृत्य संवत्सरः प्रचलितः । तस्य प्राचीनतां द्रढयितुं षट्शतवर्षेभ्यः प्राक् संचाल्य ईसवीयाब्दतोपि सप्तपंचाशतवर्षेभ्यः प्रागेवारब्धः संवत्सरः । मतेनैतेन महाकवेः कालः षष्ठ्यां शताब्द्यां प्रतीयते । प्रमाणीकर्तुंश्चेदं मतं रघोः दिग्वजय यशोधर्मणः राज्यपरिधेः साम्यमधिगच्छति । हूणानांचोल्लेखः कालिदासेन चतुर्थे सर्गे विहितः । महामहोपाध्यायेन हरप्रसादशास्त्रिणापीदमेव मतं समर्थितम् ।

परं कालिदासस्य स्थितिकालः एवंविधो नेतिहासानुकूलतामुपयाति । विक्रमसंवत्सरस्य स्थापना षष्ठ्यां शताब्द्यां यशोधर्मणा कृतेति नैव स्वीकर्तुं शक्यते । यतः मालवसंवत्सरनाम्ना संवत्सरोऽयं पूर्वमेव प्रसिद्धः । पंचम्यां शताब्द्यां वत्सभट्टिविरचितायां प्रशस्त्याम् ऋतुसंहारमेघदूतयोः अनेकानि पद्यानि आभास्यन्ते । एवं कृतायां विचारणायां कालिदासकालः षष्ठ्यां शताब्द्यां कथं स्वीकर्तुं शक्यते ।

जनश्रुतिमधिकृत्यास्य स्थितिः ईस्वीयाब्दतः प्राक् प्रथमायां शताब्द्यां स्वीक्रियते । अष्टाषष्टितमे ईसवीयाब्दे लिखितायां गाथासप्तशत्यां नृपो विक्रम उल्लिखितः । चेत्तस्मिन्समये स नरपतिस्तर्हि ईसवीयाब्दतः प्रागासीत्, अत्र न कापि विचिकित्सा । 'शकारिरप्ययम्' अत्र न कस्यापि विरोधः । यतः ईसवीयाब्दतः पंचाशदधिकैकशतवर्षेभ्यः प्राक् शकानामितिवृत्तो व्यलेखि । परन्नैतन्निश्चीयते यत्केन ते पराजिताः । चेदयमेव विक्रमादित्यः तान्संह-

रेत्तर्हि ईसातः प्राक् तस्य सत्तायां का विप्रतिपत्तिः स्यात् । कालिदासेन रघुवंशस्य षष्ठे सर्गे पाण्ड्यनरेशा व्यलेखिषत, उरगपुरंच तेषां राजधानीति न्यगादि । अथोरगाख्यस्य पुरस्य नाथम्' इदमुरगपुरं पांड्यनरेशानां प्रथमशताब्द्यां राजधानी आसीत्, अतः कालिदासोऽपि तस्मिन् समये व्यराजत । प्राचीनानां मतमिदम् ।

किन्तु ईसातः प्राक् प्रथमायां शताब्द्यां विक्रमादित्यो नाम राजा बभूवेति न प्रबलैः प्रमाणैः परिपुष्यते । विक्रमादित्यपूर्ववर्तिनामशोकप्रभृतीनां भूपतीनां शिलालेखा उपलभ्यन्ते । किन्तु न तत्र विक्रमादित्यस्य शिलालेखः क्वाप्युपलभ्यते । अतः ईसातः प्राक् प्रथमशताब्द्यां विक्रमादित्यस्यैवास्तित्वं सन्देहास्पदन्तर्हि कालिदासस्यात्र का वार्ता ।

सररामकृष्णभांडारकर श्रीरामावतारप्रभृतिभिर्भारतीयैः डा० डी० ब्लोचप्रभृतिभिः पाश्चात्यैर्विद्वद्धौरेयैः गुप्तनरेशाभ्युदयकाले कालिदासस्थितिरंगीकृता । कालिदासग्रन्थे गुप्तवंशोद्भवानां राज्ञां कृते संकेतः उपलभ्यते ।

एवं चास्य स्थितिः पंचम्यां शताब्द्यां स्थिरीक्रियते । कुमारसंभवरघुवंशनामधेये द्वे महाकाव्ये व्यरचिषाताम् कालिदासेन । सप्तदशसर्गात्मके कुमारसंभवे शिवपार्वत्योर्विवाहः कार्तिकेयोद्भवः तारकासुरबधश्चावर्णयन्त । कुमारसंभवविषये अनेकेषां विदुषां मतमिदम् यत्कालिदासेन प्राथममिका एवाष्टौ सर्गाः व्यरचिताः अन्यास्तु नवसर्गा पश्चाद्विलिख्य संयोजिताः यतोऽष्टसु सर्गेषु महाकाव्यलक्षणं नैव संघटते । मल्लिनाथकृता टीकापि अष्ट-सर्गान् यावदेवोपलभ्यते ।

कुमारसंभवे कवेः कलाकौशलं प्रकाममभिलक्ष्यते । भावाभिव्यंजनम्, परमोदात्ता कल्पना, पदविन्यासश्च परमोत्कृष्टः । गुणैरेभिः ग्रन्थश्चासौ रमयति मनांसि मानवानाम् । अस्मिन् च कवेर्वर्णिता शक्तिः सुस्पष्टमाविर्भूता । क्वापि वसन्तो नवैः किसलयैः सौरभस-मन्वितैः कमनीयैः कुसुमैश्च सौष्ठवमावर्भाबियति, क्वापि वैवाहिकं सौख्यं प्रसरति । क्वापि च प्रियतमवियोगानलजायमानो ज्वालयति हृदये सन्तापः मनोरमप्रकृतिवर्णनं काव्यस्य वैशिष्ट्यं वितनोति । प्रथमे हिमवतो वैभवम्, तृतीये वसन्तसमागमेन जायमाना वसन्त श्रीः, चतुर्थे रतेर्विलापः पंचमे सर्गे वटुवेषधारिणः शिवस्य संलापः साकं पार्वत्या । सर्वमेतत्कवेः शुभ्रं यशो विवर्धयितुं समर्थम् । अत्र लक्षणाशक्तिश्च कवेः विद्योतते । शिवपार्वत्योर्विवाहो न केवलं रतिसुखाय, प्रत्युत्तयोः समागमेन स्वामिकार्तिकेयः तारकासुरं संहर्तुमजायत शिवपार्वत्योर्विवाहो दिव्यः पारस्परिकं च प्रेम मानवानां कृते आदर्शः यद्विवाहो नाम वंश

वर्धयते गृहसंरक्षणमपि कुरुते । कालिदासस्य निखिलापि कृतिः शृंगारबहुला, परं न क्वापि वासनात्मकं प्रेम । मदनदाहं शिवं वषीकर्तुं पार्वत्या सौन्दर्यं चाक्षमं वर्णयता कविना वासनात्मिका रतिः क्षणभंगुरा निष्फला चेति प्रदर्श्य दिव्यं तपसा अर्जितं लोकहितकरं प्रेम संस्थापतीयमिति प्रकटीकृतम् ।

रघुवंशस्योत्कृष्टता न केवलं कालिदासकृतिषु, प्रत्युत् निखिलेऽपि संस्कृतसाहित्ये स्वीक्रियते । ग्रन्थेऽस्मिन् सूर्यकुलोद्भवानां नृपाणां वर्णनम् अस्मिंस्तु कवेः परिपक्वा प्रज्ञा चरमा च प्रौढिः परिलक्ष्यते । अनुकूलानां घटनानां नैसर्गिकी वर्णना, आदर्शमयं चारित्र्यं, लोकातिशायिनी रसाभिव्यक्तिश्च कवेर्नैपुण्यमाविर्भवति । इन्दुमत्याः स्वयंवरः अजस्य विलापः, रामस्य सीतायाश्च विमानगमनम्—एतत्सकलमपि वर्णनमतीव समीचीनम् । ग्रन्थेऽस्मिन् अनेके रसा अभिव्यक्ताः । अलंकारा अपि शब्दार्थावलंकुर्वन्ति । आदर्शानामनुपमा सृष्टिः, रम्यं कथनम्, सरसं भावाभिव्यंजनम्, महाकवेः कालिदासस्य कीर्तिकौमुदीं सततं विस्तारयिष्यन्ति ।

महाकविना नारीणां केवलं मृदुसौन्दर्यमेव नोपवर्णितम्, प्रत्युत् तासु उग्रोऽपि भावो दर्शितः । लोकापवादभीत्या रामेण परित्यक्ता सीता वनमुपगम्य रामं प्रति सन्दिशन्ती निगदितवती—

वाच्यस्त्वया मद्वचनात्स राजा
वह्नौ विशुद्धामपि यत्समक्षम् ।
मां लोकवादश्रवणादहासीः
श्रुतस्य किं तत्सदृशं कुलस्य ॥

अत्र प्रत्येकं पदं स्वीयं वैचित्र्यमभिव्यनक्ति । रामस्य कृते 'स राजा' इति पदद्वयं कीदृशी मनोरमाभिव्यंजना । न केवलं रहस्यपितु समेषां समक्षम् । न केवलं शुद्धामपि तु विशुद्धाम् । न चापि शीतले जले प्रत्युत् वह्नौ । अत्र सर्वाणि पदानि सार्थकान्येव ।

अस्य महाकवेः कृतिषु संस्कृतकाव्यप्रकारे किमनुपमं रूपं प्रदर्शितम् । लोकरंजनशक्तैर्महद्भिगुणैरेवं प्रतीयते यन्महाकविरयं सारस्वतो भूत्वा अवततार । अयं प्राचीनतमम् नीरसमपि आख्यानमादाय स्वीयेन प्रातिभेन रागेणारंजयत् । येनास्य नैसर्गिकी प्रवृत्तिः प्रकाशतेतराम् । कवेः निखिला अपि कृतयः सार्वत्रिक्यः सार्वकालिक्यश्च । मुहुर्मुहुरास्वाद्यमानमपि तत्काव्यम् क्षणे क्षणे नवतामेवाकलयति ।

महाकवेः सर्वतोमुखी प्रतिभा महाकाव्ये, गीति-काव्ये, नाट्येऽपि अप्रतिहतगतिना दृश्यते । अनेन प्रकारेण सर्वात्मना न कोऽप्यन्यः कविस्तुलामधिरोढुं शक्नुयात् । एवं सम्भाव्यते शेक्शपीयरमहोदयो नाट्यदृशा, चरित्रचित्रणदृशा वा प्रधानो भवेत्, किन्तु काव्यात्मभूतस्य रसस्याभिव्यक्तौ कालिदास एव गरीयानत्र न सन्देहावसरः । त्रयाणामोजोमाधुर्यप्रसादानां गुणानां प्रकटनं वर्णनानुकूलमेवाजायत । प्रसादस्य तु महोत्कर्षः सर्वत्रैव वरीवर्ति अस्य कवेः काव्ये वैदर्भीरीतिरेव समाश्रिता दृश्यते । वैदर्भ्या लक्षणम्....

माधुर्यव्यंजकैर्वर्णैः रचना ललितात्मिका ।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥

कमनीयः पदविन्यासो माधुर्यस्य प्राचुर्यम्, क्लिष्टतायाः कृत्रिमतायाश्चाभावश्च कवेः नैपुण्यमुपस्थापयत्येव । भावाभिव्यक्तौ तु महाकविना किमपि वैचित्र्यमेवाश्रितम्ः—

एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥

अत्र कमलपत्रगणनायां पार्वत्याः लज्जाभावः, आन्तरिकस्य प्रेम्णः आनन्दातिरेकगोपनम् कं सहृदयं नाह्लादयति ।

कवेःकल्पनाऽनुक्षणं नवीनानि चित्राणि संस्थापयति । वस्तुतोऽस्य कृतिषु रमणीयतानुभूयते । लोकोक्तिरियं 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः' सम्यगत्र संघटते ।

भावध्वनावपि कवेरलौकिकी प्रतिभा परिलक्ष्यते । अतएव 'प्रसन्नराघव' निर्मात्रा कविः कालिदासः 'कविता-कामिनीविलासः' अभिहितः । शृंगारस्य पक्षद्वये विप्रलंभे संयोगे च कवेरभिव्यंजनाशक्तिः अद्वितीयैव विद्यते । करुणरसाभिव्यक्तावपि कविः प्रावीण्यमुपगतः नात्र केषामपि विरोधः । कुमारसंभवे रतेः विलापः, रघुवंशेऽजविलापः एवात्र महन्निदर्शनम् भस्मीभूतपत्युः शरीरमलोक्य विलपन्त्या रत्या कथ्यतेः—

गत एव न ते निवर्तते स सखा दीप इवानिलाहतः ।
अहमेव दशेव पश्य मामविषह्यव्यसनेन धूमिताम् ।
इन्दुमतीं प्राणविहीनां विलोक्य विलपन्नजः—
स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद् भवेदमृतं वा विषमीश्वरेच्छया ।।

अलंकारा अपि काव्यमर्मविदा कालिदासेन सकौशलं प्रयुक्ताः। अस्य कविता कामिनी न ग्राम्या नारीवालंकारभाराक्रान्ता। प्रत्युत स्फुटचन्द्रतारका विभावरी विद्योतमाना सहृदयान् तर्पयति। यथा 'प्रजाः प्रजानाथ-पितेव पासि' 'माधुरी मदयति मार्जना मनांसि' 'निर्ममे निर्ममोऽर्थेषु' शब्द चित्रेन कवेः क्वापि प्रयासोऽवलोक्यते। शब्दचित्रेण प्रायः रसानुभूतौ महती बाधा जायते। अतएव महाकविना शब्दालंकाराः क्वचिदेव प्रयुक्ताः, अर्थालंकारे तु कवेरभिरुचिः आसीदिति विचार्यते। स्वभावोक्तौ तु कवेर्नैपुण्यंस्थाने प्रकटीकृतम्। उभयोत्प्रेक्षार्थान्तरन्यासदृष्टान्तादिषु अमन्थरा गतिः। उपमालंकारे तु नामुष्य कवेः क्वापि साम्यम्। उपमा कालिदासस्य स्वीया संपत्। सुदक्षिणा दिलीपयोरन्तरालं जाता नन्दिनी 'दिनक्षपामध्यगतेव सन्ध्या' कथिता। 'छायेव तां भूपतिरन्वगच्छत्' इत्यादिषूपमालंकारस्य सफलः प्रयोगः। दिलीपमनुगच्छती सुदक्षिणा 'श्रुतेरिवार्थं स्मृतिरिव दृष्टा। सर्वत्रोपमा विराजतेऽस्य काव्ये। उदरंभरिर्विदूषकश्चन्द्रं मोदकमयमवगच्छति। मेघदूते तु उत्प्रेक्षाया प्रयोगोऽतीव शोभनः। परिपक्वपीतफलसंयुक्तैराम्रवृक्षैः सनाथः आम्रकूटः श्यामैर्मेघैरपि आच्छाद्यमानः 'मध्ये श्यामः स्तन इव भुवः शेषविस्तारपांडुः संजातः। दृष्टान्तोपि कवेः प्रियोऽलंकारः। 'सागरमुज्झित्वा कुत्र वा महानद्यवतरति।' 'क इदानीं सागरमुज्झित्वातिमुक्तलतां पल्लविनीं सहते। अर्थान्तरन्यासेऽपि कवेः सरसाभिरुचिः परिलक्ष्यते। 'किमिव हि मधुराणां मंडनं नाकृतीनाम्' 'क्लेशः फलेन हि पुनर्नवतां विधत्ते,' 'प्रियेषु सौभाग्यफला हि चारुतां न रत्नमन्विष्यति मृग्यते, हि तत्' इत्यादिषु स्थलेषु कवेः तद्विषयणी परमा प्रीतिर्ज्ञायते।

नायं कविर्बहिर्भूतमेव जगद्विलोक्यते, आन्तरिकं मानवीयम् भावमपि सूक्ष्मेक्षिकया निरीक्ष्यते। तेन सर्वत्र भावावेशाः सम्यक् परीक्षिताः। प्रकृतेर्मनोरमरहस्यं प्रदर्शयता तत्समीचीनं चित्रम् व्यरचि।

चरित्रचित्रणे कालिदासोऽद्वितीय एवास्ति। दीपशिखेवेन्दुमती कृशांगयष्टिः सीता, 'संनतगात्री पार्वती,' तन्वी श्यामा यक्षजाया, मनोज्ञा बल्कनेनापि तन्वी शकुन्तला चित्रार्पितेव विलोक्यते। संस्कृतसाहित्यमलंकुर्वाणोऽयं महाकविरमरतां गतः।

न केवलं संस्कृतज्ञा भारतीया एव प्रत्युत् वैदेशिका अपि विपश्चितः महाकविं प्रकामं प्रशंसन्ति। एवं कविकुलगुरुवाणीविलासः कालिदासो विजयतेतराम्।

नालन्दा विश्वविद्यालयः

[पं० रामलखन शर्मा एम० ए०]

विहार प्रान्ते पटनामण्डलान्तर्गते राजगृहात् योजनयावद्दूरं वर्तमान बड़ग्रामस्य समीपे नालन्दा विश्वविद्यालयः स्थित आसीत्। अयं विश्वविद्यालयः हर्षशासन समये सुतरां विश्रुत आसीत्। चीन पर्यटकैः ह्यूनसांगनामधेयैः महाभागैः सम्यग् वर्णितोऽयम्। तिब्बतेतिहासकारैः तारानाथ महाभागैस्तु लिखितं यदयमशोकसमयएव अवस्थित आसीत्, किन्तु सन्देहास्पदं वृत्तमिदं यतः गुप्तकालागतैः चीनपर्यटकैः फाह्याननामधेयैर्महाभागैरस्य विषये न किंचिदपि लिखितम्। एवं तर्क्यते यदस्य प्रसिद्धिरभ्युदयश्च पञ्चम्यां शताब्द्यां सम्यगभूत्।

तारानाथेन बुद्धधर्मेतिहासे व्यलेखि यत् नालन्दा सारिपुत्रस्य जन्मस्थानमासीत्। कालान्तरे अशोकः तत्रैव सारिपुत्रस्य चैत्यमद्राक्षीत्। तेन च तत्र मन्दिरमेकमपरं निरमायि किन्तु नालन्दा विश्वविद्यालयस्य प्रसिद्धिः ईशवीयाब्दतः प्राक्तनी नासीत्। यतः प्रथमविश्रुतौ विद्यार्थिनौ दक्षिणतरत्रागतौ, तौ तु नागार्जुनार्यदेवौ आस्ताम्। अत्र नागर्जुन समसामयिकेनैकेन ब्राह्मणेनाष्टोत्तरशतं मन्दिराणि निरमायिषत। अत्रैकः बौद्धो विपश्चिद् दिङ्नागः आहूतः येन शास्त्रार्थे सुदुर्जयः पराजित आसीत्। दिङ्नागः बसुबन्धोः शिष्य आसीत् यः चतुःशततमे ईशवीये वर्षे अभूत्। अतः स्पष्टमेव यत् पञ्चम्यां शताब्द्यामपि अत्र वैदिकधर्मस्य प्रतिष्ठासीत्, एतदर्थं बौद्धधर्मावलम्बिना फाह्यानेनायं न वर्णितः।

नालन्दायाः स्थानं परमं पूतमासीत्। अत्र परम्परागतो श्रूयते यत् स्वयं भगवान् बुद्ध अत्रागतः पावारिके आम्रकुञ्जे न्यवसत्। अत्रैव तस्य परमः शिष्यः सारिपुत्रः जन्म लेभे, ततश्च बुद्धस्य दर्शनमकरोत्। भगवता बुद्धेन तस्याशङ्काः दूरीकृताः। अत्रैव स च दीक्षितः अभूत्। अत्रैव उदकोऽपि दीक्षितो जातः। जातकेषु एवमपि कथ्यते यत् स्वयं भगवान् बुद्धोऽत्रैव नृपतिः अभूत्। निवसता भगवता बुद्धेन प्रकामं दानवृत्तिः प्रदर्शिता। अतएव स्थानमिदं—

न-अलम्-दा—इत्यभिधानेन ख्यातमभूत् । कालान्तरेऽस्य विद्यालयस्य स्थलं रमणीयमभूत् । अस्य मनोहाराणि भवनानि, सुसज्जीकृतानि सौधानि, अच्छसलिलकमलकान्त सरांसि, सघनाम्रकुञ्जानि, विशाल सभाकक्षाणि, मनोरमाः जटित स्तम्भाः, हस्तलिखित ग्रंथयुक्ताः पुस्तकालयाः तेषाञ्च प्रकोष्ठाः रत्नरंजकरत्नदधिरत्नसागराः केन शक्यते विस्मर्तुम्। कालान्तरे एव तु यवनानां नृशंसैः प्रहारैः विनष्टाः। परमेतैः प्रस्थापितैरादर्शैर्द्यावधि वयं समुन्नत-मस्तकाः मोदामहे ।

अस्य विश्वविद्यालयस्य संरक्षकाः ताम्रमूर्तिदायकः पूर्णवर्मा, सुरेश्वर वर्मा, यशो वर्मा, पालवंशीयः धर्मपाल देवः देवपालः, सुदूरवर्ती स्वर्णद्वीपाधिपतिः (सुमात्राधिपतिः) बालपुत्र देवः, बंगाधिपतिः देवपालदेवः, गोपालः द्वितीयः रामपालः एवं गोविन्दपाल प्रभृतय अभूवन्। एभिर्महाभागैर्विद्यालयोऽयं एवं समुन्नतः उपानीयत यदत्र न केवलं निःशुल्कं शिक्षा प्रदत्ता प्रत्युत छात्रेभ्यः निःशुल्क भोजनं वस्त्रादिकञ्चादीयत्। प्रथमतस्तु ग्रामशद्रूपा सम्पदस्मिन् नियोजिता आसीत् ; किन्तु शनैः शनैः सा तु वृद्धिमुपगता। अत्र प्रायशः दश-सहस्रसंख्याकाः छात्राः अहरहः अध्यैरन्। ते अस्मिन् उच्च शिक्षा केन्द्रे मंगोलिया, चीन, कोरिया, तिव्वत प्रभृतिभ्यः विदेशेभ्यः सश्रममागत्य, शिष्यत्वञ्चाधिगत्य अत्रैव न्यवसन्। अत्रत्यानां छात्राणां सर्वत्र महान् समादरो जातः। सामान्यतः अन्येषु विद्यालयेषु अधीयानाश्च छात्राः स्वान् नालन्दा विश्वविद्यालयीयान् मन्वानाः धन्यतरान् मन्यन्ते स्म ।

को हेतुरासीदस्योत्कर्षे इतीदानीं विमृश्यते। अत्रान्तेवासिनः शिक्षणार्थं पञ्चशतोत्तरसहस्रसंख्याकाः विविध विषय वेत्तारः प्राध्यापकाः, विशिष्टाः प्रवक्तारः, शास्त्रिणः धर्मपाल, चन्द्रपाल, गुणमतिः, स्थिरमति नैयायिकाः प्रभामित्र जिन-मित्र ज्ञान चन्द्रादयः, शीलभद्राः उपकुलपतयश्च, अनेके सांख्याः, वेदान्तिनः, लोकायतिकाः वैयाकरणाश्चासन्। तैश्च प्रत्यहं शतस्य व्याख्यानानामायोजनम् व्यधायि। एतेषां व्याख्यानां विषयाः विविधा आसन्। ते तु ह्वली महाभागेन-विरचितात् ह्वनसांग जीवन चरितात्ज्ञायन्ते। यथा—अत्र वैदिकबौद्धयोः धर्मयोः, हेतुविद्यायां शब्दविद्यायां, चिकित्सा सांख्यादि शास्त्रेषु शास्त्रार्थम् अभूत्। अत्राचारस्याभिव्यक्तेश्च पूर्णस्वातन्त्र्यमासीत् किन्तु न कदापि कलहो

जातः। अत्रत्यैः सुचरितैरध्यापकैः सर्वदैव आचरत्वं निजाचरणैरेव प्रकटी-कृतम्। अतएवात्र सुदूरदेशात् छात्रा आगमन्। ह्यू नसांगः, इत्सिंगः, थोक्ती महोदयः ह्यू नच्यू, ताओची, हुई लू, ताओ लिंगः, आर्य वर्मा, बुद्ध वर्मा प्रभृतयः छात्राः अत्रागताः। अतएव तैरध्यापिताः कतिपये अत्रत्याः छात्राः विदेशं गत्वा अभूतपूर्वां ख्यातिमलभन्त।

यथा--मध्यमभ्रमकघटस्य ग्रंथस्य रचयितार्य देवः। चतुर्थ्यां शताब्द्यामत्र छात्रत्वेनन्यवसत्। शीलभद्रात् प्रागेव वर्णसूत्रवृत्ति प्रणेता धर्मपालः आसीत्। येन विपश्चिता आलम्बनप्रत्ययध्यान शास्त्रव्याख्या, विद्यामात्रसिद्धिशास्त्र व्याख्या, सत् शास्त्रनैपुण्य व्याख्या, वलितत्वसंग्रहः, प्रभृतयः चत्वारग्रन्थाः विरचिताः तिब्बत धर्मप्रचारकः वादन्यायवृत्ति विपंचितार्थ तत्वसंग्रहप्रणेता शान्तरक्षितः। अष्टम्यां शताब्द्यामासीत् तदानीमेव तांत्रिकतत्वप्रतिपादकः तत् प्रवर्त्तकश्च प्रख्याताचार्यः समयपंचशिका प्रणेता पद्मसंभवः विश्रुतः आसीत्। कमलशीलः, स्थिरमतिश्च तिब्बतमगच्छत्। तत्र तौ अनेकान् ग्रन्थान् तत्रत्यायां भाषायामनूदितवन्तौ। उत्कलं प्रति हर्षेण प्रेषिताः त्रयः अन्येविद्वांसः सागरमतिः, प्रज्ञारश्मिः सिंहरश्मिश्च तत्रासन्। इमे हीनयानमपसारयितुं तत्र ह्यू नसांगेन सह गतवन्तः स्वनियोगे सफलीभूताश्च।

अनेनैव रूपेण अनेके विश्रुताः छात्राः चीनं प्रति धर्मप्रचाराय गतवन्तः। पञ्चम्यां शताब्द्यां कुमारजीवः गुणवर्मा च, अष्टम्यां शताब्द्यां शुभकर सिंह-महाभागः यस्य चत्वारः ग्रन्थाः चीनी इति नाम्न्यां भाषायामनूदिताः, दशम्यां शताब्द्यामाचार्यः धर्मदेवः यस्य षट्चत्वारिंशत् ग्रन्थाः चीनी भाषायां अनूदिताः। एकोनचत्वारिंशदुत्तर पञ्चशततमे ईशवीयाब्दे ह्नियोएन नामधेयेन ल्यांग वंशोद्भ-वेन सम्राजा मगधं प्रति विद्वांसमाह्वयितुं दूतः प्रहितः। तदानींतनेन मगध-सम्राजा जीवितगुप्तेन प्रथमेन आहोस्वित् कुमारगुप्त तृतीयेन परमार्थः तत्र प्रेषितः। सः तत्र अनेकान् ग्रन्थान् चीनी भाषायामनूदितवान्।

एवमन्याभिर्विविधाभिर्ज्ञानवर्धिनीभिः शिक्षणकृतिभिः नालन्दा विश्व-विद्यालयस्य महत्वं भारतीयान् जनानधुनापि गौरवास्पदं कर्त्तुमीष्टे।

कृष्णः घोरांगिरसशिष्यः सान्दीपनिशिष्यश्च

[डा० कु० वीणापाणि पाण्डेयः M. A. Ph. D. आई० टी० कालेजः लखनऊ]

कृष्णचरितं प्राक्तनादेव कालादारभ्य विश्रुतत्वात् साम्प्रतमनेकेषां विदुषामध्ययन-पथमवातरत्; एतत्सम्बन्धिवृत्तानां बहुविधेषु ग्रन्थेषु विकीर्णत्वात् तैश्च वृत्तान्तैः कृष्णस्वरूपस्य विनिश्चितत्वात्। कृष्णस्योल्लेखः ख्रिस्तपूर्वप्रथमशतकस्य ग्रन्थेभ्य. आरभ्य वैदिकेषु सूक्तेष्वपि दृश्यते। महाभारतस्यादिपर्वे धर्मद्रुमस्य मूलत्वेन कृष्णस्योल्लेखात् महाभारते तस्य प्राधान्यं स्फुटं लक्ष्यते[1]। भगवद्गीतायां वृष्णीनामधिपतिरूपेण वासुदेवस्योल्लेखः[2]। पातञ्जले महाभाष्ये कृष्णेन समाचरितस्य कंसवधस्य वृत्तान्तो लभ्यते[3]। ज़ेनोबः (Zenob—१४९-१२७ ख्रिस्तपूर्वशतकं) मेगस्थनीज़ः (Megasthenes) एरियन (Arrian—ख्रिस्तपूर्वचतुश्शतकं) पाणिनिकृता अष्टाध्यायी च (४. ३. ९५—भक्तिः; (४. ३. ९८—वासुदेवार्जुनाभ्यां वुन्) कृष्णस्य वृत्तान्तानां समुल्लेखाः प्रमाणयन्ति कृष्णचरित्रस्य पुरातनत्वम्। छान्दोग्ये घोरांगिरसशिष्यः कृष्णः देवकीपुत्रत्वेन प्रस्तूयते[4]। ऋग्वेदस्य केचित्सु मन्त्रेषु च दृश्यते कृष्णस्य बालप्रकृतेः प्रतिच्छाया[5]।

---

१. महा. १. १. १०१—युधिष्ठिरो धर्ममयो महाद्रुमः ....
मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च।

२. गीता. १०. ३७—वृष्णीनां वासुदेवोऽस्मि।

३. Ray Chaudhury:—His. Vais. Sect. p.37—जघान कंसं किल वासुदेवः।

४. छान्दोग्य उप. ३. १७. ६—तद्वैतद्घोरआंगिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाच—
'अपिपास एव स बभूव'।

५. ऋग्. १. २२. १८—त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः।
,, १. ५४. २—प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।
,, १. ५४. ६—ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृंगा अयासः।
अत्राह तदूरुगायस्य कृष्णः परमं पदमवभाति भूरि॥

पूर्वोद्दिष्टानां प्रमाणानामतिरिक्तं सन्त्यनेकानि प्रमाणानि यैः ऋग्वेदकाले कृष्ण-स्योपस्थितिः सम्भाव्यते । ऋग्वेदस्याष्टमे मण्डले 'द्रुतगामी कृष्णः अंशुमत्यास्तटे आत्मनो दशसाहस्रीं सेनामस्थापयत्' इति भावो लभ्यते (ऋग्. ८. ९६. १३–१५)। ऋग्वेदस्य प्रथमे मण्डले 'इन्द्रः कृष्णेन पराजितो भूत्वा कृष्णदेशस्य योषितां गर्भान् विदद्रे' इत्यभिप्राय उपवर्णितोऽस्ति (ऋग्. १. १०१. १) अत्र प्रथमेन प्रमाणेन कृष्णस्य नृपत्वमपरेण च तस्ये-न्द्रविरोधो लक्ष्यते । पुराणेष्वपि गोवर्धनधारणपारिजातहरणादिषु वृत्तान्तेषु इन्द्रकृष्णयो-र्विग्रहस्योपलब्धिः । प्रश्नस्तावत् प्रादुर्भवति किं ऋग्वेदीयोऽयं कृष्णः पुराणान्तर्गतस्य कृष्णस्य बोधकः स्यादिति ।

ऋग्वेदे मन्त्राणां केषाञ्चित् द्रष्टृरूपेणाङ्गिरसगोत्रीयस्य कृष्णस्योल्लेखोऽस्ति । ऋङ्मन्त्राणामन्तःपातिनि नृपे कृष्णे आंगिरसगोत्रजे मन्त्रद्रष्टरि च कृष्णेऽभेदप्रतीतिर्भवति, तत्र पुराणेषु विश्रुतस्य कृष्णस्य गुणानां साम्यत्वात् । ऋचां वृत्तान्तगते मन्त्रद्रष्टरि च कृष्णे पुराणेषूपवर्णितस्य द्वारिकाधिपतेः गीतायाश्चोपदेष्टुः दार्शनिकस्य कृष्णस्य प्रारम्भिको रूपो दृष्टिपथमायाति । ऋगान्तर्गतः कृष्णोऽप्याङ्गिरसगोत्रीयः कदाचिद्भवेत्, आङ्गिरस-गोत्रे ब्राह्मणानां क्षत्रियाणां च सम्भवात् । ऋग्वेदकालिको राजन्यः कृष्णः किञ्चित्काला-नन्तरं ऋषिरूपेण कासांचिद्रिचां दर्शनं चकार कदाचिदित्याकल्पयितुं शक्यते उपर्युक्तैः प्रमाणैः ।

ऋग्वेदीयैः प्रमाणैः (ऋग् ८. ९६. १३–१५; १. १०१. १.) एकत इन्द्रविरो-धिनः, ऋचां द्रष्टुः, आङ्गिरसगोत्रीयस्य कृष्णाख्यस्य कस्यापि राज्ञः, अपरतोऽन्यैश्च प्रमाणैः (ऋग् १. २२. १८; १. ५४. २; १. ५४. ६) स्वभावचपलस्य बालकृष्णस्य च चरितान्याभासितानि भवन्ति । किन्तु ऋग्वेदीये काले कृष्णस्योत्पत्तिर्न निश्चयत्वेन पर्यव-स्यति, तत्र प्रमाणान्तराभावात् ।

कृष्णस्वरूपचिन्तनविषयेऽस्ति मतभेदो विज्ञजनानाम् । पाश्चात्यविचारका ईषत्स-न्दिग्धमनस्काः कृष्णस्य परब्रह्मत्वे । किन्तु प्राचीनायाः भारतीयपरिपाट्या अनुसारं कृष्णस्त्वंशावतारः पूर्णावतारो वा परमेश्वरः । पाश्चात्यभारतीयमतयोश्च मध्येमार्गं स्थिता वर्त्तमाना अध्ययनपद्धतिस्तु कृष्णस्य परब्रह्मत्वं स्वीकृत्यापि तत्सम्बन्धिप्रमाणानां विदधाति विवेचनाम् । महामानवरूपिणः कृष्णस्य कालान्तरे परब्रह्ममये विष्णौ तादात्म्यकल्पनमुप-लभ्यते कृष्णसम्बन्धिनां ग्रन्थानामनुशीलनात् ।

कृष्णस्य व्यापके स्वरूपेऽस्ति चित्राणां कर्मणां संस्थितिः । कौरवानुच्छेत्तुं पाण्डवानां साहाय्यकरणे कृष्णस्य नीतिवेत्तृत्वं, धर्मक्षेत्रेऽर्जुनस्योपदेष्टृत्वेन दार्शनिकत्वं, गोकुले यमुनातीरेषु गोपीभिः सह रासनृत्यविधौ च तस्य गोपालरूपं संदृश्यते । विन्टरनिट्स[1]—कीथ[2] महोदयौ कृष्णस्य बहुविधेषु चरितेषु एकस्य कृष्णस्यासम्भाव्यत्वं प्रदर्श्य तत्तल्लीलाकर्तृकानेकान् कृष्णानकल्पयेताम् । कृष्णचरितानां व्यापकस्याध्ययनस्य फलस्वरूपं विद्वांसोऽधुना एकस्यैव कृष्णस्यावस्थितिं मन्यन्ते ।

छान्दोग्ये देवकीपुत्रस्य कृष्णस्योल्लेखेन कृष्णस्वरूपस्याध्ययनेऽभिनवा सामग्र्युपलभ्यते । अंगिरसोऽपत्यं पुमानांगिरसो घोरेति नाम्नोपपन्न ऋषिः कश्चित् कृष्णायात्मविद्यामुपदिदेशेत्यवगम्यते छान्दोग्यात् (३. १७. ६–७) । हरिवंशे (१. ३३) पुराणान्तरेषु[3] च कृष्णः सान्दीपिनः अन्तेवासिरूपेण वर्णितो दृश्यते । अत्रानुमीयते किञ्चित् साम्यं घोरांगिरससान्दीपन्योः स्वरूपयोः । छान्दोग्ये देवकीपुत्रः कृष्णो घोरांगिरसादात्मविद्यां जग्राह । पुराणेषु चानेन सान्दीपनेः सांगवेदमप्रापि । घोरांगिरसशिष्योऽयं कृष्णोऽर्जुनायात्मविद्यामुपदिदेश भगवद्गीतायामत्र नास्ति सन्देहावसरः ।

छान्दोग्ये प्रतिपादितानामात्मविद्यासिद्धान्तानां साम्यं भगवद्गीतायां संदृश्यते । छान्दोग्ये घोरांगिरसकृष्णौ सूर्यपूजकौ । अपरञ्च कृष्णो गुरोरांगिरसात् तमोतीतस्य (तमसस्परि) उत्तमस्य ज्योतिष (ज्योतिरुत्तमं) श्चिन्तनात्मकं ज्ञानमलभत (छान्दोग्य ३. १७. ७) । भगवद्गीतायामपि तमसामुच्छेदकेन ज्योतिषा कृष्णस्य नित्यसम्बन्धो दृष्टिपथमायाति ।[4]

घोरांगिरसशिष्यस्य देवकीपुत्रस्य कृष्णस्य पौराणिके महाभारतीये च कृष्णे ऐक्यं नितरां सिध्यति, हरिवंशे तत्पोषकानां सिद्धान्तानामुपस्थितत्वात् । हरिवंशस्य भविष्यपर्वे

---

१. Winternitz:—His. Ind. Lit. Vol. I. p. 456 457

२. उद्धृतम्—Ray Chan:, Vais Sect p. 52.

३. भागवतम् १०. ४५. ३१-३६.
पद्म उत्तर २७३. ४.
ब्रह्मवैवर्त्त, कृष्णजन्म १०२,

४. गीता १३. १७—ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
,, १०, २१—आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।

कृष्णमभिस्तुवन् हरस्तं सूर्यसूर्यपुत्राग्नीनाम्प्रतिरूपैरभिधानैः सम्बोधयति[1]। कथं सोमवंशीयो वासुदेवः सूर्यसूर्यपुत्राग्नीनाम्पतिरूपैर्विशेषणैराकार्यते इति प्रश्नः प्रस्फुरति कुतूहलोत्पादकत्वात्। सोमवंशीयस्य यायातिकस्य यदोर्वंशे क्रोष्टुनाम्नो राज्ञः प्रशाखायां समुत्पन्नत्वादयं यादव-शौरिवासुदेवेतिविशेषणैः समलंक्रियते[2]। सोमवंश एव कृष्णस्यावस्थितिसिद्धत्वात् पूर्वोक्तेभ्यो हरिवंशीयेभ्यो विशेषणेभ्यः कृष्णस्य सूर्यवंशे समुत्पत्तिर्न पर्यवस्यति।

हरिवंशे समुल्लिखितानि सूर्यसूर्यपुत्रादीनि विशेषणानि छान्दोग्ये गीतायाञ्च लभ्यमानेभ्यः सूर्येण तत्सम्बन्धिदिव्यप्रकाशेन च सम्बन्धिभ्यो विशेषणेभ्यः स्वरूपैक्यं संभजन्ते। गीतायामुपलभ्यमानेन प्रमाणकेन एतत्सम्बन्धो पुष्टिमायाति। कृष्ण आदौ सूर्याय योगमवोचदिति विलिखितमस्ति गीतायाम्[3]। एतेषु ग्रन्थेषु सूर्येण ज्योतिषा च कृष्णस्य सम्बन्धातिशयो व्यंजयति कृष्णस्वरूपैक्यम्।

छान्दोग्यभगवद्गीताहरिवंशेषु कृष्णेनाचरितेनेषद्व्यवहारसाम्येन छान्दाग्ये वर्णितस्य देवकीपुत्रस्य कृष्णस्य पौराणिके कृष्णे एकत्वं स्थापिते सति न भवति कापि विरोधापत्तिः।

कृष्णचारित्र्यं खलु हि भेदात्मकत्वेन प्रपञ्च्यते। आद्यं तावत् कृष्णस्य गोपालकत्वं यस्मिन् तस्य बालोचितानां स्वभावचटुलानामाचरितानामेव प्राधान्यम्। अशेषेषु वैष्णवपुराणेषु, महाभारतस्य सभापर्वे, समुद्रगुप्तस्य शिलालेखे[4] ऋग्वेदसंहितायाः पूर्वोद्धृतेषु मन्त्रेषु च तस्यैतादृशं गोपालस्वरूपमुपवर्णितं दृश्यते।

---

१. हरि ३. ९०. २०-२१—अग्नयेऽग्निपते तुभ्यं ज्योतिषां पतये नमः।
सूर्याय सूर्यपुत्राय ज्योतिषां पतये नमः॥

२. हरि १. ३४-३५—
क्रोष्टुः
(गान्धारी) (माद्री)
अनमित्रः युधाजितः देवमीढष (अश्मकी)
शूरः (भोज्या)
वसुदेवः (देवकी)
कृष्णः

३. गीता ४. १—इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।

४. संगृहीतम्—Ray Chau. : Vais. Sect. p. 47-48.

अपरञ्च कृष्णस्य मथुराभिगमनादौत्तरकालिकं वृत्तान्तम् । कृष्णस्य दार्शनिक-स्वरूपं पाण्डवानां साहाय्यपरं नीतिज्ञरूपञ्च कृष्णस्यौत्तरकालिकः स्वभावः । छान्दोग्ये, गीतायां, सभापर्वव्यतिरिक्तं महाभारते च कृष्णस्यौत्तरकालिकरूपस्यैव प्राधान्यम् । एतेषु ग्रन्थेषु कथं कृष्णस्य बालचरितानामभाव एतन्न शक्यते सम्यङ्निर्णीयोत्तरयितुम् । परम-स्त्यत्रावसरः कासाञ्चित् संभावनानाम् । छान्दोग्यादिषु पुरातनेषु ग्रन्थेषु कृष्णस्य गोपालक-रूपस्याभाव अर्वाचीनेषु ग्रन्थेषु तस्योपस्थितिश्च गोपालककृष्णवृत्तान्तस्यौत्तरकालिकीं विकासपरम्परां द्योतयति । अत्र केचन विद्वांसो मतमेतत्समर्थयन्ति । भण्डारकर-वैबर-कैनैडी—(Weber, Kennedy) आदीनां कथनानुसारं गोपालककृष्णवृत्तान्तस्य विकासः ख्रिस्तोत्तराव्दस्य प्रथमे शतके समजायत[१] । अस्त्यत्र कश्चित्संदेहावकाशो, यतो गोपालकृष्णस्य चरितानि प्राचीनतरेषु ग्रन्थेष्वपि संकेतिकानि सन्ति ।

डॉ० रे चोधरीमहोदयैः गोपालकृष्णवृत्तान्तस्य प्राक्तनत्वपोषणार्थं यानि प्रमाणानि प्रस्तुतीकृतानि, अस्ति तेषु वैशिष्टयम् । तदनुसारं विष्णवे उद्दिष्टेषु ऋग्वेदस्य सूक्तेषु केचित्सु गोपालकृष्णस्य बालोचितं चापल्यं व्यज्यते । बालचापल्यस्य व्यञ्जकाः शब्दा-स्तावत् कुचरगोपागिरिष्ठादयः । कुचरशब्दः कृष्णस्य बालोचितकौतुकस्याभिव्यञ्जकः । गोपाशब्दात् कृष्णस्य गवाम्पालकत्वम्प्रतीयते । गिरिष्ठाभिधानस्य कृष्णसमाचरितेन गोवर्धनगिरिधारणेन सम्बन्ध इत्यनुमीयते रेचौधरीमहोदयैः[२] ।

रे-चौधरीमहोदयानां विचारसरणिमनुसृत्य ऋग्वेदे केषाञ्चिद्विशेषणानामाधारेण गोपालकृष्णवृत्तान्तस्योपस्थितिः पूर्ववैदिककाले निर्विवादा इति न निश्चयेन वक्तुं शक्यते, प्रमाणान्तराभावात् । किन्त्वेतन्निर्णयं युक्तं यद्गोपालकृष्णरूपस्य कृष्णस्यौत्तरकालिक-वृत्तान्तानाञ्च संकलनं पृथक्परम्परास्वभवत् । अत्र गोपालकृष्णवृत्तान्तस्य ख्रिस्तोत्तर-प्रथमशतनके प्रादुर्भावपोषकानां श्रीभण्डारकरादीनां मतं खण्डयते । समुद्रगुप्तशिलालेखे गोपालकृष्णस्य वृत्तान्तोपस्थित्या ख्रिस्तपूर्वीकेषु शतकेष्वेव गोपालकृष्णस्य वृत्तान्तानामुप-स्थितिं सम्भावयामः ।

छान्दोग्यादारभ्य पुराणानां कालपर्यन्तं कृष्णस्वरूपे परिवर्त्तनं तत्सम्बन्धिवृत्तान्तान् स्फुटं प्रकाशयति । छान्दोग्ये कृष्णः सामान्यमानवगुणोपलक्षितत्वेन दर्शितः । गीतायां

---

१. Bhandarkar: Vaisnaism Śaivism p. 37-38;
JRAS 1907, p. 976.

२. Ray Chaudhury Vais. Sect p. 46-48.

महाभारते च तस्य मनुष्योचितैर्गुणैः साकं परब्रह्मत्वस्यापि योगः। पुरांणेष्वंशावतारपूर्णावतारयो[1]र्विशेषणयोः कृष्णस्वरूपस्याशेषो विकासो दृश्यते। दक्षिणापथादुत्तरवर्तिनि भारतीयभूभागे भक्तेः प्रचारात् कृष्णवृत्तान्तेषु भक्तेः तद्रूपत्वाच्च कृष्णस्वरूपस्योत्कर्ष सिद्धिः।

पुराणेष्वपि कृष्णवृत्तान्तेषु पारस्परिकः सामग्रीभेदःसाक्षात्क्रियते। प्राचीनेषु पुराणेषु कृष्णवृत्तान्तं संक्षेपतो वर्ण्यते। अत्र कृष्णस्य बाललीलावेणुगीतमहारासादिकानां समासतो वर्णनम्। अर्वाचीनेषु पुराणेषु बाललीलावेणुगीतरासादीनां सविस्तरं वर्णनम्। हरिवंशब्रह्मविष्णुपुराणेषु उपर्युक्तानां वृत्तान्तानां संक्षिप्तरूपमुपलभ्यते[2]। भागवतपद्मब्रह्मवैवर्त्तेष्वेतेषां वृत्तान्तानां विशदतो वर्णनम्[3]। हरिवंशब्रह्मविष्णुपुराणेषु रासो मण्डलीबन्धस्य नृत्यस्यैव वाचकः। भागवत्ब्रह्मवैवर्तपद्मपुराणादयेषु एतद्रहस्यात्मकत्वमनुमीयते।

कृष्णेन सम्बन्धिनां प्रमाणान्तराणां वैधुर्येण छांदोग्य गीताहरिवंशादीनां प्रमाणान्येव मूल्यवन्ति मन्यामहे। एतेषु ग्रन्थेषु पुराणेणु चोपलब्धं कृष्णचरितं कर्मयोगिन एकस्यैव कृष्णस्य द्योतकं तेषु तेषु ग्रन्थेषूपवर्णितस्य कृष्णस्य पारस्परिकगुणकर्मणां साम्यत्वात्।

---

१. हरि १. ५४. १३, महाभा. १२. ४२-७५, देवी भाग ४. २५. ५५; भाग १, २, १, पद्म पाताल ६९-८३, ब्रह्मवैवर्त्त श्रीकृष्ण ६।

२. हरि २. ६-१५; २. २०-२१,
ब्रह्म १८४-१९०; १८९.
विष्णु ५. ५; ५. १३.

३. भागवत १०. ६-२८; १०. २९-३३.
पद्म उत्तर २७२; पाताल ६९-८३.
ब्रह्मवैवर्त्त श्रीकृष्ण ८-१५; २८.

'न्यायदर्शने प्रत्यक्षप्रमाणम्'

[दयाशङ्कर चतुर्वेदी पी-एच० डी० द्वितीयवर्षम् लखनऊ विश्वविद्यालयः]

प्रमाणप्रमेये हि न्यायदर्शनस्य मुख्यतया विवेच्ये। सूत्रकारस्य प्रथमशब्दः प्रमाणशब्द एव। अस्मिन्मते चत्वार्येव प्रमाणानि स्वीकृतानि, यथोक्तं न्यायसूत्रकारैः—

'प्रत्यक्षानुमानोपमान शब्दाः प्रमाणानि' इति
न्यायसूत्रम् १।१।३

चतुर्षु प्रमाणेषु प्रत्यक्षस्यैव प्राथम्यम्। न केवलं स्थानादेव प्राथम्यं दृश्यते प्रत्यक्षस्योपरि लिखिते सूत्रे किन्त्वर्थतोऽपि। यतः सर्वाणि प्रमाणानि प्रत्यक्षपूर्वकानि भवन्ति तत एव प्रत्यक्षस्य वैशिष्ट्यम्। उक्तमपि न्यायवार्तिककृद्भिः—

'किं कारणम्। सर्वप्रमाणानां प्रत्यक्षपूर्वकत्वादिति।'
न्यायवार्तिकम् १।१।३

यतः प्रत्यक्षप्रमाणादेव वस्तुतः जिज्ञासा निवृत्ता भवति जिज्ञास्यवस्तुषु, इतोऽपि हेतोः प्रत्यक्षस्यैव प्रमाणस्य प्राधान्यमन्येभ्यः प्रमाणेभ्यो, यथा प्रतिपादितं भारद्वाजाचार्यैः—

'यथायं लौकिकोऽमुत्राग्निरित्याप्तोपदेशादग्निं प्रत्याहितप्रत्ययस्तं देशं गच्छति। प्रत्यासीदन् पुनर्धूमविशेषणं धूमाङ्गत्वेन व्यवस्थितं हुतभुजं प्रतिपद्यते। आसन्नतरस्त्विदानीमिन्द्रियार्थसन्निकर्षादग्निप्रत्ययं करोति तदा निराकाङ्क्षो भवतीत्यतः प्रधानं प्रत्यक्षमिति।' न्यायवार्तिकम् १।१।४

ननु किं प्रत्यक्षस्य लक्षणमिति जिज्ञासायां गौतमसूत्रमेव पुरस्थाप्यते यद् "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" इति। न्यायसूत्रम् १।१।४

चक्षुरादीन्द्रियैः सह घटाद्यर्थानां सन्निकृष्टत्वे सति यज्ज्ञानमुत्पद्यते, अथ च यदव्यपदेश्यमर्थात् शब्दसम्बन्धरहितम् अभ्रमात्मकं निश्चयात्मकञ्च भवति तदेव प्रत्यक्षं ज्ञानमिति गीयते। अत्र ज्ञानमेव प्रमाणमिति कथितम्। एवं सति प्रमात्वेन कस्य ज्ञानस्य ग्रहणं स्यादिति चेत्कस्यचिज्जिज्ञासा भवेत् तर्हीदं तदुत्तरमवगन्तव्यं यद् हानोपादानोपेक्षा बुद्धय एव प्रमात्वेन गृहीतव्याः। अतएव हि प्रोक्तं भाष्यकारेण वात्स्यायनेनः--

'यदा ज्ञानं तदा हानोपादानोपेक्षाबुद्धयः फलम्।' इति। न्या० भा० १।१।३

यदा त्विन्द्रियार्थसन्निकर्षः प्रमाणं भवति तदा ज्ञानमेव फलमित्यपि प्रतिपादितं भाष्यकारेण स्वकीये भाष्ये "यदा सन्निकर्षस्तदा ज्ञानम्" इति (न्यायभाष्यम् १।१।३) एतस्माद्धेतोः प्रत्यक्ष प्रमाणं न केवलं ज्ञानमपि तु सन्निकर्षोऽपि भवतीति स्पष्टीभवति।

इन्द्रियाणि तावत् घ्राणं, रसनं, चक्षुः, त्वक् श्रोत्रञ्चेति पञ्च बाह्यानि। मनस्त्वान्तरम्। ये हीन्द्रियजन्यज्ञानविषयास्ते सर्वेऽप्यत्रार्थाः स्वीकृताः, न केवलं गन्धरसरूपस्पर्शशब्दा एव।

सन्निकर्षः द्विविधः। लौकिकोऽलौकिकश्च। तत्र लौकिकः सन्निकर्षः षोढा भवति। संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायो, विशेषणविशेष्यभावश्चेति। यथा चक्षुषः घटेन सह संयोगः सन्निकर्षः, घटरूपेण संयुक्तसमवायः, घटरूपत्वेन संयुक्तसमवेतसमवायः। एवं घ्राणादिषु यथा संभवम्। यतः कर्णशष्कुल्यवच्छिन्नाकाशमेव श्रोत्रेन्द्रियं तत्र च समवैति शब्द अतएव श्रोत्रस्य शब्देन सह समवायः सन्निकर्षः, शब्दत्वेन सह समवेतसमवायः। कस्यापीन्द्रियस्य केनचिद्प्यभावेन विशेषणविशेष्यभावः सन्निकर्षः। घटाभाववद्भूतलमित्यत्र इन्द्रिय संयुक्ते भूतले घटाभावस्य विशेषणतया भानेन इन्द्रियसंयुक्तविशेषणतायाः घटाभावे विद्यमानत्वात्। येनेन्द्रियेण यद् गृह्यते तेनैव तदभावस्यापि ग्रहणमिति नियमाच्चक्षुषा घटाभास्य प्रत्यक्षं भवत्येव। तत्तु प्रागुक्तेन विशेषणविशेष्यभाव सन्निकर्षेणैव। मनो हीन्द्रियम्। तस्य सुखेन सह संयुक्तसमवायः सन्निकर्षः। आत्मनि सुखादयः समवेता एवोत्पद्यन्ते। अतएव सुखादयोऽपि प्रत्यक्षीक्रियन्ते।

सत्यमेतद् यन्नेन्द्रियार्थसन्निकर्ष एव प्रत्यक्षं प्रति कारणमपि तु यथोपन्यस्तं न्यायवार्तिके आत्मनः संयोगः, इन्द्रियमनः संयोगो, विषयप्रकाशसंयोगो, विषयस्थं रूपं, विषयसंयोगिस्थं च महत्वम्, अनेकद्रव्यत्वम्, उपलब्धिफलं संस्कार इत्यपि (न्यायवार्तिकम् १।१।४), किन्तु गणितान्येतानि कारणानि नासाधारणान्यतएव कारणभूतान्यपि न निबद्धीकृतानि सूत्रे ।

पञ्चस्विन्द्रियेषु चक्षुषः तदर्थस्य च न स्थानैकत्वं अएतव तयोर्सन्निकर्षो न भवतीतिपूर्वपक्षिणां मतम् । तेषां मते अप्राप्यकारि चक्षुः यतो हिः—

१—विप्रकृष्टदेशस्थितस्य वस्तुनः ग्रहणेन इन्द्रियार्थयोर्मध्ये नैकट्यं न भवति । अतोऽप्राप्यकारित्वं चक्षुषः ।

२—लघ्विन्द्रियेण चक्षुषा पृथुतरवनादेर्ग्रहणं, भवेच्चेत् सन्निकर्षः इन्द्रिय-परिमाणस्यैवार्थस्य ग्रहणं स्यात् ।

३—दिग्देशयोर्विषयीकरणं स्वीक्रियत एव सर्वजनैः चाक्षुषप्रत्यक्षस्थले । प्राप्यकारित्वे तु चक्षुषः प्राच्यप्रतीच्यादेर्व्यवहारोऽपि न भवेत्, यथा न भवति व्यपदेशः मया प्रतीच्यामास्वादितं घ्रातञ्चेति, किन्तु मया पूर्वस्यां दिशि दृष्टा-साविति श्रूयत एव सर्वदा ।

४—विषयदेशे तैजसस्य चक्षुषो गमने स्वीकृते सन्निकृष्टवस्तुन आशुग्रहणम-भविष्यद् विप्रकृष्टस्य च विलम्बितः नैतद्भवति, शाखाचन्द्रमसोः समानक्षण एव ग्रहणात् । अतएव चक्षुरप्राप्यकारि । पूर्वपक्षिणामेतन्मतं नादरणीयं यतोहिः—

१—चक्षुरिन्द्रियाश्रयाच्चक्षुर्गोलकाद्रश्मिनिचयरूपं चक्षुः निर्गच्छद् विषय-देशं प्राप्य सन्निकृष्यते ततः । अतएव सान्तरग्रहणमूलक आक्षेपो निराकृतो वेदितव्यः ।

२—यदुक्तं लघ्विन्द्रियेण चक्षुषा पृथुतरवनादिग्रहणं भवतीति फलतो-ऽप्राप्यकारित्वं चक्षुषः विषयेणेति तदप्यसमीचीनम् । चक्षुर्गोलकमिन्द्रियं मन्य-मानैरक्षपादसिद्धान्तानभिज्ञैरेव जनैरेतदुच्यते । उक्तमेव पूर्वं यच्चक्षुर्गोलकाच्चक्षु-रश्मय एव विषयान् प्रत्येत्य सन्निकृष्यन्त इति । रश्मीनां प्रसरणं यतो भवति तत एव पृथुतरस्य वस्तुनः ग्रहणं भवति ।

३—दिग्देशव्यवहारकथनमप्यहेतुरेव। यतः चक्षुस्तद्विषययोः सन्निकर्षस्थले शरीरविषययोः मध्ये इन्द्रियभूतानां रश्मीनां व्यवधानो भवति, अतएव दिगादीनां व्यपदेशो भवति। चाक्षुषातिरिक्त प्रत्यक्षस्थलेषु इन्द्रियाणि स्वाश्रयेभ्यः शरीरावयवेभ्यो विषयदेशान्न गच्छन्ति। न तेषु रश्मयस्सन्ति। अतः चाक्षुषव्यतिरिक्तेषु चतुर्षु प्रत्यक्षस्थलेषु शरीरेण अव्यवहिता एव विषया इन्द्रियैः सह सन्निकृष्यन्ते। शरीरविषयाव्यवधानं हि दिगादिव्यपदेशराहित्यस्य कारणम्, यथोक्तं न्यायवार्तिकेः—

"यत्पुनरेतदुक्तं दिग्देशव्यपदेशादिति, तदपि शरीरावधिनिमित्तत्वात् प्रत्युक्तम्। यत्रेन्द्रियं शरीरं चार्थेन सम्बद्ध्यते तत्र दिग्देशव्यपदेशो न भवति। इति। न्यायवार्तिकम् १।१।४

४--यदुक्तं चक्षूरश्मिगमनं कालमपेक्षेत अतः सन्निकृष्ट विप्रकृष्टयोः शाखाचन्द्रमसोः तुल्यकालग्रहणं कथमित्यप्यसमीचीनम्। शाखाचन्द्रमसोस्तुल्यकालग्रहणं भवत्येव न, कालभेदस्स्वल्पो भवतीति तद्ग्रहणं न भवति। अतएव हि समकालीनं ग्रहणमाभासते। यद्यप्राप्यकारि चक्षुरभविष्यत् [पर्वतेनापि व्यवहितस्य वस्तुनः प्रत्यक्षमभविष्यत्, नैतदनुभवेन सिद्ध्यति, यथा प्रतिपादितमुद्योतकाराचार्यैः--

"यत्पुनरेतत् शाखाचन्द्रमसोः तुल्यकाल ग्रहणादिति, तदपि न। अनभ्युपगमात्। को हि स्वस्थात्मा शाखाचन्द्रमसोस्तुल्यकालग्रहणं प्रतिपद्यते। कालभेदाग्रहणान्मिथ्या प्रत्यय एष उत्पलदलशतव्यतिभेदवदिति। कथं पुनरवगम्यते कालभेदाग्रहणनिमित्त एव युगपत्प्रत्ययो न पुनरेककाल एव? इदमनुमानं आवरणानुपपत्तेरिति। यद्यप्राप्यकारि चक्षुर्भवति न कुड्यकटादेरावरणस्य सामर्थ्यमस्तीत्यावरणानुपपत्तिः स्यात्। न च व्यवहितार्थोपलब्धिरस्ति। तस्मान्नाप्राप्यकारीति!" न्यायवार्तिक १।१।४

अलौकिकाः सन्निकर्षा त्रयो भवन्ति। सामान्यलक्षणप्रत्यासत्तिः, ज्ञानलक्षणप्रत्यासत्तिः, योगजप्रत्यासत्तिश्च। यथोक्तं न्यायसिद्ध्यान्तमुक्तावल्याम्:--

"अलौकिकास्तु व्यापारास्त्रिविधः परिकीर्तितः।
सामान्य लक्षणो ज्ञान लक्षणो योगजस्तथा॥"

(न्यायसिद्धान्त मुक्तावली ६३)

व्यक्तिविशेषस्य प्रत्यक्षे कृते तद्व्यक्तिगतस्य सामान्यस्य सर्वासु तज्जातीयव्यक्तिषु विद्यमानतया सर्वेषां तद्व्यक्तिजातीयानां यज्ज्ञानं भवति तत्सामान्यलक्षणप्रत्यासत्तिसन्निकर्षेण जायमानमित्युच्यते।

सौरभयुक्ते चन्दनखण्डे दूरेऽपि विद्यमाने यत् 'सुरभिचन्दनखण्डम्' इति प्रत्यक्षं जायते तत्र तत्प्रत्यक्षं ज्ञानलक्षणासन्निकर्षजन्यमेव भवति। अर्थादत्र चक्षुस्सौरभयोः संयुक्तमनःसंयुक्तात्मसमवेत ज्ञानरूपेण अथवा संयुक्तात्मसमवेत संस्कार रूपेण उक्तालौकिकसन्निकर्षेण सौरभस्य प्रत्यक्षं जायते। अयमलौकिकसन्निकर्षः ज्ञानलक्षणप्रत्यासत्तिरिति कथ्यते।

योगिनां यद्भूतभविष्यसूक्ष्मव्यवहितविप्रकृष्टसर्ववस्तूनां ज्ञानं भवति तत्तु योगजसन्निकर्षेणैव भवति।

उक्तेभ्यः सन्निकर्षेभ्यः प्रत्यक्षं ज्ञानमुत्पद्यते। यतो हि एते सन्निकर्षा न लोकैरनुभूयन्तेऽत एवैते अलौकिकाः सन्निकर्षा इत्यभिधीयन्ते।

यत इन्द्रियार्थसन्निकर्षाज्ज्ञानमप्युत्पद्यते सुखादयोऽप्युत्पद्यन्ते, अथ च सुखादयो न प्रमाणम्, अतस्तद् व्यावर्तनायैव सूत्रे 'ज्ञानम्' इति पदं प्रयुक्तमृषिणा। उक्तमपि न्यायवार्तिके :—

"अथ ज्ञानग्रहणं किमर्थम्? सुखादिव्यवच्छेदार्थम्। इन्द्रियार्थसन्निकर्षात् सुखदुःखे अपि भवतः तद्व्युदासार्थमाह ज्ञानमिति।" न्यायवार्तिकम् १।१।४

प्रत्यक्ष ज्ञानं शब्दार्थसम्बन्धनिरपेक्षं भवति। शब्दार्थसम्बन्धस्तु समय एव येन परस्परं लौकिको व्यवहारः सम्पाद्यते। अधिगतानधिगताङ्ग्लभाषयोरपि जनयोर्द्वयोः कस्यचिदेकस्य वस्तुनः जायमानं प्रत्यक्षं ज्ञानमेकरूपमेव भवति, न वैलक्षण्यं भजते। तत्तच्छब्दार्थविषयकं शिशोरपि ज्ञानं शब्दनिरपेक्षं फलतोऽव्यपदेश्यं भवति। उक्तमपि श्रीमदुद्योतकराचार्यैः—

"यदिदमनुपयुक्तशब्दार्थसम्बन्धस्य विषयभेदानुविधायि विज्ञानं तत्प्रत्यक्षं, कृतशब्दार्थसम्बन्धस्यापि तदुत्पत्तिकाले तादृगेव।" इति न्यायवार्तिकम् १।१।४

भ्रमात्मकस्य ज्ञानस्येन्द्रियार्थसन्निकर्षजन्यत्वेऽपि न प्रामाण्यम्, यतः तज्ज्ञानं यथार्थं न भवति। यदा यथा अर्थो भवति तथैव ज्ञानमपि भवति तदा

तज्ज्ञानं यथार्थमिति कथ्यते, यदा विपरीतं तदा अयथार्थम्। यथार्थज्ञानं तस्मिंस्तद्प्रत्ययो भवति, अयथार्थज्ञानमतस्मिंस्तद्प्रत्ययो भवति। मरीचिष्वुदकमिति ज्ञानमतस्मिंस्तद् प्रत्ययः, मरीचय इति ज्ञानं तस्मिंस्तदिति प्रत्ययः, यथा स्पष्टीकृतंन वात्स्यायने मुनिनाः--

"ग्रीष्मे मरीचयो भौमेनोष्मणा संसृष्टाः स्पन्दमाना दूरस्थस्य चक्षुषा सन्निकृष्यन्ते, तत्रेन्द्रियार्थसन्निकर्षादुदकमिति ज्ञानमुत्पद्यते तच्च प्रत्यक्षमिति प्रसज्यत इत्यत आह--अव्यभिचारीति। यदतस्मिंस्तदिति तद्व्यभिचारियत्तु ^८स्मिंस्तदिति तदव्यभिचारि प्रत्यक्षमिति।" इति न्यायभाष्यम् १।१।४

निश्चयात्मकं ज्ञानमेव प्रमाणं भवति। इन्द्रियार्थसन्निकर्षात्संशयात्मकमपि ज्ञानं जायते। अतस्तद्व्युदासाय प्रत्यक्षलक्षणसूत्रे व्यवसायात्मकमित्यपि पदं योजितम्। स्थाणुर्वा पुरुषो वा इत्याकारकं संदेहात्मकं ज्ञानं पदार्थस्य यथार्थस्वरूपमेव न वक्ति, अयथार्थज्ञानं प्रमाणं भवत्येव न। न्यायभाष्ये रेणुधूमयोः दृष्टान्तेन व्यवसायात्मकमिति पदन्यासस्याभिप्रायः स्पष्टीकृतः।

"दूराच्चक्षुषा ह्ययमर्थं पश्यन्नावधारयति धूम इति वा रेणुरिति वा वदेत् तदिन्द्रियार्थसन्निकर्षोत्पन्नमनवधारण ज्ञानं प्रत्यक्षम् प्रसज्यत इत्यत आह— व्यवसायात्मकमिति।" इति न्यायभाष्यम् १।१।४

तात्पर्यटीकाकृता मिश्रवाचस्पतिना तु उक्तस्य प्रत्यक्षसूत्रस्य त्रिलोचनगुरून्नीतपद्धत्या अन्य एवार्थः ' कटीकृतः। तेन हीदं प्रोच्यते यदिन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारि प्रत्यक्षमेतावदेव प्रत्यक्षलक्षणं विवक्षितम्। अव्यपदेश्यं व्यवसायात्मकमिति च पदद्वयं प्रत्यक्षविभागपरं तथा च इन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारिज्ञानं प्रत्यक्षं द्विविधम्। अव्यपदेश्यं व्यवसायात्मकञ्चेति प्रत्यक्षसूत्रस्याभिप्रेतोऽर्थः। मिश्रमहाभागा इदमप्यत्र कथयन्ति यत् प्रत्यक्षसूत्रमिदं प्रत्यक्षप्रमालक्षणपरमेव न तु प्रत्यक्षप्रमाणलक्षणपरम्। प्रत्यक्षप्रमाणलक्षणे विधीयमाने सूत्रे 'यतः' इति पूरणीयम् तथा च सूत्रोक्तमेवं विधं प्रत्यक्षं यतः कारणाद् भवति तत् प्रत्यक्षं प्रमाणमित्यत्र सूत्रस्याभिप्राय इति तात्पर्यटीकाकृतां कथनम्।

एतद्व्याख्यानपक्षे अव्यपदेश्यमित्यस्य निर्विकल्पक इत्यर्थः, व्यवसायात्मकमित्यस्य च सविकल्पकमित्यर्थः। इति

"कथं शाकुन्तले महदितिहास विरोधः ?"

[कु० कृष्णा वाजपेयी एम० ए०, पी० एच-डी० द्वितीयवर्षम्]

'अभिज्ञानशाकुन्तलम्' विश्वविख्यातस्य कविकुलगुरुर्कालिदासस्यैका सफला लौकिककाव्यसुधारसनिष्यन्दिनी अद्वितीया रचनाऽस्ति । अनया एव रचनया कालिदासः अखिलविश्वसाहित्यमर्मज्ञमानसमरालः । आदितोऽन्तपर्यन्तं न जाने कतिसंख्याकैः देशीयैः विदेशीयैर्वा काव्यकलारसिकैः शाकुन्तलकारस्य स्तुतिः कृता । विश्ववाङ्मये संस्कृतभाषायै गौरवशालिपदं 'शाकुन्तलेनैव' प्रदत्तमित्यपि बोध्यम् । नूनं 'शाकुन्तलस्य' कर्तृभिः भोक्तृभिः सहैव क्षणघटिकादिवसनक्षत्रादयोऽपि सर्वे ते धन्याः वर्तन्ते ये येन केनापि प्रकारेण अनया रचनया सह सम्बन्धिनः समुल्लसन्ति ।

किन्तु समग्रोऽयं संसारः गुणदोषमयः । परिणामतः महत् प्रतिष्ठालौकिक विशेषतायुक्तेऽपि च शाकुन्तले कतिचनेदृशाः तथ्यापि सन्ति, यैः तस्य प्रबलः प्रशंसकोऽपि कदाचित् संदग्धचित्तो भवति । काव्यशास्त्रसमीक्षकाणां (प्रायशो वैदेशिकानाम्) मते कालिदासोऽप्यस्ति ऐतिहासिकानौचित्यस्य कृतेऽपराधी काव्यजगति । यतो हि स्वरचनासु कालिदासेन ऐतिहासिकतथ्यानामनावश्यकमवहेलना कृता । ततोऽपि शाकुन्तलेत्वैतिहासिकतथ्यानां विशेषाऽऽवहेलना वरीवर्ति । इयमेवावहेलनाऽस्त्यत्र प्रतिपाद्यविषयः । कालिदासकृदैतिहासिकानौचित्यस्य कारणपरिहारवर्णनात्पूर्वं शाकुन्तलस्यानैतिहासिकतायाः विहंगावलोकनमेव प्रस्तूयते ।

सर्वे समीक्षकाः प्रायशो निर्विवादरूपेणैव "शाकुन्तलम्" ऐतिहासिकपृष्ठभूम्युपर्याधारितमथवा ऐतिहासिकघटनानुप्रणितां कृतिं मन्यन्ते । प्राक्तने भारतीयसाहित्ये दुष्यन्तशकुन्तलयोः कथा (शकुन्तलोपाख्यानम्) महाभारतस्यादिपर्वे लभ्यते ।[1] अपि च दुष्यन्तभरतयोश्च वंशवृत्तान्तः तदतिरिक्तमैतरेयशतपथादिषु ब्राह्मणेषु वायुमत्स्यहरिवंशविष्णुभागवतादिषु पुराणेषु चोपलब्धः । अत्रत्वादौ क्रमबद्धोपयोगिबहुगृहीतञ्च दुष्यन्त शकुन्तला संयुक्त रूपेण कथानकमेव क्रियमाणायाः समालोचनायाः प्रमुख आधारो

१. अ० ६८–७२ एवं पद्मपुराणे अ० ६८–७२ ।

मया करणीयः। पद्मपुराणे वर्णिता कथा तु महाभारतोक्तवत्प्रक्षेपदोषदुष्टापि नास्त्यनेन कारणेन सा नाऽलोचनीया।

अस्ति शाकुन्तलस्याधारः महाभारतम्। तत्रान्तर्गते शाकुन्तलोपाख्यानेऽपि महती ऐतिहासिकासंगतिरस्ति। अत्र निबन्धे सन्दर्भसारल्यं चिन्तयित्वा महाभारतीयस्यासंगतिं प्रति क्रमांकरा इत्यस्य तथा कालिदासकल्पितस्य च कृते (क्रमांक २) इत्यस्य संकेतस्य व्यवहारं करिष्यामि। क्रमांकस्य प्रथमस्यान्तर्गतनिम्नोक्ताः प्रश्नाः विचारणीयाः—

(क) विश्वामित्रशकुन्तलयोः पितृपुत्रिभावसम्बन्धः।

(ख) कण्वशकुन्तलयोः पितृपुत्रिभावसम्बन्धः।

(ग) दुष्यन्तशकुन्तलयोः पतिपत्निभावसम्बन्धः।

(घ) भरतदुष्यन्तयोः पितृपुत्रभावसम्बन्धः।

(ङ) दुष्यन्तहस्तिनापुरयोः शास्यशासकभावसम्बन्धः।

(क) ऋर्षिविश्वामित्रोः ऋग्वेदस्य तृतीय मण्डलस्य ऋषिः भारतीय संस्कृतेरतीव महत्वपूर्णस्य गायत्रीमन्त्रस्य दृष्टा, वेदपुराणादिषु प्रसिद्धतमः महर्षिः। नास्ति संशयस्थानमत्र यत् यस्योग्रतपसा भयभीतः देवराज इन्द्रः येनकेन प्रकारेण मेनकां ऋषेर्व्रतभंगाय प्रेषितवान्। अपि च महाभारतवर्णनानुसारं शकुन्तला यस्य कन्याऽऽसीत् सोऽयं विश्वामित्रः भूतपूर्वकान्यकुब्जेश्वरः उग्रकर्मा, प्रबलप्रतिशोधभावापन्नः गाधिसुतो विश्वरथ एव। महाभारतानुसारेण गाधितनय विश्वामित्रः शकुन्तलायाः जनक इति स्वीकरणे महती असंगतिः वर्तते। यतः विश्वामित्रः भरतदुष्यन्तयोः न्यूनातिन्यून चतुश्शताणां व्यवधानमवगम्यते। वायुपुराणस्यानुसारं दौष्यन्तिर्भरतः निस्सन्तान आसीत्। अतएव तेन भारद्वाजस्य क्षेत्रपुत्रः वितथः उत्तराधिकारी कृतः। वितथस्य चतुर्थ्यां सन्तत्यामखिलपृथ्वीपतिविरुद्धारी चक्रवर्ती सम्राट् सुहोत्रोऽभूत् हस्तिन् इति नामधेयः सुहोत्रतनयः 'हस्तिनापुर' नामकं नगरं निर्मितवान्। तदेव तदनन्तरं पौरवराज्यस्य राजधानी बभूव। सुहोत्रस्य तृतीयेन पुत्रेण बृहतेन पौरवाणाम् नवीनकान्यकुब्जराज्यस्य स्थापना कृता। अस्मिन्नेव वंशे गाधितनय विश्वरथस्य प्रादुर्भावो 'बभूव। यो पश्चात् 'ब्रह्मर्षि विश्वामित्रः' इति नाम्ना प्रसिद्धिमलभत्। अनेकैः प्रमाणैः सिद्धमिदं यदयं ऋषिः दशरथ सुदास सगरहरिश्चन्द्रादीनाम् समसामयिक आसीत्,

---

१ वायुपुराणम् ९९, १५७ तथा वंशवृक्षःद्वितीयः दृष्टव्यः।

यः सम्भवतः मनुर्वैवस्वतस्य एकोनचत्वारिंशततमायां सन्तत्यामभवत् ।[1] तथ्यस्यास्यान्वेषणा-मतीवावश्यकम् ।[2] अनेन प्रकारेण स्वतः सिद्धमिदं यत् शकुन्तला विश्वामित्रस्य पुत्री आसीत् । अपि चात्र प्रमाणाभावे अन्यस्य विश्वामित्रस्य कल्पनापि असम्भवा एव ।

(ख) [3]मान्यपौराणिकप्रमाणात् प्रमाणितमिदं भवति यत् शकुन्तला सम्बधेन कण्वस्य वधू आसीत् न तु पोषिता पुत्री । यथोक्तं शाकुन्तलेऽत्र पतिगृहप्रेषणावसरे कण्वेन शकुन्तलां कथितः यत् स्त्रीणाम् सम्बधिगृहेषु चिरनिवासं नोचितम्[4] । उपर्युक्तप्रबलपौराणिकसाक्ष्या-नुसारमिदं ज्ञायते यत् चन्द्रवंशस्य पौरवशाखायां मनुर्वैवस्वतस्य द्वाविंशतितमशाखायां गौरिपुत्रः चक्रवर्ती मान्धातुः मातामहः यतिनारःप्रसिद्धः नृप आसीत् । एतद्वंशस्यार्धनामो ब्राह्मणोऽभवत् । कण्वः दुष्यन्तश्च भ्रातरौ आस्ताम् ।[5]

(ग) अस्माभिरुक्तं यत् शकुन्तला पुरुवंशस्य वधू आसीत् । अतएव तस्याः भर्तु-रन्वेषणमपि समपेक्षितमत्र । अस्य सम्बन्धे द्वितीयसंलग्नवंशवृक्षेण तथा तत्सम्बन्धिसाहित्येन च निम्नोक्तानि तथ्यानि प्रकाशितानि भवन्ति । प्रथमतस्तु यत् मतिनारपुत्रतंसु पराजित्य मान्धाता तं राज्यच्युतमकरोत् । अतएव दुष्यन्तः राज्यभ्रष्टः राजपुत्र आसीत् । द्वितीयमिदं यत् तं दुष्यन्तं दत्तकपुत्रं इति कारयित्वा तौर्वंशंमरुत्तः स्वस्यराज्यस्योत्तराधिकारिणं कृतवान् । सम्भवतः तंसु मतिनारस्य ज्येष्ठसुतः अथ च पौरवराज्यस्य सिंहासनस्य अधि-कारी आसीत् । महाभारतानुसारं तंसोः कलिंगराज्यकन्यया एकः पुत्रः 'ईलिन' इति अभवत्, यः अतीव पराक्रमी अभवत् ।[6] अस्यैव पञ्चसु पुत्रेषु एकः दुष्यन्त आसीत् । यदा पौरवराज्यस्य भंगोऽभूत्कुलमिदं प्रच्छन्नमिव भवति स्म । अन्यथाऽसति ईलिनस्य ज्येष्ठपुत्रः सुद्युम्नः तस्य राज्यस्योत्तराधिकारी यतः यौवराज्यपदे तस्यैव नामास्ति । अनेनेदमनुमानं क्रियते यत् शकुन्तला अस्य सुद्युम्नस्यैव पत्नी आसीत् । मान्धात्रा सह युद्धे सम्भवतः

---

१. महाभारत आदिपर्व ७९,२३ । २. वायुपुराण ८८,७८,११८ हरिवंशे १२, ७७ —१३,७५३ तक विष्णु पुराण ३,१३, १ भाग ५७ ५. ६ महा भारत १ ७, ६२५ ३. वायु पुराण ९९,१२९-१३१ । वि० पु० ४. १०. ३-७ । ४. नारीणां चिरवासो हि बांधवेषु न रोचते । कीर्ति चारित्र्यधर्मघ्नतस्मान्नयत् मा चिर । म० भा०पर्व ५. ७१२ । ५. अत्रापि वंशः वृक्षः क्रमांक २ दृष्टव्यः ।

६. तंसु सरस्वती पुत्रं मतिनारादजीजनत् ।
ईलिनं जनयामास कालिंग्यां तंसुरात्मजम् ॥
म० भा० आदि पर्व ९२ श्लोक २८—२९

ईलिनस्य सुद्युम्नस्य च निधनमभूत् । इदमपि सर्वथा शक्यं यत् तत्समये शकुन्तला गर्भवती आसीत् । आश्रयणार्थम् सः श्वसुरकण्वस्याश्रमे, गतवती । इत्थं शकुन्तलायाः वास्तविक जीवनवृत्त विषये सुस्पष्टप्रमाणाभावे 'इदमित्थं' इति वक्तुम् न शक्नुमः ।

(ग) अस्यामवस्थयां शकुन्तलादुष्यन्तयोः गान्धर्व-विवाहस्य वार्ता एकाविषमसमस्या भाति । सूक्ष्मविवेचनेन गान्धर्वविवाहविषये इदमनुमानमेव सम्भवति यत् तयोः सम्मेलनस्यावधिरल्पो (यतः मुनिः फलानयनाय वने गत आसीत्, शीघ्रमेव तस्यागमनं सम्भावितमासीत्) शकुन्तलायाश्चरित्रं मुनेः प्रभावं, आश्रमस्य निवासमर्यादादयः तथ्याः ईदृशा आसन्, यत्तत्रविवाहकार्यं, भरतोत्पत्तिश्च सर्वमसम्भवमासीत् । अनेन कारणेन तथा अग्रोक्तेन भरतसम्बद्ध प्रसंगेन चायं निष्कर्षः फलति यत् दुष्यन्तशकुन्तलयोः गन्धर्वविवाह एव नाऽभूत् ।

(च) दुष्यन्तभरतयोः पितापुत्रसम्बन्धविषयेपि एकं सन्दिग्धस्थलमिदमस्ति यत् ऐतरेयब्राह्मणस्य महाभिषेकप्रकरणे एवं शतपथब्राह्मणस्याश्वमेधप्रकरणे च केचन पुरातनाः वृत्तान्ताः उद्भूता वर्तन्ते । तेष्वेकस्मिन् स्थले भरतः 'दौष्यन्तिः' अपरे 'सौद्युम्नि'रिति कथितः ।[1] पुराणात् ब्राह्मणग्रन्थानां प्रमाणं बलवत्तरम्[2] । अतोऽत्रैव शकुन्तला सुद्युम्नपत्नी भरतस्य च सौद्युम्नि संज्ञापि रहस्यं सम्यक्तयावभासयति । दुष्यन्तेन साकं भरतार्थं पौरवराज्यस्योत्तराधिकार विषये कृतो यो वार्तालापोऽस्ति सोऽपि भ्रमोत्पादक एव । कस्या अपि परिचितायाः स्त्रियः कृते स्वपुत्रस्य राज्याधिकारदानविषये पतिनिकटे प्रतिज्ञास्मारणाय नास्ति आवश्यकता परम्परासाध्यत्वात् । एकः प्रश्नः समुल्लसत्यत्र यत् शतपथस्य स्थलमेकं विहायान्यत्र सर्वत्र प्राकृते, वैदिकेऽवैदिके च वाङ्मये भरतस्य दुष्यन्तपुत्रस्तथैवोल्लेखो वर्तते तत्कथमिति ?

---

१. भरतस्यैव दौष्यन्तेरग्निराचीगुणोचितः ।
यस्मिन्सहस्रं ब्राह्मण बद्वशो गा विभेजिरे ॥
अष्टासप्तति भरतो दौष्यन्तिर्यमुनामनु ।
गंगायां वृत्रघ्नेऽबध्नात्पञ्चशतं घ्यान ॥　　　ऐतरेय ब्राह्मण

२. अथ द्वितीयया । त्रयस्त्रिंशं शतं राजा अश्वान्बध्वायमेध्यान् । सौद्युम्निरत्यष्टादन्यानिमायावत्तरऽइति । शतपथ ब्राह्मण

२. श्रुतिस्मृतिपुराणानां विरोधो यत्र• दृश्यते । तत्र श्रौतृप्रमाणं तु तयोर्द्वैधे स्मृतिर्वरा । पाराशर

अत्रेदमवधेयम् प्रथमस्तु अयं यदासीत् सुद्युम्नः एकः अल्पजीवी, राज्यारोहणात्पूर्वमेवाहतः राजकुमारः । द्वितीयमिदं यत् आसीत् भरतः दुष्यन्तेन पुत्रवदेव अंगीकृतः, उत्तराधिकारं प्राप्तो राजकुमारः । अतो हेतोः लोकपरम्परानुसारेणैव भरतदुष्यन्तयोरुभयोः पितृपुत्रभावस्य चर्चा क्रमशः बद्धमूला प्रचुरप्रचारा समभवत् । मयोक्तं पूर्वं यत् हस्तिनापुरस्य निर्माणम् दुष्यन्तस्य सप्तमपुरुषान्तरजायमानेन महाराज्ञहस्तिनेन सम्पादितमासीत् । अतएव दुष्यन्तस्य काले तस्य नगरस्य नाम अपि नासीत् । अतः हस्तिनापुरस्य राजा कथमासीत् ? इत्यपि संशयस्थलम् । कालिदासकृत शाकुन्तलस्योपजीव्यसाहित्यस्यासंगतयः अवलोकिताः । इदानीं तेन कृता अपराऽसंगतयोऽपि ऊह्याः । कविना उभयथा कविस्वान्त्रस्योपयोगः कृतः । प्रथमस्तु महाभारतस्यमूलकथायां परिवर्तनं तथा नवीनानां कल्पनानामुद्भावना च कृता । मूलकथायाम् अनेनप्रकारेण परिवर्तनं विद्यते—

१—महाभारतमते भरतस्य जन्म तपोवने शाकुन्तलमतानुसारञ्च परित्यागानन्तरं काश्यपऋषेराश्रमेऽभूत् ।

२—महाभारते शकुन्तलायाः सः त्यागः ग्रहणञ्च एकस्मिन्नेव स्थाने किञ्चित् कालान्तरं सम्पन्नम् । किन्तु शाकुन्तले तु परित्यागः राज्यसभायां ग्रहणञ्चान्यत्रस्थलेऽभूत् ।

कालिदासस्य स्वकीयाः कल्पना निम्नांकिताः सन्ति--

१—दुर्वासस्य शापः तेन प्रभावेण अंगुलीयकस्य स्थानभ्रष्टता पुनः प्राप्तिश्च ।

२—शकुन्तलायाः सख्यः ।

३—त्यागानन्तरं मेनकया शकुन्तलाऽपहरणम् ।

४—इन्द्रस्य सहायतार्थं दुष्यन्तागमनं, प्रत्यावर्तनसमये हेमकूटपर्वते कश्यपशकुन्तलाभरतानां सम्मेलनम् ।

इमाः एव ता असंगतयः याः शाकुन्तले वस्तुतः विचारणीयाः । इदानीं विचारणीयमिदं सावधानमनसा यदेषु ऐतिहासिकेषु विरोधेषु कालिदासस्यापराधं अस्ति न वा ? अथवा अस्ति स 'निरंकुशः' इतिहासानभिज्ञो वा ? अत्र कालिदासं दोषरहितमिति मन्यमानानां जनानामयमभिप्रायो यत् ।

अतीतेष्वपि महामेधाविनो जनाः सर्वज्ञाः भवितुं न समर्थाः । नेदमावश्यकं यत् कविविशेष इतिहासज्ञोऽपि भवेत् । अथवा इतिहासज्ञैः कविर्भिर्तेदेव प्रसंगवशेनैव मानवाः

अन्यैरावश्यकैस्तत्वैः परिचिताः भवन्ति । किन्तु एतस्य परिचयस्य सर्वज्ञतायाः वा अभावे स्वाभाविकी एवं कलापक्षस्यावहेलना लोकव्यवाहरस्येति । सोऽस्मान् सूचयति यत् एतादृशी असंगतिवार्ता सर्वदैव क्षमायोग्या । नास्त्यत्र विस्मयस्थलम् यत् काव्यपक्षस्य गतिरेव विचित्रा समुल्लसति संसारेऽस्मिन् ।

पूर्ववर्णितान् शाश्वत तथ्यान् मनसि निधाय यदा शाकुन्तलमालोचयामो वयं तदा उपर्युक्ताः सर्वेभियोगाः आलोचनाविधानाभिज्ञानामालोचकानां निर्णयाः प्रतीयन्ते । कालिदासं निर्दोषभिति मन्यमानाः इदमपि कथयन्ति यत् यदा कविः प्रतिभाभ्यासेन वेद्यान्तरसंवेद्यावस्थायां स्थित्वा स ब्रह्मणः साक्षात्कारं करोति, तदाऽऽनन्दकणाः रसानन्दपरिपूर्णात् तस्य विमलमानसाद्बहिः समागच्छन्ति । ता एवानन्दकणाः वाग्रूपेण काव्यांगाधामकाः भवन्ति । काव्यतत्वज्ञाः जानन्तीदं तत्वं यत् काव्यं तु रसानन्दस्य सहजाभिव्यक्तिः । तत् कस्यचिदालोचकस्यैतिहासिकस्य विशेषज्ञस्य वा बुद्धिसाध्य प्रयत्नस्य परिणामो न भवति । किन्त्वत्र न युक्तं विस्मारयितुं यत् सिद्धकविः सर्वदा भद्रं पश्यति, मंगलस्यैव वार्तां करोति, आनन्दं कथयति चिन्तयति च निरन्तरम् । सर्वदैव तिष्ठति रचना केवलातन्निकटे । ध्वंसकार्यस्य ननु-नच शैलीलेशमपि न जानाति ।

अस्ति कालिदासस्य शाकुन्तलमपि सिद्धहृदयानन्दस्य सहजोन्मेषात्मकम् । अतः अनेन लोकानुरंजनमप्यावश्यकम् । तस्मादेव साधुसमालोचकदृष्ट्या निम्नोक्तानि तथ्यानि विचिन्त्य ते असंगतयः व्यर्था एवेति ।

१—यदि कालिदासेन ऐतिहासिक्यसंगतयः कृता तदा कोऽत्र तस्य दोषः ? भगवन्तं व्यासं श्रद्धापात्रमिति चिन्तयित्वा अन्यामैतिहासिकीं सामिग्रीं त्यक्त्वा महाभारतीयेनैव-साहाय्येन तेन स्वग्रन्थो निर्मितः । कविकर्मणः इतिहासलेखनस्य चोद्देशाः विभिन्नाः वर्तन्ते इदं सुविदितम् सर्वेषाम् ।

२—महाभारतस्य कथाविपरीतं यानि प्रमाणानि प्राप्यन्ते तेऽपि न सन्ति नितान्त-दृढा निर्भ्रान्ताश्च । यदि ते महाभारते अनैतिहासिकतां साधयन्ति तदा शाकुन्तलकारस्याऽत्र कः दोषः व्यासम्प्रति अनन्यश्रद्धां विहाय ?

३—स्वग्रन्थं हृदयग्राहिकतुं याः उद्भावना कविना कृताः ताः न सन्ति असंगतयः । यतः कविः सर्वदैव स्वातन्त्रस्यानुगामी भवति । अनेन शाश्वतेन तथ्येन न भवति लोकमर्यादायाः क्षतिरपि ।

अस्माकं मतानुसारं तु यदि गम्भीरमीमांसां वयं कुर्मः तदा अयमेव निष्कर्षः फलति यत् पूर्णेन सहानुभूतिपूर्वकेण विचारेणाऽपि कविः कालिदासः सर्वथा निर्दोषः न सिध्यति । कवेः स्वातन्त्र्यस्यापि यतः कापि सीमारेखा भवत्येव । अन्यथा कव्युन्मत्तयोः को भेदो भवेत् ?

अत्र यत्किंचिन्निवेदितम् तत्सर्वमेव जिज्ञासाप्रेरणया एव इति चिन्तनीयं तत्वज्ञैः । सम्यक्तरम् जानामि यत् विषयोऽपि अयम् अतीव गहनः । मादृशाल्पज्ञस्य कृते तु सर्वथा दुरारोहः, तथापि आशासे यत् जिज्ञासाधिकारः सर्वजनोचित इति स्वीकृतः अग्रजैः पण्डितैः इति तत्वं विचिन्त्य त्रुटिरस्माकीनाऽपि क्षमां लप्स्यतीति ।

[वंशवृक्ष क्रमांकः १]

१ मनु वैवस्वतः

२० मतिनारः

२९ सुहोत्रः

- हस्तिन (३०) (हस्तिनापुरनिर्माता)
  - ३१ अजमीढः
  - ३१ द्विजमीढः
  - पुरुमीढः
- ३० काशिकः (काशीराज्य संस्थापकः)
- ३० बृहत् (कान्यकुब्जराज्य-संस्थापकः)
  - जन्हुः ३१
  - अजकः ३२
  - बालकाश्यः ३३
  - वल्लभः ३४
  - कुशिकः ३५
  - गाधिः ३६
  - विश्वरथः (पश्चात् विश्वामित्रः ऋषिः)

[वंशवृक्ष सं० २]

१ मनु वैवस्वतः

(२०) मतिनारः

- तंसुः
  - ईलिनः
    - सुद्युम्नः
      - भरतः(शाकुन्तलः
    - दुष्यन्तः (तौर्वशमरुत्तेनदत्तकपुत्रः कृतः)
      - भरतः (शकुन्तलापुत्रः)
- अप्रतिरथः
  - कण्वः
    - काण्वमेधातिथि
    - शकुन्तला (पोषिता पुत्री)
- ध्रुवः
- पुत्रीगौरी

कोऽयमिन्द्रः ?

[कु० सुधा नागर एम० ए०, पी० एच० डी०, प्रथम वर्षम्]

दिग्दिगन्तरागताऽनेकनदीनां तदङ्गभूतानां नाना पदार्थानाञ्च संयोगे यथा नदीविशेषस्योद्गमकालीनाविमलासुसूक्ष्मा जलधारा बहुदेशकालाद्यतिक्रम्य भीमदर्शनत्वमप्रत्यभिज्ञेयत्वञ्च प्रयाति तथैवाऽखिलकथाऽख्यायिका वाङ्मयोऽपि। अमुमेव शाश्वतं नियमं विचिन्त्यैकदा आङ्लमहाविदुषा 'मैकडानल' महोदयेनोक्तं यत् "विश्वासविशेषोऽपि काव्यात्मकचित्रणेन सर्वदैव दुर्बोधतां, यदा कदा तु नामशेषताञ्च प्रयातीति।"

प्रायशो ऋग्वेदे चतुर्थांशव्यापिनः इन्द्रदेवस्य रूपं कथं परिवर्तितमभूदिति चरमकुतूहलं जनयति। यद्यपि इन्द्रोऽप्यनेकविषयेष्वितरदेववदेव तथापि सन्त्यनेकानि वैशिष्ट्यानि यैः स अन्येभ्यो देवेभ्यो अस्ति किञ्चित् विशिष्ट इति धारणा प्रादुर्भवति मनसि। इदं कथ्यते[1] यद्वरुणवन्नास्ति निष्क्रियः इन्द्रः, अपितु सततक्रियाशीलः। अनेनैव च कारणेन स विभिन्नदुर्बलतायुक्तोऽप्यस्ति। अतएव इन्द्रचरितप्रकाशकानां विभिन्नपक्षाणां समीक्षाकरणे धारणेयं सञ्जायते यदिन्द्रोऽपि दोषगुणयुक्तः कोऽप्येकः असाधारणपुरुषविशेष एवासीत्, नान्यः। किन्तु स्वगुणपक्षगौरवेण स आरुरोह क्रमशः जातीयनेतुः, लोकनायकस्य, देवस्य च पदवीम्। मानवैः स्वभावतः स्वकीयादर्शभूतः सर्वाङ्गसुन्दरः कल्प्यते, अतएवेन्द्रस्य पराक्रममनुभवद्भिः जनैः समये-समये सः स्वरुच्यनुकूलैः, विविधगुणैः, पदैश्च विभूषितः। तासु नानासु पदवीषु अस्त्येका "वृष्टिदेव" इत्यपि पदवी देवेन्द्रस्य। समीचीनत्वमस्याः पदव्याः परिलक्ष्यते खलु, यतो हि सर्वेऽपि देवाः तत्वतः विभिन्नप्रकृतितत्वानां प्रतिनिधिरूपेण तिष्ठन्ति स्व-स्वगुणवैशिष्ट्यात्।

मैकडोनल महोदयेन तु सर्वाः अपि वैदिक देवताः यशस्विनो मनुष्या एव

---

१. ग्रिज़वल्ड ऋग्वेद पृष्ठ २०१। एवं मैकडोनल वैं० मा० पृष्ठ ६५।

कथिताः[1] किन्तु इन्द्रदेवे मानवधर्माधिक्यात्तस्मिन्नार्ययोद्धृदर्शनं भवति।[2] यद्यपि महापराक्रमशालिनः इन्द्रस्य वीर्यं, दानमलौकिकैश्वर्यञ्चामानवीयं किन्तु प्रकृतिस्तस्य मानवीयैवास्ति। जातेनैव तेन पितृवधः कृतः, उषया साकं युद्धे तद्रथः चूर्णितः, सूर्याश्वाः निरुद्धाः, सूर्यरथचक्रहरणं कृतम्, मरुद्भिश्च सह युद्धः कृतः। सोमग्रहेऽपि महती दुर्बलता दृश्यतेऽस्य देवस्य। तदर्थं स चौर्यकर्मव्याप्तोऽपि लक्ष्यते। सोम प्रभावतः, "लव सूक्त" नाम्नि सूक्ते तेनात्यश्लाघाऽपि कृता, अधिकसोमपानेन कदाचित् सः रुग्णोऽपि सञ्जातः, सौत्रामणिकर्मणा देवैः स्वस्थताञ्चानीतः। यद्यपि केचन् जनाः तस्य स्त्रीसम्बन्धि दुर्बलतामस्वीकुर्वन्ति[3] किन्तु तस्य बहुस्त्रीसंबंधः बहुभिः कथितः।[4]

अन्यैरपि तथ्यैः देवत्वप्राप्तिपूर्वकमिन्द्रस्य नेतृत्वं दृश्यते। लक्ष्यते यथा विस्पष्टं ऋग्वेदे, तृतीयमण्डलान्तर्गतचतुस्त्रिंशत्तमसूक्तान्तर्गते षष्ठे मन्त्रे सायणाचार्यकृतं भाष्यम्—"इन्द्रः दस्यून् उपक्षपयितृ न् मायाभिः कपटैः संपिपेष" इति। कपटाचरणञ्च देवाचरणविरुद्धम्। बज्रबाहुः, महावीरश्च इन्द्रः भयाक्रान्तोऽपि भवन्नवलोक्यते, इदमप्याश्चर्यजनकम्।[5] इन्द्रस्य दानेषु या प्रतिदानस्य भावना प्राप्यते सा अन्येषां देवानां दानविरोधिनी एव प्रतीयते। यतः इन्द्रः स्वभक्तेभ्यः एव ददाति न अहविर्दातृभ्यः।[6] तुर्वशयदुसुश्रवससुदासादिभिः ऐतिहासिकपुरुषैः सहेन्द्रस्य सम्बन्धः तथा कीथमहोदयेन यौ कर्णजपर्णय नामानौ इन्द्रशत्रू उल्लेखितौ ताभ्यां सहेन्द्रविरोधः अपि नोपेक्षणीयः। इन्द्रं प्रतीदृशं सौख्यभावं प्राप्यते मन्त्रेषु यत् तं प्रत्युपालम्भनमपि दृश्यते।[7]

---

१. "मैकडोनल वैदिक माइथौलोजी" पृष्ट २ पंक्ति २०।

२. डाँडेकर, ए. ब.र्थ "दि रिलिजन औफ़ इण्डिया" पृष्ठ १३; ब्लूमफ़ील्ड "दि रिलिजन आफ़ वेदा" पृष्ठ १७४

३. मैकडोनल, वेबर, ओल्डन बर्ग एवं हिलेब्रेन्ड्ट

४. डांडेकर, कीथ एवं हौपकिन्स

५. ऋग्वेद १,३२.१४

६. २. १९. ४; ७. २७. ३; १०. ४२. ४

७. १. ८४. १७ स्कन्दस्वामिनः भाष्यम्—"एवमियमप्यागमनविलम्बनात् परिदेवनावोपालम्भो वा।"

एभिः तथ्यैः इन्द्रस्य सा अवस्था सूच्यते यदा सः मनुष्यश्रेष्ठः जातीयनेतासीत्।

नात्र कोऽपि वितर्कः, विविधयुक्तिप्रमाणपुरःसरं चैतदुपस्थापयितुं शक्यते यत् नासीदादित एव इन्द्रः प्राकृतिकशक्त्यधिष्ठातृरूपे परन्तु महदायासेनैवेन्द्रेण स्वबाहुबलार्जितं देवत्वं प्राप्तं पश्चाज्जनैरपि तस्येदं रूपं स्वीकृतम्। तस्य देवत्वे महानविश्वासः आसीत् दस्यूनां हृदये। यथोक्तम्—

"यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम्।"

(ऋ० वे० २. १२. ५)

तथा "क्वचिदसौ न तिष्ठतीति मन्यमानाः जनाः एनं इन्द्रं आहुः एषः इन्द्रः न अस्तीति।"[1]

इन्द्रमरुतद्वन्द्वसम्बन्धनेनापि देवत्वपदप्राप्तिपूर्वकमिन्द्रस्य नेतृत्वं सूच्यते। यतः मरुताः पूर्वं मनुष्याः एवासन् यैः पश्चाद्देवत्वमापन्नम्।[2]

शङ्का सञ्जायतेऽधुना यदिन्द्रः यदि युद्धवीरार्यसंस्कृतिप्रचारको जातीय नेता आसीत् येन क्रमशः देवत्वमापन्नं तर्हि तस्य द्वितीयः—वृष्टिदैवतपक्षः अस्पष्टत्वं प्रयास्यति। विदुषाञ्चायमभिप्रायः यत्तस्य वृष्टिदेवत्वरूपो मुख्यः, जातीयनेतृत्वरूपश्च गौणः।[3] किन्त्ववलोकयिष्यामो वयं यत् तत्वतः इन्द्रः सुवीर एवास्ति वृष्टिदेवत्वञ्च प्रक्षिप्तं खलु तस्योपरि। बार्थ नाम्ना लेखकेनापि इन्द्रस्य योद्धृत्वमेव मुख्य रूपेणाङ्गीकृतम्।[4] इन्द्रस्य वृष्टिदेव इति, जाति नायक इति, वृत्रघ्नश्च इति त्रीणि रूपाणि दृश्यन्ते। एषु त्रिरूपेषु अन्तिमं रूपं विवादग्रस्तम्। यास्काचार्यस्य, मैक्समूलर महाभागस्य च मते वृत्रः मेघोऽस्ति, यं भित्वा इन्द्रः जलं वर्षयति।

---

१. ८. १००. ३. सायणभाष्यं दृष्टव्यम्।

२. १. १२९. २. सायणभाष्यम् "यः खलु त्वं नृभिः मनुष्यैरेव सद्भिः पश्चाद्देवत्वमापन्नैर्मरुद्भिः।"

३. ब्लूमफ़ील्ड "दि रिलिजन ऑफ़ वेदा" पृष्ठ १७५
मैकडोनल "वैदिक माइथोलोजी" पृष्ठ ५४

४. ए० वार्थ "दि रिलिजन ऑफ़ इन्डिया" पृष्ट १२–१३

मैकडोनल महोदयेन वृत्रः अन्धकार इति मतः यं विहत्येन्द्रः उषा रूपेण प्रकाशं करोति तथा हिलेब्रैंड्ट महोदयमतानुसारेण स वृत्रं, हिमानीं प्रतिसाये निरुद्धाः नदीः प्रवाहयति । मान्यवरतिलकमते इन्द्रः सूर्यः अस्ति । अन्येषां मते इन्द्रवृत्र-युद्धेन चन्द्रग्रहणमभिप्रेतम् । अत्र प्रश्नः सञ्जायते, यदीन्द्रो ज्ञाति नायकः, तर्हि कोऽयं वृत्रः ? सर्वसम्मतमिदं यदिन्द्रस्य वृत्रस्य च कल्पना न केवलं भारतीया अपितु योरोपीया अस्ति । अतः इन्द्रवृत्रयुद्धं जलवृष्टेरालङ्कारिकवर्णनमेवास्ति, तयोः प्राणिनोस्तात्विकवर्णनं वा इति न सिद्ध्यति । पं० रमानाथ अवस्थी महा-भागेनोक्तं यत् वृत्रः असीरिया सीरियाशामदेशानां प्रसिद्धः दलपतिः आसीत् । आचार्यरामगोविन्दत्रिवेदिमहानुभावस्य कथनमस्ति—अवेस्ता ग्रन्थेन ज्ञायते यत् बेबीलोनेति नामकं नगरमार्यशून्यं कर्तुं वृत्रेण 'अद्विशूर' नाम्नी देव्युपासिता । पुनरपि स कथयति—प्राचीना कथास्ति यत् वृत्रेणार्यभूमिं जेतुं निश्चयः कृतः । केचित्तु कथयन्ति यत् वृत्रः दासनेता, सप्तसिन्धुभूभागस्याधिपतिः विष्णु-मित्रश्चासीत् ।[1]

अस्मिन् विषये डांडेकरमहाभागस्य मतमुल्लेखनीयम्[2] येनानेकैः प्रमाणैः प्रतिपादितं यत् मानवताविरोधिनीभावात्मिका कुशक्तिरेव क्रमशः वृत्ररूपतां प्राप्ता । अन्ततः वृत्रशब्दस्य प्रयोगः इन्द्रविरोधिनं महान्तं शत्रुं प्रति सीमितोऽभूत् ।

एभिर्मतैः स्पष्टं भवति यत् वृत्रेण सहेन्द्रस्य सम्बन्धः अपरिहार्यः । यदा इन्द्रेण देवत्वं लब्धं तदा प्रकृतेः विशेषपक्षेण सह तस्य सम्बन्धः आवश्यकोऽभूत् । इन्द्रस्य निकटतमः स्वभावः अर्थात् कार्यं वृष्टिरेव । अत्र डांडेकराचार्याणामिद-मस्ति मतम् यदिन्द्रकृत्यानामतिशयोक्तिपूर्णवर्णनेषु महद्युद्धानां कल्पना उचितैव । युद्धेषु च झंझावातवर्षाविद्युदादि प्रकोपानां वर्णनमपि स्वाभाविकम् । इन्द्रस्य, अनेन प्रकारेण, वृष्ट्यादिभिः सह सम्बन्धेनैव सः वृष्टिदेवो मतः ।[3] अपरञ्च विद्युत्वद्गर्जनकारीवज्रायुधसम्बन्धेनाऽपि वृष्टिविद्युदादिभिः सहेन्द्रस्य सम्बन्धः उपयुक्तः खलु ।

---

१. अहो धर्मिष्ठता तात वृत्रस्यामिततेजसः ।
अस्य विज्ञानमतुलं विष्णोर्भक्तिश्च तादृशी ॥

२, ३. "जर्नल औफ़ पूना इंस्टीट्यूट" पत्रिकायां डांडेकराचार्यस्य लेखः ।

इन्द्रवृष्टि सम्बन्धः अपरमपि प्रश्नमेकं जनयति—केन कारणेन वृष्ट्या सह 'इन्द्रत्रित पर्जन्य' इति देवत्रयाणां सम्बन्धः ? इन्द्रस्य वृष्ट्या सह घनिष्ठं सम्बन्धं पश्यन्नपि न विश्वसितुं शक्नुमः यतो इन्द्रस्य वृष्ट्या सह विशिष्टः सम्बन्धः अन्ययोश्च द्वयोः गौणः। उदाहरणैः इन्द्रस्यान्यदेवेभ्यः अनुवर्तनं सिद्धम्।[1] पुनः इन्द्रसदृशप्रमुखदेवस्य प्रष्टिसम्बन्धभावे इतरदेवयोः वर्षण सम्बन्धः व्यर्थः। अतो न निमूलेयं धारणा यत् इन्द्रेण देवत्वे प्राप्ते, इन्द्रवृष्टि सम्बन्धे च सम्पादिते सति लोकसम्मान्येन, वरुणगौरवदमनकर्त्रा चेन्द्रेणेतरदेवयोः प्रभावो मलिनी कृतः अस्मिन्नपि क्षेत्रे। तत्पश्चात् देवाधिदेवस्यामितप्रभावस्य स्तुतिः विविधप्रकारैः कृता। ऋषिभिः इन्द्रस्य दर्शनं क्वचित्तु सूर्यरूपेण, क्वचित् वृष्टिदेवरूपेण, क्वचित् महद्योद्धरूपेण, क्वचिच्च कालपुरुष रूपेण कृतम्। इन्द्रस्य वृत्रविजयेनाभिभूतैः आर्यैः इन्द्रेण सह वृत्रस्यापि कल्पना कृता। अतएव सर्वत्र वृत्रः इन्द्रस्य तत्तद्रूपविरोधिशक्तिरूपेण यथा अन्धकारहिमानीमेधासुररूपैः चित्रितः।

वृष्टिदेव पदवीप्राप्त्यनन्तरमिन्द्रेण सहैव तस्यानुचराणां मरुतामपि रूपपरिवर्तनं जातम्। इन्द्रस्तोतृणां कल्पनानुसारेणैव मरुद्गणः वृष्टिकार्यसहायकरूपतां "मरुद्वायुदेवा" इति धारणाञ्चारुरोह वर्षणवायुसम्बन्ध दर्शनात्। ऋग्वेदेऽदृश्योऽयं मरुतां वायुदेवेन सह सम्बन्धः यः मरुत्झंझावात सम्बन्धभावे अनिवार्यः।

इत्थं महद्योद्धृरूपेण वर्णितस्येन्द्रस्य देवपदप्राप्तिकृते आसीत् तात्कालिकी-राजनीतिकी अवस्थाऽपि कारणरूपेण। यावत्कालपर्यन्त जीवनप्रवाहे नासीत् कापि बाधा, तावत् सरलनिश्छलजीवने नैतिकराज्याधिपतिवरुणस्यासीदाधिपत्यम्, किन्त्वार्याणां भारतप्रवेशकाले सिन्धुसमीपे दस्युभिः सह तेषां संघर्षे, अद्यावधि गौणत्वेन स्थितस्य युद्धप्रवीणस्येन्द्रस्य स्थानं मुख्यतामभजत्।[2] भारतप्रवेशानन्तरमपि स्वस्थितिसुदृढतायै इतरजातिभिः सह युद्धानि, आर्येष्वपि च परस्पर मतभेदकारणादनेके संघर्षाः अभवन्। अतः आर्याणां ज्योतिदायकनेतुः प्रभावस्य वृद्धिः स्वाभाविकी एवासीत्। फलतः लोकप्रियेणेन्द्रेण क्रमशः देवाधिपतिपदं प्राप्तम्। एतदनन्तरं नाऽसीदकरणीयं किमप्येन्द्रस्य कृते मानवबुद्धिसमीपे।

---

१. तै० ब्रा० २–२–३३, २–२–७२ तै० सं० २–३४–२

२. देशमुख "रिलीजन इन वैदिक लिटरेचर"

बलवतः तस्य सम्मुखे "द्यावापृथिव्यौ" अपि वेपेते। वरुणादयः देवाः तं नमस्कुर्वन्ति। तेन कम्पमाना पृथिवी स्थिरीकृता, चलाः पर्वताः निश्चलतां प्रापिताः, अन्तरिक्षं निर्मितं, सूर्यस्य उषायाश्चोत्पत्तिः कृता, शम्बरस्य नवनवति-संख्याक पुराणि नाशितानि अहेश्च वधः कृतः। किं बहुना, इन्द्रस्य परिवृंहितस्य तेजसः कृते इदमखिलं भुवनमपि नासीत् पर्याप्तम्।

अस्मिन्काले स्वपरमप्रियदेवस्यादर्शरूपदर्शनबुद्ध्या ऋषिभिः तथाविध एवादर्शदेव रूपे तस्य प्रतिष्ठा कृता। फलतः स्वभावतः युद्धवीरः शत्रुहन्ता चेन्द्रः 'शत्रुशून्यः" "अजातशत्रुः" इति विविधविशेषणैः विभूषितो जातः।[1] स्वगौरवस्या-मवस्थायामिन्द्रः साधारणजनेभ्यः भिन्नः प्रदर्शितः। "तस्य जन्म अलौकिकमस्ति" इति कथनमूलेऽपि सैव धारणा वर्तते यथा प्रायशो महापुरुषाणां जन्मामानवीयं मन्यते।[2] अनन्तरं सः गोः जातः, द्यूत्पन्नः वा कथितः। पुरुषसूक्ते सः अग्निना सह पुरुषमुखाज्जातः मतः। किन्तुतत्वतस्त्वस्य माता सम्भवतः कापि कुमारी कन्या-ऽसीत्[3]। फलतः लोकापवादभयात् गुप्तरूपेणैव गह्वररूप सूतिकागृहे इन्द्रस्योत्पत्ति-रभूत्[4] तथा देवैः शिशोः पितरेण चास्य तिरस्कारः कृतः[5]। कदाचित् प्रतिशोध-भावनावशात् देवेन्द्रेण पितृवधं कृतम्। महावीरमरुतां साहाय्यं लब्ध्वा अनेने-न्द्रेण दास जयः कृतः तेषां पुरीश्च भित्वा 'पुरन्दर' इति पदवी प्राप्ता। यदु सुदा-सतुर्वशादीनां सहायकेनेन्द्रेण वृत्रवधकर्मणा जीवनस्य महत् कर्म कृतं, देवत्व-पदलाभश्च कृतः वज्रेण वृत्रवधानन्तरम्।

कथं देवत्वपदप्राप्त्यै इन्द्रेण तादृशः महदुद्योगः कृत इति ? अत्र ज्ञातव्य-मस्ति यत्तस्मिन् काले आसीत् यज्ञस्यामितो महिमा यतः यज्ञैः प्रकृतिविधान

---

१. १. १२०. ८; ४. २०. ७ ८. २१. १३ एवं १. १२९. ४ सायणभाष्यम्-"शत्रुभावं न कोऽप्याचरन्ति अजातशत्रुत्वात्।"

२. कीथ "दि रिलिजन एण्ड फ़िलौसफ़ी औफ़ वेदाज़ ऐन्ड उपनिषद्स" पृष्ठ १२५

३. ३. ४८. १ सद्यो ह जातः वृषभः कनीनः।

४. ४. १८. ५ गुहाकरिन्द्रं माता वीर्येणापृष्टं।

५ ४. १८. ११ अमीत्वा जहति पुत्र देवाः।

विपर्यासोऽपि शक्यः । अनेकयज्ञकरणेनैवासील्लोके सम्मान वृद्धि सम्भवा। यज्ञभागस्याधिकारिणः देवाः एवासन् । अनेनैव कारणेनेन्द्रेणाऽप्यनेकयज्ञानां विधानं सम्पादयित्वा 'शतक्रतु' पदवीं लब्ध्वा आत्ममहिम्नः वृद्धिः कृता। अन्ततः देवेन्द्रपदारोहणञ्च कृतम् ।

कालान्तरे इन्द्रस्यायं वास्तविकं रूपमन्येन रूपेण तिरोहितमभूत्, शनैः शनैश्चायमाक्षिप्तं रूपं गाढ़ात्गाढ़तरं भवत् अन्ततः दुर्भेदं सञ्जातम् । फलतः इदानीमस्मत्सकाशे इन्द्रः विशुद्धदेवरूपेणैव तिष्ठति ; "आसीत् मानवः सः" इति तथ्यमिदानीमस्मत्बुद्धिपथमपि नाऽरोहति ।



कर्तव्या चार्थसारेऽपि काव्ये शब्दविचित्रता

[विशाल प्रसाद त्रिपाठी एम० ए०]

अलंकारस्य शब्दालङ्कारोऽर्थालङ्कारश्चेति द्वौ विभागौ कृतौ । तत्र अर्थस्यैव सारभूतत्वं सर्वैः स्वीक्रियते । परम् अर्थस्य सारभूतत्वमङ्गीकृतमपि न शब्दस्य वैचित्र्यं सर्वथा परिहार्यम् । अतएव प्रोक्तम् 'कर्तव्या चार्थसारेऽपि काव्ये शब्दविचित्रता' इति ।

अनुप्रासस्यात्यन्तनिर्वहणेन तु सहृदयाः न हि रसचर्वणं प्रति अपि तु वर्णसंवादं प्रति उन्मुखी भवन्ति । यमकचित्रालंकृत्योः बन्धौ तु शृंगाररसे परिहार्यावेव । काव्ये शब्दालङ्कारबन्धः अर्थालंकारबन्ध इव रसाविष्टेन कविना निरायासेनैव निर्वर्त्य इति ध्वनिविदां राद्धान्तः सुप्रथित एव । भामहात् पूर्वं केचिदाचार्याः रूपकादिप्रमुखानामर्थालङ्काराणां प्राधान्यं प्रोचुरपरे च तेषां बाह्यतामाचक्षीरन् परं भामहरुभयोः द्वयोरिष्टतामतनोत् । तथा हि--

"रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनिताननम् ॥
रूपकादिमलङ्कारं बाह्यमाचक्षते परे ।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलंकृतिम् ॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालंकारभेदादिष्टं द्वयन्तु नः ॥" इति

एतद्धि अभिमतं दृढमनुक्तं उद्योतटीकाकारेण--

"अलङ्कृतशब्दव्यंग्यस्यास्वादस्य विभावाद्यप्राप्तौ शृंगारादिविशेषानाश्रयत्वेनाऽकिञ्चित्करत्वादलङ्कृतार्थोपजीव्यत्वाच्छब्दानामप्यावश्यकत्वेन द्वयोरप्यास्वादोपकारकत्वाद् कविसंरम्भगोचरत्वाच्चोपादेयता तत्र यो यदन्वयव्यतिरेकानुविधायी स तेन व्यपदिश्यते इति भावः ।"

अलङ्कारसर्वस्वकारेण रुय्यकेन अलङ्कारविभागवचनप्रसङ्गे, 'अर्थापेक्षया शब्दस्य प्रतीतावन्तरङ्गत्वेऽपि प्रथममर्थगतधर्मनिर्देशश्चिरन्तनप्रसिद्धया" इत्यनेन शब्दस्यैव प्राधान्य-

मुक्तम् । "शब्दप्रतीतिपुरस्सरीकारेणार्थप्रतीतिरिति प्रथमं शब्दगत एव धर्मनिर्देशो न्याय्यः" इति जयरथस्यालङ्कारसर्वस्वटीकाकारस्यापि अभिमतम् ।

अधुना तु दृष्टव्यं शब्दचित्रकौतुकम् । सन्ति बहूनि कविरत्नानि संस्कृतसाहित्यार्णवे येषां शब्दचित्रकौतुके अर्थस्यापि रमणीयत्वं सर्वथा न परिलुप्यते । परम् अपरे ये शब्दचित्र-कौतुकव्यवसायिनः तेषां काव्ये शब्दविलासमात्र एव प्राधान्येन दृश्यते । यत्तु 'वागर्थयोः संपृक्तत्वं' तद्धि प्रतिभाजुषां महाकवीनामेव संभवति । परमेतादृशाः महाकवयः नाधिकाः जगत्यस्मिन् । आचार्यानन्दवर्धनेन तु द्वित्राः पञ्चषा एव महाकवयः निर्दिष्टाः, "अस्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा च महाकवय इति गण्यन्ते" अधोलिखिते पद्ये केनापि प्रकृति वर्णननिपुणेन कविना प्रत्यूषचारु-वाधायकस्य चन्द्रोदयस्य चित्रमुपस्थाप्यते--

"प्रथममरुणच्छायस्तावत्ततः कनकप्रभः
तदनु विरहोत्ताम्यत्तन्वी कपोलतलद्युतिः ।
उदयति ततो ध्वान्तध्वंशक्षमः क्षणदामुखे
सरसविसिनी कन्दच्छेदच्छविर्मृगलाञ्छनः ।"

अत्र यद्यपि क्रमेण चन्द्रोदयवर्णने स्वभावोक्तेरपि चारुत्वं परिलक्ष्यते परम् तन्न तथा कवेः विवक्षितं यथा व्यञ्जनानां सौष्ठवेन अनुप्रासालंकृतेः चमत्कृतिः । राजानक रुय्यकेन तु निजालंकारसर्वस्वे शब्दालंकारनिरूपणे अनेकानि निदर्शनानि समुद्धृतानि यत्र शब्दचित्ररमणीयत्वं रामणीयकमावहति । यथा वृत्यनुप्रासस्य—

"सह्याः पन्नगफूत्कृतानलशिखा नाराचपाल्योऽपि वा
राकेन्दोः किरणा विषद्रवमुचो वर्षासु वा वायवः ।
न त्वेताः सरलाः सितासितरुचः साचीकृताः लालसाः
साकूताः समदाः कुरङ्गकदृशां मानानुविद्धा दृशः ।"

परुषा कोमलोपनागरिकाख्याभिः वृत्तिभिः उपलक्षितोऽलङ्कारः वृत्यनुप्रास उच्यते । वृत्तिस्तु वर्णरचना । अस्मिन् पद्ये ते पकाराद्यावृत्या उपनागरिकात्मकस्य वृत्यनुप्रासस्य स्फुटच्चित्रं समुपस्थापितं कविना । यथा च—

"निरर्गलाविनिर्गलद्गुलगुला करालैर्गलैरमी
ताडति ताडितोड्डुमरडिण्डमौड्डामरः ।

मदाचमन चण्डचुरप्रचुरश्चरिकोच्चया :
पणः परिणतिक्षणक्षततटान्तरा दन्तिनः ।।"

विमर्शिनीकारेण जयरथेनोद्धृतेऽस्मिन् पद्ये मध्यमवृत्या वृत्यनुप्रासं स्फुटतरं चित्रितम् ।

न केवलं अलंकारग्रंथेषु अनुप्रासस्य शोभा दर्शनीया प्रत्युत् महाकाव्येष्वपि अनेकानि एतादृशानि शब्दचित्राणि प्राप्यन्ते अस्माभिः । महाकविना माघेन 'प्रहर्तु रेवोरगराजरज्जवो' प्रभृतिषु वृत्यनुप्रासस्य रम्यं चित्रं समुपस्थापितम् । 'नैषधे पदलालित्यम्' इत्यनेन विद्वद्वरैः नैषधं प्रशंसितम् । कविकुलशिरोमणेः श्रीहर्षस्यानुप्रासचमत्कृत्युत्कृष्टता न कस्यापि विचिकित्साविषया । नैषधीयचरिते स्वल्पान्येव तानि पद्यानि यानि पदलालित्यरहितानि । श्रीहर्षस्य कविताकामिनी यथा लावण्यवती तथैव वीररसयुक्तापि । अतएव श्रीहर्षस्य काव्यं यथा शृंगारोपयुक्तं पदलालित्यपदावलीयुक्तं तथैव वीररसोचितोर्जस्विपदयुक्तमपि । तथा हि—

"तत्रावनीन्द्रचमचन्दनचन्दनचन्द्रलेपनेपथ्यगन्धवहगन्धवहप्रवाहम्
आलीभिरापतदनङ्गशरानुसारी संरुध्य सौरभमगाहत भृङ्गवर्गः ।।११·५

अत्र हि कविना वृत्यनुप्रासपूर्वकं चञ्चरीकैः स्वयम्बरायागतानां भूनृतानां अङ्गरागादीनां सौरभपानं उपन्यस्तम् । यथा च—

"प्रिया ह्रियालम्ब्य विलम्बमाविला विलासिनः कुण्डनमण्डनायितम् ।
समाजमाजग्मुरधो रथोत्तमास्तमासमुद्रादपरेऽपरे नृपाः ।।"११·१

अत्र क्रमेण छेकानुप्रासेन वृत्यनुप्रासेन च विभिन्नदेशादागतानां भूपतीनां 'प्रियाह्रियालम्बमा-विलत्वं' विलसितत्वं च वर्णिते । अन्येषामपि जयदेवजगन्नाथ प्रभृतीनां पदलालित्येन काव्यरसिकाः परिचिता एव ।

कविताकामिनी कौतुकानन्तरं गद्यगरिम्णः प्रदर्शनमुचितमेव संस्कृतगद्यसाहित्यप्रवाहे सुबन्धुदण्डिबाणमहाभागानां महिमानं को न जानाति । तत्राद्यस्य 'वासवदत्ता' तु एतस्य प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्धनिधि' रूपिण्याः श्लिष्टपदयोजनाचतुरायाः बुद्धेः प्रयासम् । स हि कविः न बाणेन सदृशः ससंगीतभाषाप्रयोगचतुरः न च दण्डिना सदृशः

लोकजीवनचित्रणक्षम अपितु सरल वृत्त्या सरलभाषया च कथावर्णनचतुरः । सानुप्रास-निर्बन्धस्तु अत्र प्रकृतिचित्रनियोजने दृष्टव्यम्—

"कन्दर्पकेलिसम्पल्लम्पटलाटीललाटतटतुलितालकधम्मिल्लबकुलकुसुमपरिमलमेलन-समृद्धमधुरितगुणः, कामकलाकलापकुशलचारुकर्णाटसुन्दरीस्तनकलशघुसृणधूलिपटलपरि-मलामोदवाही, रणरणकरसितापरान्तकान्तकुन्तललोलनसंक्रान्तपरिमलमिलितालिमाला-मधुरधरझंकार रवमुखरितनभः स्थलः" इत्यादि

"दण्डिनः पदलालित्यमित्यनेन महाकवेः दण्डिनः ललितपदनिबन्धनं सुप्रतीतमेव विद्वज्जनानाम् । तथा हि दशकुमारचरितपूर्वपीठिकोपक्रमे—

"तत्र वीरभटपटलोत्तरङ्गतुरङ्गकुञ्जरमकरभीषणं सकलरिपुगणकटकजलनिधिमथन-मन्दरायमाणगीर्वाणतरुणगणिकागणजेगीयमानयतिमानयाशरदिन्दुकुन्दघनसारनीहारमृणाल-मराल सुरगजवीरक्षीरगिरिशादृहास..............राजहंसो नाम घनदर्पकन्दर्पसौन्दर्यसोदर्य हृद्यनिरवद्यरूपो भूपो बभूव ।"

इत्यनेन नायकनृपतेः प्रतापः सौन्दर्यविलासश्चाख्यातौ । यादृशी यावती च प्रतिभा बाणमहाभागानां तादृशी तावती च प्रतिभा न कस्यचिदन्यस्येति कोऽनङ्गीकर्तुं शक्यते । तेषां महाभागानां ललितपदसंयोजनं कस्य हृदयं नावर्जयति । सूर्योदयास्तवर्णनं चन्द्रोदयादि वर्णनं चास्य महाकवितूलिकायोगेन अनुपमचारुत्वं प्रस्फुटयति । इदं प्रत्यूषचित्रं महाकवेः प्रकृतिचित्रस्यानुपमेयत्वं वदति ।

"क्वापि विहृत्य दिवसावसाने लोहिततारका तपोवनधेनुरिव कपिला परिवर्त्त-माना सन्ध्या तपोवनैरदृश्यत् । अचिरप्रोषितं सवितरि शोकविधुराकमलमुकुल कमण्डलु-धारिणी हंसपतिदुकूलपरिधाना मृणालधवल यज्ञोपवीतिनी मधुकरमण्डलाक्षवलयमुद्वहन्ती कमलिनी दिनपतिसमागमव्रतमिवाचरति ।"

इत्यादौ न केवलं पदलालित्यजन्यमाधुर्यमपितु प्रत्येकस्य पदस्यौचित्यमपि दृष्ट-व्यम् । प्रत्येकेन पदेन तपोवनस्य तपोधनानां च शोभाया औचित्यसंयोजनमेव कवेः विव-क्षितम् । यथा च 'हर्षचरिते'—

"तटलताकुसुमधूलिधूसरित, सिद्धपुरन्ध्रिधम्मिल्लमल्लिकागन्धग्राहिणि सायंतने तनीयसि निशानिःश्वासनिभे नभस्वति ।" इत्यादौ औचित्यपुरस्सरेण सिद्धपुरपुरन्ध्रिचित्रं महाकवेः प्रतिभायाः वर्णनाचातुर्य्यस्य च निदर्शनम् ।

महाकवेः श्रीहर्षस्य महाकाव्यं तु, चित्रकाव्यस्यानुमेयः ग्रन्थः। तस्य हि कृतिः 'परिरम्भक्रीडाचतुरा' इति सः स्वयमेव स्वीकरोति। यादृशी श्लिष्टपदयोजना महाकविहर्षस्य, न तादृशी अन्यत्र सुलभा। यथा हि त्रयोदशे सर्गे सरस्वत्याः वर्णने—

"लेखा नितम्बिनि, बलादि समृद्धराज्य प्राज्योपभोगपिशुनारधते सरागम्।"
एतस्य पाणिचरणं तदनेन पत्या सार्धं शचीव हरिणमुदमुद्वहस्व॥"

अत्र 'बलादिसमृद्ध.......' इत्यादिना श्लिष्टपदावल्या महेन्द्रस्य नलस्य च प्रतीतिः कस्य चित्तं नाह्लादयति। महाकवेः यमकचित्राणि रम्यतराणि। नलस्य विलासकानने हंसेन रसालफलदर्शनं कीदृशं चित्रितं महाकविना—

"अवलम्ब्य दिदृक्षयाम्बरे क्षणमाश्चर्यरसालसे गतम्।
स विलासवनेऽवनीभृतः फलमैच्छिष्ट रसालसेगलम्॥

अत्र 'रसाल' इति पदेन असंदष्टरूपकेण समुपस्थापितं चित्रं कस्य हृदयावर्जनं न करोति?

शब्दचित्रे तु वक्रोक्त्यलङ्कारस्य प्राधान्यं सर्वैरेव काव्यरसिकैः ज्ञायते। चिरन्तनालंकारकैस्तु वक्रोक्तिरेव अलंकाराणां निगूणं रहस्यमिति मन्यते। यथाह भामहाचार्यः—

सैषा सर्वैव वक्रोक्तिरनयाऽर्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽमया विना।" काव्या० २८५
कुन्तकेन त्वसौऽलंकारः काव्यसर्वस्वमिति स्वीकृतम्।
शब्दार्थौ सदृशौ वक्र कविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्वदाह्लादकारिणि॥ वक्रो० १-७

वैदग्ध्यभङ्गीभणितिरेव वक्रोक्तिः। परमत्र भङ्ग्या एव न प्रधानत्वम् अपितु शब्दार्थस्य व्यापारविशेषस्य। तत्र या काचित् वक्रता सा तु काव्यार्थस्य सहकारिणी एव। मम्मटामार्यस्तु अस्मिन्नलंकृतौ उक्तिवक्रतायाच एव चारुत्वं उररीकरोति न काव्यात्मत्वम्। भवतु नाम। अस्माकं तु इदमेवाभिधेयं यत् वस्तुस्तु अस्मिन् ह्यलंकारे काव्यरसिकाः शब्दवैचित्र्य चमत्कृतिमनुभवन्ति। तथा हि—

'नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो
वामानां प्रियमादधाति हितकृन्नैवा बलानां भवान्।

युक्तं किं हितकर्तनं ननु बलाभाव प्रसिद्धात्मनः
सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधातुं कुतः ।।

अत्र वक्तृश्रोत्रोः मध्ये प्रश्नोत्तरेण श्लेषवक्रोक्तेः चमत्कृतिं चित्रितम् केनापि कविना ।

एतान् पद्यानुद्धृत्य यत् शब्दवैचित्र्यस्य महिमा समुपस्थापितः तेन न कदापि इदमवधेयं यत् शब्दवैचित्र्यप्रसंगे अर्थः सर्वथैव परिलुप्यते । अर्थस्तु सततमेव तिष्ठति ; प्राधान्येन, गौणतया वा । अस्माकं प्राचीनालंकारकैरपि शब्दार्थयुगलस्य सामञ्जस्यं उररीकृतम् । तथा हि भामहाचार्यः--

"तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालंकार भेदादिष्टं इयं तु नः ।।"

"शब्दार्थौ सहितौ वक्रव्यापारशालिनि" इति वक्रोक्तिजीवितकारस्याभिमतम् । एतावता शब्दार्थयोः नित्यः शब्दार्थसम्बन्ध इत्यत्र न काचित् विचिकित्सा । 'नित्यः शब्दार्थसम्बन्धः' इति मीमाँसकानामपि डिण्डिमघोषः । इतिकृत्वा—

'शब्दजातमशेषं तु धत्ते शर्वस्य वल्लभा ।
अर्थस्य यदखिलं धत्ते मुग्धेन्दुशेखरः ।।'

इत्यनेन वायुपुराणवचनेन शब्दार्थयोः सम्बन्धस्तु स्वीकर्तव्य एव ।

शाङ्कराद्वैतवेदान्ते मायास्वरूपम्

[गोविन्द प्रसाद शर्मा]

ननु केयं माया ? समस्तस्यास्य जगतः सृष्टि-स्थिति-पालनकर्त्री-ब्राह्मी-माहेश्वरी-वैष्णवी-शब्दाभिधेया भगवती जगज्जननी वा, स्पन्दनक्रिया सम्पादिकाद्या महाशक्तिर्वा, भ्रान्तिर्वा, अजाव्यक्तप्रधानादि पर्यायान्तरा प्रकृतिर्वा, सा च सती वा, असती वा भिन्ना वा, अभिन्ना वा, साङ्गा वा अनङ्गा वा, उभयधर्मा वा निधर्मा वा स्वतन्त्रा वा परतन्त्रा वा, अर्थवती वा अनर्थवती वा, नित्या वा अनित्या वा सादिर्वा अनादिर्वा सान्ता वा अनन्ता वा सगुणा वा निर्गुणा वा किं लक्षणा किं स्वरूपाः कियत्प्रकारा वेति जायन्त एव विविधा विकल्पा मायातत्त्वे समुपस्थापिते समेषां शेमुषीमतां पुरतः। अतस्तत्र प्रस्तूयते विचारः। अघटितघटनापटीयसी विश्वविमोहिनीयं माया न पिशाची किन्तु तच्छदृशकार्यकलाप कलन-कुशलतया भवति तथा पदव्यवहारो विदुषाम्। तथाहि—यथा पिशाची यं कमपि पुरुषविशेषमाविश्य तदीयां ज्ञानशक्तिमावृत्य कर्तव्याकर्तव्यविमूढं विधायाकर्तव्येषु कर्मकलापेषु प्रेरयति तथैवानादि निधना विपर्ययोपादानभूता विक्षेपशक्तिप्रधानानिर्वचनीयेयं माया स्वकीयावरणविक्षेप शक्तिद्वय सहकारेण पुरुषं विमोह्यातस्मिंस्तद्बुद्धिं समुत्पादयति। अन्योऽन्यस्मिन् परस्परधर्मानध्यस्य परस्परनिरूढविभिन्नधर्मानाच्छाद्य तमःप्रकाशवदत्यन्तविरुद्धस्वभावयोर्धर्मधर्मिणोरपीतरेतराविवेकं संपाद्य तमो दोषेण मालायांरज्जौ वा सर्पप्रतीतिमिव, कफवातपित्तदोषेण स्वगृहे निर्विशङ्कं स्वापमुपगतेऽपि पुरुषे नानाविधस्वाप्निकानर्थ परम्परा प्रतीतिरिव, मलीमसेषु जलमुकुरादिषु प्रतिबिम्बितं स्वकीयं प्रतिबिम्बं विलोक्य मलीनं मे मुखमिति प्रतिबिम्बविभ्रममिव, स्वच्छधवले स्फटिकमणौ लाक्षारसावसेकतिरस्कृत धवलिम्नि लाक्षारसगुणारोपेणारुणोऽयं स्फटिकमणिरिति प्रतीतिमिव, ग्रीष्मोष्मसन्तप्तमरुषु सूर्यमरीचिचयं विलोक्योच्चावचमुच्चलत्तुङ्गतरङ्गभङ्गमालेयमभ्यर्णमवतीर्णा मन्दाकिनीति मृगतृष्णा प्रतीतिमिव, प्रधावति धूमशकटे व्योमयाने वा तदारुह्य विलोकयतां शैलगण्डशैलतरुगुल्मलतादीनाञ्च स्थावराणां प्रधावनप्रतीतिमिव, वा नित्यशुद्धबुद्धमुक्तस्वभावे

सर्वज्ञे सर्वशक्तिसमन्विते ब्रह्मणि पुत्रकलत्रादि बाह्यधर्मानध्यस्य विकलेषु सकलेषु वा तेष्वहमेव विकलोऽहमेव सकलो वेत्यादिप्रतीतिं, देहस्य स्थूलत्व-कृशत्व-गौरत्व-स्थान-गमन-लङ्घनादि धर्मानारोप्य स्थूलोऽहं, कृशोऽहं गौरोऽहं, इत्यादिप्रतीतिं, तथान्तःकरणस्य काम-संकल्प-विचिकित्साध्यवसायादीन् धर्मान् साक्षिण्यारोप्याहं कामये, अहं संकल्पयामि, अहं विचिकित्सामि, अहमध्यवसायं करोमीत्यादि प्रतीतिं जनयति। अन्तः करणादौ सोऽयमहमिति प्रत्ययिनश्चा-शेषस्वप्रचारसाक्षिणि प्रत्यगात्मनि, प्रत्यगात्मानञ्चान्तःकरणादिषु परस्परमारोप्या-ध्यात्मिकाधिभौतिकाधिदैविकाभिधविविधदुःखजालजटिलापरंपारसंसारपारावारे पातयति नाटयति च यथेच्छं वृथैव। इत्थं प्रवर्तमानाया अनादिनिधनायाः स्वाभाविकाया मिथ्याज्ञानरूपायाः सकल कर्तृत्व भोक्तृत्वादिप्रवर्तिकाया सर्वलोक-प्रत्यक्षाया मायाया एव नामान्तरमविद्याध्यासाकाशाजाव्यक्तादिकम्। सैवाशनाया-पिपासादि रहिते प्रत्यगात्मनि तादृशधर्मोपेतस्यान्तः करणादेः अहितारोपेण दुःखरहितमपि प्रत्यगात्मानं निरतिशयं दुःखाकरोतीति हेतोरियमविद्यापर-पर्याया माया सर्वानर्थबीजमिति श्रुतिस्मृतीतिहासपुराणागमादिषु शास्त्रेषु प्रसिद्धाऽस्ति।

अतएव चाहुः केचनाचार्यपादाः—

परपुरुष परायणा सदैव प्रकटित नित्य निरावृत स्वरूपा।
गहनतरुवनेषु सञ्चरन्ती हरति मनः कुलटेव दण्डिविद्या ॥ १॥ इति

सा हि परमेश्वरस्य बीजशक्तिः। तया रहितः परमेश्वरो न प्रवर्तते, न च जगत् सृजति। न वा केवलं स्पन्दितुमपि समर्थो भवति। अतएवाह शंकरः—

"शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्।
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि॥" आनन्द लहरी श्लो० १

सेयं परमेश्वरमाश्रयते। महासुषुप्तिरूपिणी चेयमेव। अस्यामेव मायायां स्वरूपान-भिज्ञाः संसारिणो जीवाः स्वपन्ति। यथाग्नेर्दाहिकाशक्तिः सदैवाग्निं समाश्रयते तथैव मायापि न विमुञ्चति ब्रह्मणः सहचारम्। यदाहुः—

"शक्तिश्च शक्तिमद् रूपाद् व्यतिरेकं न वाञ्छति।
तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव ॥ १ ॥

ईश्वरप्रत्याभिज्ञायामुत्पलदेवाचार्यपादाश्च।

सेयमेकैव, न नाना। "अजामेकाम्०" इत्यादि श्रुतेः। "इन्द्रो मायाभिः०" इत्यादि तु तदीयगुणभेदेनैव सत्वरजस्तमोरूप-गुणत्रयात्मिकेयं माया ज्ञान-विरोधिनी भावरूपा च नाभावरूपा। सा चानुमेया। अनयावच्छिन्नमीश्वरचैतन्य-मेवोद्भूतसत्वगुणमायावच्छिन्नं पालयितृ-विष्णु-नारायणादि शब्दैरभिधीयते। तदेवोद्भूतरजोगुणमायाविच्छिन्नं सृष्ट्-ब्रह्म-विधात्रादि शब्दाभिधेयतां भजते। तदेवोद्भूत तमोगुणमायावच्छिन्नं संहर्तृ महेश्वर-रुद्रादिशब्दप्रतिपाद्यतां भजते। तेषु तेषु च ब्रह्म-महेश्वर-विष्णु-कुमारादिषु विद्यमाना सा शक्तिर्ब्राह्मी माहेश्वरी-वैष्णवी-कौमारीत्यादि गीयते। सेयं माया न सती, नाप्यसती, न च सत्यसती। सदसद्विलक्षणत्वेनैवेयमनिर्वाच्या। अनिर्वाच्यत्वञ्चाह—

"प्रत्येकं सदसत्वाभ्यां विचार पदवीं न यत्।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवादिनः॥"

इति तत्वप्रदीपिकायां चित्सुखाचार्यवर्यः। यतो हि जगति पदार्थो द्विविधः सच्चासच्च। तयोर्यः सर्वदैकेनैव प्रकारेण विद्यमानो यस्य च केनापि ज्ञानेन विरोधो बाधो वा न भवति स सदित्युच्यते। यदि कस्यापि पूर्ववस्तुनः केना-प्यन्येन ज्ञानेन बाधो जायते तदा तदसत् कथ्यते। मायाविषये द्वावप्येतौ विचार-प्रकारौ न संगच्छतः। माया एव न सती यतो हि ब्रह्मज्ञानानन्तरं न जायते ब्रह्म-विदां कदापि मायाप्रपञ्चविज्ञानम्। केवलमज्ञानिन एव मायामोहितधियो भवन्ति। यदि माया सत्स्यात् कदापि न बाधिता स्यात्। सदैव तस्याः प्रतीतिः स्यात्। परं नेयमेतादृशी ब्रह्मज्ञानानन्तरं तस्या बाधात्। अतो नेयं सती। किन्त-र्हीयमसत्? अयमपि पक्षस्तस्यामसमीचीन एव। यतोह्यसत्पदार्थस्य कदापि प्रतीतिर्नहि भवति। यथा हि बन्ध्यासुतस्य, शशविषाणस्य, कमठीस्तन्यस्य गगनारविन्दादेर्वा कदापि प्रतीतिर्न हि भवति। ननु—

"एष बन्ध्यासुतो याति शशश्रृङ्ग धनुर्धरः।
कूर्मस्तन्य कृतस्नानः खपुष्पकृत शेखरः॥"

इत्येवं भवत्येव तत्रापि प्रतीतिरिति चेत्तत्तु—

"जरद्गवः कम्बल पादुकाभ्यां द्वारि स्थितो गायति मङ्गलानि।
तं ब्राह्मणी पृच्छति पुत्रकामा राजन् रुमायां लशुनस्य कोऽर्घः॥

इति वदेवोन्मत्त प्रलपनमात्रम्। परन्तु मायया प्रतीतिस्तु भवत्येव। अतः सा नासती। सच्चेन्न बाध्येत। असच्चेन्न प्रतीयेत। तदुभयधर्माभावेनोभयधर्मापि न। सा हि ब्रह्मणो न भिन्ना, नचाभिन्ना, न वा भिन्नाभिन्ना। एवमेव सा नाङ्ग-सहिता, नवाङ्ग रहिता, नचाङ्गसहितरहितोभयधर्मा। अतएवोक्तम्—

"सत्यप्यसत्यप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो।
साङ्गाप्यनङ्गाप्युभयात्मिका नो मायाद्भुतानिर्वचनीयरूपा॥

इति विवेकचूड़ामणौ शङ्कराचार्यवर्येण। इत्थं बाधप्रतीत्योरुभयोरप्यत्यन्त-विरुद्धधर्मयोरेकत्र मायायां सत्वप्रतोतेः सर्वथैवेयं विलक्षणाऽनिर्वचनीया च मायेति निश्चीयते। अतएव—"अनाद्यनिर्वचनीत्वे सति विपर्ययोपादानभूता विक्षेपश-क्तिप्रधाना च या सा माया" इति तल्लक्षणं पर्यवस्यति। इयं हि माया केवलं भ्रमा-त्मिका निराधारा सर्वन्यायमार्गदूरापेता मिथ्या-प्रतीतिरेव। कुमुदकुसुमकोमल-कलेवरा कामिनीव न सहते विचारप्रचण्डमार्तण्डाखण्डकिरणावलीम्। यथा वा तमः सूर्योदयसमयात्पूर्वमेव पलायते तत्प्रतापासहिष्णुः। अतएवाह नैष्कर्म्यसिद्धौ सुरेश्वराचार्यः—

"सेयं भ्रान्तिर्निरालम्बा सर्वन्याय विरोधिनी।
सहते न विचार सा तमो यद्वद् दिवाकरम्॥" इति॥

यदाह शङ्कराचार्यश्च विवेकचिन्तामणौ—

"अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्यात्रिगुणात्मिका या।
कार्यानुमेया सुधियैव माया यया जगत् सर्वमिदं प्रसूयते॥" इति॥

सा हि न स्वतन्त्रा परमेश्वराधीनत्वात्। जगतः पूर्वावस्था, प्रयोजनवती च। परमे-श्वरस्य स्रष्टृत्वसिद्धयेऽवश्यं स्वीकर्तव्या च, शक्तिरहितो हि न कस्मिंश्चिदपि कार्ये प्रभवति। ज्ञानाग्निद्वारा मायाबीजस्य शक्तेर्भस्मीभावान्मुक्तानान्तूत्पत्तिः कथमपि न भवति। यदाह भगवद्गीतायां श्रीकृष्णः—

"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन।" इति

ब्रह्म सूत्र १।४।१।३ व्याख्यानावसरे स्वीये शाङ्करभाष्ये शङ्कराचार्यश्चाह—"यदि स्वतन्त्रां काञ्चित् प्रागवस्थां जगतः कारणत्वेनाभ्युपगच्छेम, प्रसञ्जयेम तदा प्रधान-

कारणवादम्। परमेश्वराधीनात्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते। न स्वतन्त्रा। सा चावश्यमभ्युपगन्तव्या। अर्थवती हि सा। न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिद्ध्यति। शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः। मुक्तानाञ्च पुनरनुत्पत्तिः। कुतः। विद्यया तस्या बीजशक्तेर्दाहात्। अविद्यात्मिका हि सा बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुषुप्तिः। 'यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः।' इत्यादि। सा चा विद्या द्विविधा। मूलाविद्या तूलाविद्या च। तत्र या वियदाद्युपादानभूता, चिन्मात्राश्रिता, चिन्मात्र-विषया तथा निर्विकल्पज्ञाननिवर्त्या च सा मूलाविद्येति कथ्यते। या च शुक्त्य-वच्छिन्न चैतन्याश्रितरजतभिन्ना या शुक्तिस्तन्निष्ठं यच्छुक्तित्वं तत्प्रकारिका सविकल्पकज्ञान निवर्त्या सा तूला विद्येति कथ्यते। मायया आवरणविक्षेपशक्ति-द्वय स्वरूपञ्च मनोहरदृष्टान्त प्रदर्शनपुरःसरं प्रतिपादितं विद्यारण्येन पञ्चदश्याम्। तद्यथा—

"न भाति नास्ति दशम इति स्वं दशमं तदा।
मत्वा वक्ति तदज्ञानकृतमावरणं विदुः।
नद्यां ममार दशम इति शोचन् प्ररोदिति।
अज्ञानकृतविक्षेपं रोदनादिं विदुर्बुधाः॥" इति।

इयमेवाद्वैतवेदान्ते मायावादस्य संक्षिप्ता सरणिः॥ इति शम्।

:: :: कोऽयमद्वैतवादः ? :: ::

[सुन्दर झा 'शास्त्री' व्या० आ०, एम० ए० द्वितीयवर्षम्]

जगति यावन्ति वस्तूनि प्रत्यक्षाणि तान्येवोपजीव्य वर्तमान भौतिक-विज्ञानस्य कार्यकारणव्यवहारः समुल्लसति । परं साकल्येन भावजातमुपनयन्मूलकार्यस्य जगतः किं मूलकारणमिति अद्यापि दुरुपपादमेव । सत्स्वपि "मन्त्रद्रष्टार ऋषयो बभूवुः" इति पद-भाजकेषु बहुषु महर्षिषु, तैरुद्गीतासु—उदीरितासु च ऋक्षु सूक्तिषु तपोभुवि यापिताशेष-जीवनलब्ध-दिव्यदृष्टिषु सूत्रकृत्सु, तैः प्रणीतेषु च सूत्रेषु, कृतवैदुष्यसिन्धुलङ्घनेषु विद्या-मन्दिरोपासकेषु च भाष्यकृत्सु, तैः पल्लवितेषु च भाष्येषु अद्यापि यावदैकमत्यं नायातमिति स्फुटो भेदावभासः । सापेक्षिकोऽयं शब्दः स्वात्मानं सम्बन्धयितुं वस्तुद्वयमपेक्षते, ऐक्येऽधि-करणे पार्थक्यानुपपत्तेः । अस्ति भेदकोटौ स्वगतभेदोऽपि, परन्तु स्वीकार्य एव तावज्ज्ञान-विसंवादः । समेषां स्वसंवेदनसिद्धमिदं यत् सर्वस्य वस्तुनः विरोधिनी शक्तिरस्त्येव । यदि इदन्ता नाम जगति न स्यात् को हि नाम अहन्तया विमृश्यात् ? यदि दुःखं नाम जगति न स्यात् को हि नाम सुखमनुभूयात् ? अधर्मो धर्मेण, शोक आनन्देन, जन्म मृत्युना, दिनं रजन्या, सृष्टिर्लयेन, बन्धो मोक्षेण चान्योन्यमनुधाविता एव । नह्येकमेव वस्तु युगपत् कार्यं कारणं च व्यपदेष्टुं योग्यमित्येतावन्मात्रं सत्कार्यवादिनां सांख्यानामपि भेदज्ञानमभि-मतमेव । अलमिति क्लेशेन, एते हि पुनः द्वैतवादिन एव । ये तु पुनरन्ये तथा व्यपदिष्टा अद्वैतवादिनस्ते जगद्रूपकार्यस्य किं कारणमिति पृष्टे जगन्मिथ्येत्युद्घोषयन्ति । विचित्रमिद-मुत्तरं भो ! पानीयप्रार्थिने क्षारेण तृषा-तोषण प्रयासः । अपि नाम मन्ये मिथ्यात्वं जगतः, परन्तु कस्य कृते जगन्मिथ्या ? ब्रह्मण कृत इति चेत्, स्वस्य कृते इत्येव सुवचनम् । ब्रह्मणः सर्वस्य जगतः अनतिरिच्यमानत्वात्, ब्रह्मणि मिथ्याप्रतीतिर्जगत इति नह्येव साधुः, तथासति स्वस्मिन्नेव स्वात्मनः मिथ्याप्रतीतेः संभवात् । तथाहि—शुद्धबुद्ध नित्यमुक्तस्वभावं सच्चिदानन्दमयमेकमात्रमधिष्ठानं ब्रह्म एव सत्, अन्यत्सर्वं जगदिति साकल्येन व्यपदिष्टं कार्यजातं तस्मिन्नेव ब्रह्मण्यध्यस्तमित्युच्यते वेदान्तमर्मज्ञैः शंकराचार्यमहोदयैः । भ्रान्तेः कारणं तु अनादि अविद्यास्वरूपा मायेति । सा हि शुक्तौ रजतवद्, रज्जौ सर्पवद् ब्रह्मण्यपि जगतः मिथ्याप्रतीतिमुत्पादयति । परन्तु कष्टं भो ! कस्य मनसि मिथ्याप्रतीतिं जनयति

सा ? अध्यासस्थले हि त्रयाणामवस्थानमावश्यकम्—अधिष्ठानस्य, अधिष्ठितस्य, अधिष्ठातुश्चेति। प्रकृतौ च ब्रह्म अधिष्ठानं जगच्चाधिष्ठितमित्यनयोर्व्यतिरिक्तं किं नाम यदधिष्ठातृत्वेन गृह्णीयात् ? ननु देवदत्तादयः सर्वेऽधिष्ठातार इति चेन्न। ते तु जगदवयविनः भागभूताः सन्त आरोपिता एवेति पुनस्तेषामारोपकत्वासंगतात्। इदमेव धूलीप्रक्षेपणं वेदान्तिभिर्विधीयते यत्ते व्यष्टिगतदृष्टान्तमादाय समष्टेः सृष्टिं साधयितुं प्रयतन्ते। दृष्टान्ते तु अनेके प्रमातारः सन्ति, अनेके च प्रमेयाः, तर्हि इत्थं प्रतिपादयितुं पारयामो यत् "देवदत्तः शुक्तौ रजतमध्यस्यति"। दार्ष्टान्ते त्वखिलं प्रपञ्चभूतं जगदेवाध्यस्तं तर्ह्यधिष्ठात्रा जगद् व्यतिरिक्तेन केनचिद् भाव्यम्। अनयोर्जगद् ब्रह्मणोः व्यतिरिक्तं च किंचिन्नास्त्येवेति मूले कुठाराघातो जातः। पुनश्च दृष्टान्ते शुक्तिरजतयोरुभयोस्सत्ता सर्वविदिता। अतएव शुक्तौ कश्चित्प्रमाता रजतमारोपयितुं समर्थः। यदि हि तस्य दृष्टौ रजतं नाम जगति किमपि स्यादेव नहि, तर्हि कथं नाम स शुक्तौ रजतमध्यस्येत् ? प्रकृते तु प्रथमतः साकल्येन नीयमानस्य जगतः ब्रह्मणि—अधिष्ठानकर्तृत्वं नोपपद्यते, पुनश्च—'ब्रह्मनिष्ठात्यन्ताभावप्रतियोगिनो' जगतः अध्यासोऽप्यनुपपन्न एव। अत्यन्ताभावप्रतियोगिनः भ्रान्तिस्तु कल्पनातीता। दृष्टान्ते च रजतस्य नैवात्यन्ताभावः। ननु शुक्तौ रजतस्यात्यन्ताभाव इति चेन्न। अनेनैवान्यस्मिन्नधिकरणे तस्य भावप्रतिपादनात्। एकस्मिन्नेवाधिकरणे तमःप्रकाशवद् विरुद्धस्वभावयोर्धर्मयोस्सत्ताभावाच्च स्फुटो भेदः जगद्ब्रह्मणोः। अन्योन्याभाव एव भेदभित्तिरिति ब्रह्मजगतोरैक्ये ब्रह्मणि न कस्य चिदत्यन्ताभावः, यदि चेत् ब्रह्मणि जगत अभावस्तर्हि—उभयोर्भेदः अपरिहार्य एव घटपटयोरिव। सर्वथाऽसतोऽदृष्टपूर्वस्य वस्तुनः अध्यासोनह्येवोपपन्न इति जगतः अध्यासार्थं समस्त संसारस्य पूर्वदर्शनमावश्यकम्। न च संसारस्यानादित्वादतीतदृष्टसंस्कारोद्भूतस्मृतेरेव वर्तमानसंसाराध्यासे कारणता, एवमेव च आचार्यशंकरसम्मतस्य 'स्मृति रूपः परत्र पूर्वदृष्टावभासः'। इत्येवं रूपस्याध्यासलक्षणस्यापि सगतिरिति वाच्यम्। अस्मदादीनां सीमितप्रमातॄणां निखिलप्रपंचभूतस्याशेषब्रह्माण्डस्य कदाचिदपि प्रत्यक्षासंभवात्। पूर्वजन्मानुभूतस्य वस्तुनः परजन्मन्यनुवर्तनादर्शनाच्च। एवमपि आग्रहवशाद् यदि सकलवस्तूनां प्रत्यक्षत्वं कल्प्यते, तर्हि सीमितप्रमातॄणामपि सर्वज्ञत्वापत्तिर्दुर्वारैव। सर्वज्ञं तु ब्रह्म एव न पुनर्मायीयाः सीमितप्रमातारः। ब्रह्मणि चाध्यासकर्तृत्वं भ्रान्तिर्वाऽसम्भव एवेति दुरुपादः खलु ब्रह्मणि जगतामध्यासः।

पुनश्च—

शुक्तौ रजतभ्रमः, रज्जावहेर्भ्रमस्तु अधिष्ठानाध्यस्तयो रूपसादृश्यात्, अधिष्ठानस्य शुक्तेः पुरोऽवस्थितत्वात्, अधिष्ठितस्य च रजतस्य शुक्तिवच्चाकचिक्याच्च

उपपद्यते । प्रकृते तु अधिष्ठानं ब्रह्म सत्—जगच्चासत्, नीरूपं ब्रह्म—नानारूपं च जगत्, शान्तं ब्रह्म, अशान्तः खलु संसारः संसरणशीलत्वात्, आनन्दमयं ब्रह्म—क्लेशकलुषश्च संसारः, निरीहं ब्रह्म—सेहः संसारः, अजं ब्रह्म—जातः संसारः, निर्गुणं ब्रह्म—सगुणः संसारः, निर्विकल्पं ब्रह्म, सविकल्पश्च संसार इति सर्वथाऽनयोः सादृश्यं दूरापेतम् दुरुपपादश्चाध्यासः । एवमपि यदि नीरूपेऽपि रूपस्य, शुक्लेऽपि कृष्णस्य, शान्तौ च स्पन्दस्य भ्रान्तिर्भवेत् तर्हि व्यवस्थाभावात् पिपीलिकायाम् गजस्य, सर्षपे मेरोः, दुग्धे कज्जलस्य मसीवर्णवर्णिन्यादिवासिनि यूरोपीयस्य, ईषत्श्वेतीभूतजटासटाभिशोभिते बल्कलं परिदधति वृद्धतापसे उद्गतयौवनसंभारायाः नीलनिचोलशीलायाः कमनीयकामिन्या अपि भ्रमो भवतु नाम । न च तथा भवति ।

ये तु शंकराचार्यपादाः "न चायमस्ति नियमः पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति । अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति । एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः" इत्युद्गिरन्ते, तदपि जिज्ञासूनां चेतसि तुष्टिं नावहति । इदमप्युदाहरणं धूलीप्रक्षेपणमात्रम् । आकाशस्याप्रत्यक्षत्वेऽपि निःसीम शून्ये दृष्टिरबाधिता सती मलिनायत इव । सा च यद्यपि मिथ्या, तथापि शाश्वती भासमाना मलिनता सर्वप्रमातृसाधारणी न क्वचिदपि व्यभिचरति । एतेन स्फुटं यत्तत्राध्यासशब्दप्रयोग एव न समीचीनः, अपितु सिद्धान्तस्तावदयं यत् आकाशो विभुर्न तु सीमितप्रमातॄणामस्मदादीनां दृष्टिः । अतएव शून्येऽऽकाशे समुद्रतटादौ च दृष्टिर्निक्षिप्यते चेत् सीमानम् अप्राप्ताऽपि सा प्राप्तेव भाति—अशक्यत्वात् अन्यथा सर्वप्रत्यक्षत्वापत्तेः । पुनः कथं मलिनत्वमेवाध्यस्येत ? कथं न शुभ्रत्वं, कथं न पीतरक्तादिकं कथं नान्यत् ? दार्ष्टान्ते तु नानाविधाः सृष्टयः चेतनाचेतनरूपाः चमत्कारपूर्णाः विराण्मानवजातेः विचित्रसम्यतायाः संस्कृतेश्चोदात्तेतिवृत्तसहाः, केनचिदपि साकल्येनादृष्टपूर्वाः कथमनुक्षणं निराकारे सच्चिदानन्दमये ब्रह्मण्यध्यस्येयुरिति स्फुटं विभावयन्तु सुधियः । सर्वथैव न युज्यते दृष्टान्तदार्ष्टान्तियोस्संगतिः । यदा हि वेदान्तिनः कथं कथमपि सृष्टेर्युक्तिपूर्णां व्याख्यां कर्तुमक्षमाः भवन्ति, तदा ते माया दण्डं ब्रह्मास्त्रमिव प्रयुञ्जन्ते । ननु भो ! कुतः पुनरियं माया अकाण्डे कूष्माण्डपतनमिव, अनभ्रावृष्टिरिव, निरभ्रा विद्युल्लेखेव शुद्धशुभ्रशान्ताभेदविधुकल्पे ब्रह्मणि भेदभासयितृकलंककालिमेव समायाति ? सा च पुनरनादिः सृष्टेः कारणमिति कारणसत्वे कार्यसत्ता निर्बाधितैव । भवतु नाम ब्रह्मज्ञानाद् व्यक्तेरविद्याविनाशः तत्कृतो मोक्षश्च न पुनरशेषजगतामाकीटपतङ्गानामविद्याविनाशो मोक्षश्च संभवतीतीदं विमर्शोपलक्षितस्य जगतः प्रत्याख्यानं दुःसाध्यम् । भ्रन्तिस्तदैव भ्रान्तिर्यदि भवेत्तस्या औत्तरकालिको बाधः । इयं

हि सृष्टिरूपा भ्रान्तिः व्यष्टौ निवृत्तायामपि समष्टौ न कदापि निवर्तते, ततश्चेयं भ्रान्तिः समष्टिदृष्टया शाश्वती, अतएव नेयं सृष्टिर्मिथ्येतिव्यपदेश योग्या ।

पुनश्च यदि ब्रह्मणो व्यतिरिक्ता माया तर्हि सुतरामेव द्वैतापातः । अथापि यदि ब्रह्मणः शक्तिरियम्, शक्तिशक्तिमतोश्च बह्निदाहिकयोरिवाभेदः स्वीक्रीयते, तथापि महती विप्रतिपत्तिः । शक्तिर्हि शक्तिमतामधीना भवति । तथाच सति आवरणविक्षेपात्मिका माया ब्रह्मण इच्छयैव प्रयुज्यमाना चेत् कथं निरीहत्वं निर्गुणत्वमकर्तृत्वं च ब्रह्मणः संगच्छते ? सोद्देश्य सृष्टि-स्वीकारे च दुरुद्देश्यमिदं ब्रह्मणः कृते भवेत् यन्माययाऽऽत्मानमावृत्य स भेदात्मकं क्लेशकलुषात्मकं च जगद्विरचयेत् । तथाचाद्वैतवादप्रतिष्ठापनार्थं यावान् प्रयासो विधीयते, तावान् प्रत्युत द्वैततामेव साधयति । शंकराचार्यपादाः स्वयमेव द्वैतवादं खण्डयन्तोऽपि अज्ञातरूपेण मण्डयन्त इव विभान्ति ।

द्वन्द्वादेव सकलं कार्यजातमुत्पद्यते—इति चानुभवसिद्धमेव सर्वेषाम् । नहि पित्रोरन्यतरः पुत्रमुत्पादयितुं प्रभुः । नहि जातु कश्चिच्छून्ये नभसि हस्तमेकमावर्तयन् शब्दमुत्पादयति नाम । नहि उर्वराशक्तिभूषिताऽपि मही बीजेन विना शस्यं जनयितुं क्षमा । नैव बीजं रजोरूपया मेदिन्या विना नभसि क्षिप्तं सत् वनस्पतिमुत्पादयितुमलम् । तथैव नेदंतां विना कोऽपि अहन्तां विमृशति । नैवामू तमः प्रकाशवद् विरुद्धधर्मौ कोऽप्येकीकर्तुमीशः । नहि शिल्पि-सहस्रमपि घटं पटयितुं पटुः ।

इति कथं कथमपि मानसं परितोषयन्नपि—अयं प्रश्नः शिष्यत एव—कोऽयमद्वैतवादो नाम ?

सट्टकसाहित्यम्

[कु० अरुणा अग्रवाल एम० ए०, द्वितीयवर्षम्]

यथा संस्कृतभाषाबद्धानि नाटकानि मधुराणि रम्याणि मनोहराणि च सन्ति तथैव प्राकृतनिबद्धानि सट्टकान्यपि स्वमाधुर्येण मनांसि हरन्ति। विचारणीयमिदं यत् सट्टकस्य किं लक्षणं, कानि कानि च सट्टकानि, के के च तेषां कर्तारः। प्रथमस्तु सट्टकस्य लक्षणं विचारणीयम्। सट्टकमिति शब्दः प्रथमं तावत् महाकविना राजशेखरेण प्रयुक्तः। स एव सट्टकसाहित्यस्य जनकः। तन्मते अधोलिखितलक्षणोपेतं यत्साहित्यं तदेव सट्टकम्--

"सो सट्टओ त्ति भणइ दूरं जो णाडिआइ अणुहरइ।
किं उण एत्थ पवेसअविक्कभाईं णं केवलं होंति॥"

(कर्पूरमञ्जरी-प्रथमं जवनिकान्तरम्)

अर्थात् यन्नाटिकां दूरमनुहरति, यस्मिन् तु प्रवेशकविष्कम्भकौ न भवतः तदेव सट्टकं कथ्यते।

शारदातनयः भावप्रकाशने सट्टकमेवं लक्षयति—

"सट्टकं नाटिकाभेदो नृत्यभेदात्मकं भवेत्।
कैशिकीभारतीयुक्तहीनरौद्ररसादिकम्॥
सर्वसन्धिविहीनश्च नाटिकाप्रतिरूपकम्।
शूरसेनमहाराष्ट्रवाच्यभाषादिकल्पितम्॥
अङ्कस्थानीयविच्छेदचतुर्यवनिकान्तरम्।
छादनस्खलनभ्रान्तिनिह्नवादेरसंभवात्॥
न वदेत् प्राकृतीं भाषां राजेति कतिचिज्जगुः।
मागध्या शौरसेन्या वा वदेद्राजेति केचन॥
नाटिकाप्रतिरूपं यद्विशेषो रूपकस्य तत्।
राजशेखरक्लृप्तं तद् यथा कर्पूरमञ्जरी॥

(भावप्रकाशन - नवमाधिकार)

दर्पणकारस्याचार्यविश्वनाथस्य मते—

"सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम् ।
न च विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः ॥
अङ्का जवनिकाख्याः स्युः स्यादन्यन्नाटिकासमम् ।"
(साहित्यदर्पणम् ६—२७६,२७७)

प्राकृतभाषानिबद्धमुपरूपकमेव सट्टकं कथ्यते। अत्र तु प्रवेशकविष्कम्भकौ न भवतः। अद्भुतरस एव अस्याभिव्यङ्ग्यो रसः। अङ्केभ्यः जवनिका इति शब्दः प्रयुज्यते, अन्यच्च सर्वं वैशिष्ट्यं नाटिकावत् दृश्यते।

राजशेखरविरचितं 'कर्पूरमञ्जरी' सर्वप्रथमं सट्टकमस्ति। यायावरब्राह्मणः राजशेखरः कान्यकुब्जाधिपतेः महेन्द्रपालस्य उपाध्यायः राजकविश्च आसीत्। तस्य पिता कस्यचित् राज्ञः महामात्यः इति श्रूयते। तस्य भार्या अवन्तिसुन्दर्यपि विदुषी आसीद्यस्याः मनोरञ्जनायैव सः कर्पूरमञ्जरीमरचयत्। कविः काव्यशास्त्रस्यापि मान्यः आचार्यः अस्ति। अनेन विरचिता 'काव्यमीमांसा' काव्यशास्त्रसम्बन्धिनी उत्कृष्टा रचनास्ति। राजशेखरस्य समयः ८६४-९१५ तमः ख्रिष्टाब्दः अस्तीति मन्यते।

चतुर्षु जवनिकान्तरेषु कुन्तलकुमार्याः कर्पूरमञ्जर्याः नृपचन्द्रपालस्य च प्रणयकथा वर्णिता। देव्या विभ्रममलेखया ईर्ष्यावशान्नायकनायिकयोः प्रणयव्यापारे बहूनि विघ्नानि उपस्थितानि। एषां विघ्नानां नायकनायिकयोः मिलनप्रङ्गाणां च वर्णने कवेर्मौलिकता लक्षिता भवति। देव्या नयिका कर्पूरमञ्जरी बन्दीकृता। नायकनायिकयोः संयोगः सुरुङ्गाद्वारेण भवति। देव्या सुरुङ्गामार्गोऽपि रुद्धः। ततश्च भैरवानन्दतान्त्रिकस्य साहाय्येन नवीनमार्गः आविष्कृतः। वटसावित्रीमहोत्सवे पत्युः मङ्गलकामनया राज्यविस्तारेच्छया च प्रेरिता देवी राज्ञे विवाहस्यानुमतिं ददाति।

अस्मिन् सट्टके शौरसेनीप्राकृतस्य प्राचुर्यं वर्तते। पद्येषु महाराष्ट्रीप्राकृतस्यापि लेशः दृश्यते। वसन्तसन्ध्याचन्द्रोदयादीनां रूपसज्जादिविषयाणां च कवित्वपूर्णं वर्णनमस्ति। प्रेमगीतानि श्रुतिमधुराणि सन्ति। विरहवर्णने कवेः काव्यप्रतिभा प्रस्फुटा गीतिसौन्दर्यं, अनुप्रासमाधुर्यं, पदलालित्यञ्च सहृदयजनानां

मनांसि हरन्ति। शिष्टहास्योऽपि यत्रतत्रोपलभ्यते यया विदूषकः स्वपांडित्यं प्रमाणीकुर्वन् कथयति—

"मे ससुरस्य ससुरो पडिंअघरे पुत्थि आइं बहंतो असि"—(कर्पूरमञ्जरी प्रथमं जवनिकान्तरम्)।

विदूषकस्योक्त्या पांडित्यं परम्पराप्राप्तमिति मन्यमानानां जनानामुपहासः कृतः। अनेन सट्टकेन तत्कालीनसमाजस्य,नाटकरूपाणां, नृत्यप्रकाराणां च ज्ञानं भवति। शताधिकचतुर्चत्वारिंशत्संख्याकेषु श्लोकेषु सप्तदशानां छन्दसां प्रयोगोऽस्ति। तेषां आर्याशार्दूलविक्रीडितवसन्ततिलकात्रिष्टुप्स्रग्धरादीनि मुख्यानि छंदासि सन्ति। एभिः विविधैः छन्दोभिः इदं सट्टकं गीतिनाट्यमिव प्रतिभाति। लोकोक्तीनां सार्थकं प्रयोगबाहुल्यमपि दृश्यते।

'रम्भामञ्जरी' चतुर्दशशताब्देः रचनास्ति। सट्टकस्यास्य कर्ता कविः जयचन्द्रः जैनसाधुः आसीत्। किन्तु महच्चित्रमिदं यत्सः मङ्गलाचरणे विष्णुं स्तौति। 'हम्मीरमहाकाव्यम्' तस्यापरा प्रसिद्धा काव्यरचनास्ति।

कविः स्वकृतिं रम्भामञ्जरीं कर्पूरमञ्जरीतः उत्कृष्टतरा मन्यते, वास्तविकं त्विदं न प्रतीयते। रम्भामञ्जर्याः कथावस्तु मौलिकं सदपि रोचकं नास्ति। काशिराजस्य जैनचन्द्रस्य सप्त पत्न्यः आसन्। तस्य प्रणयः लाटनरेशदेवराजस्य कन्यया रम्भया सह सञ्जातः। नायकनायिकयोः संयोगविप्रयोगयोः मार्मिकं वर्णनं कृतम्। रम्भाहरणपर्यन्तं कथानकमेवात्र, कथायाः अवसानन्तु न कृतम्। कृतिरियं अपूर्णा इव प्रतीयते। अस्मिन् सट्टके त्रीणि जवनिकान्तराणि सन्ति। प्रथमे विवाहस्य, द्वितीये विरहस्य, तृतीये प्रणयव्यापारस्य च वर्णनमस्ति। फलागमात्मकं चतुर्थं जवनिकान्तरं नूनमेव स्यात् तत्तु अधुना लुप्तमेव। रम्भामञ्जर्यां संस्कृतभाषापि प्रयुक्तास्ति।

कालिकटवासिना रुद्रदासेन प्रणीतं 'चन्दलेहा' सट्टकमपि प्राकृतसाहित्यस्य गौरवमस्ति। रुद्रदासः ब्राह्मणजातीयस्य पितुः शूद्रजातीयस्याः मातुश्च पुत्रः आसीत्। १६६० तमः ख्रिष्टाब्दः तस्य समयः अस्तीति मन्यते।

सट्टकस्यास्येतिवृत्तान्तमत्यन्तं रोचकमस्ति। चिन्तामणिदेवानुग्रहेण अङ्गराजवर्मणः कन्या चन्द्रलेखा मानदेवनृपमुपागच्छत्। सः तु तां कन्यां प्रत्याकृष्टो-

ऽभवत्। देव्या भीतः सन्नृपः रहसि नायिकां दृष्टवान्। प्रेमरहस्योद्घाटने चन्द्रलेखा देव्या बन्दीकृता। देव्यै इदं ज्ञातं नासीद्यन्नयिका तस्याः मातृस्वसुः कन्यासीत्। चन्द्रकेत्वाभिधानः नायिकायाः भ्राता तामन्वेष्टुं तत्रागच्छत्। चन्द्रकेतोः चिन्ताहेतुं ज्ञात्वा देवी तत्स्वसारमन्वेष्टुं स्वभर्तारं प्रेरयामास। चिन्तामणिदेवानुकम्पया बन्धनान्मुक्ता सदस्युपस्थिताभूत्। तस्य देवस्यैवानुरोधेन देवी नायिकया सह स्वपतिं परिणेतुमुद्यताभवत्।

चन्द्लेहसट्टकस्य रचनाप्रकारं कर्पूरमञ्जर्याः रचनाप्रकारवन्मधुरमस्ति। भाषायां ओजगुणभूयस्त्वं वर्तते। शब्दालङ्काराणां बाहुल्येन दीर्घसमासैश्च भाषा सहजसौन्दर्यविहीना सञ्जाता। प्रकृतिवर्णनं मनोहरं स्वाभाविकञ्चास्ति। अस्मिन् सट्टके प्रयुक्तानि बहूनि छंदांसि कवेः छन्दोज्ञानं प्रकटयन्ति।

कूर्माञ्चलप्रदेशनिवासिना विश्वेश्वरकविना रचितं श्रृङ्गारमञ्जर्याख्यं सट्टकमपि प्राकृतभाषाभूषणं कथितुं शक्यते। कविरयं ख्रिष्टाब्दस्य अष्टादशशताब्देः पूर्वार्द्धे अभवत्। अल्पायुं लब्ध्वापि तेन विंशाधिकाः ग्रन्थाः प्रणीताः।

अस्य सट्टकस्य कथावस्तु सुन्दरतममस्ति। नृपराजशेखरः स्वप्ने एकां सुन्दरीं दृष्ट्वा विरहाकुलोऽभवत्। तं विरहातुरं दृष्ट्वा राजमहिष्या चेटीः वसन्ततिलका तं स्वप्ने दृष्टायाः सुन्दर्याः चित्रं लिखितुमकथयत्। राज्ञा निर्मितं चित्रं दृष्ट्वा चेटी तमसूचयत् यत् सा सुन्दरी चेट्याः सखी आसीत् सापि च राजशेखरविरहविह्वलाभूत्। देवी नृपं मदनपूजनावसरे आमन्त्रयति स्म। इतः उद्याने वसन्ततिलकाश्रृङ्गारमञ्जर्योः कलहोऽभवत्। देव्यानयोः कलहसमापयितुं नृपः प्रार्थितः। एतस्मिन्नेवावसरे नृपः नायिकां दृष्टवान्। ततः वसन्ततिलका नृपमसूचयत् यच्छृङ्गारमञ्जरी विरहव्यथया मरणाय प्रस्तुतासीत्। नृपः तस्याः रक्षार्थं प्रस्थानमकरोत्। एकस्मिन् कुञ्जे नायकनायिकयोः संयोगोऽभवत्। देवी विदूषकं वसन्ततिलकां श्रृङ्गारमञ्जरीं च बन्दीकरोति। गौरीपूजनसमये देवी अशरीरिणीं वाचमश्रृणोत् यत्तया पतिं प्रति कर्तव्यं करणीयम् देवी सर्वानमुञ्चयत्। श्रृङ्गारमञ्जरी च राजशेखरेण सह परिणीता। तदानीमिदमेव ज्ञातं भवति यच्छृङ्गारमञ्जरी अवंतिराजजटाकेतोः पुत्री आसीत्।

सट्टकस्यास्य कथावस्तुनि शैल्यां च कवेः मौलिकता दृश्यते। पद्यानि कवित्वपूर्णानि सन्ति। प्रसादगुणेन भाषात्यन्ता सरला सञ्जाता।

आनन्दसुन्दरीनामसट्टकं महाराष्ट्रचूड़ामणिघनश्यामस्य कृतिरस्ति। अस्य कवेः समयः १७००–१७५० तम ख्रिष्टाब्दः अस्ति। कविरयं बहून् ग्रन्थान् रचितवान्। घनश्यामरचितानि त्रीणि सट्टकानि सन्ति। परञ्च अद्यावधि द्वे सट्टके एव ज्ञाते। तयोरपि 'वैकुण्ठचरितं' लुप्तं जातम्। केवलन्तु आनन्दसुन्दरी सट्टकमेव उपलब्धमस्ति। अस्य सट्टकस्य रचनाकाले घनश्यामः तञ्जौरराजामात्यपदमलंकृतवान्।

सट्टकस्य नायिका आनन्दसुन्दरी अङ्गराजस्य कन्यासीत्। नृपशेखण्डचन्द्रस्य गुणश्रवणात् प्रणयातुरा सा पितुराज्ञां लब्ध्वा नायकमुपागच्छत्। गर्भांके इदं सूचितं यद्यथा सा देव्याः ईर्ष्याभाजनं न स्यात्तथा पुरुषवेषं धृतवती। देवी शङ्किता सती तां बन्दीकरोति स्म। सन्तानहीनत्वात् नृपः देवीं तोषयित्वा नायिकया सह स्वविवाहस्यानुमतिमप्राप्नोत्। गर्भाङ्के अमात्यस्य विजयः सूचितः। राज तस्मै पुरस्कारस्वरूपं स्वराज्यं दातुमुद्यतोऽभवत्। तस्मिन्नेव काले कुमारोत्पत्तिं ज्ञात्वा नृपः कुमारमानीतवान्। चारणादिभिः मङ्गलगीतानि प्रारब्धानि, सट्टकस्य चावसानञ्जातम्।

सट्टकसाहित्यस्य विषये यत् किञ्चिन्मयोपरि प्रपञ्चितं तेन स्पष्टमेवेदं यत् प्राकृतसाहित्यसमृद्ध्यै सट्टककाराणामपूर्वः योगः वर्तते इति ॥

परमाणुवादखण्डनम्

[राजेन्द्र कुमार मिश्रः एम० ए०, द्वितीय वर्षम्]

परपक्षखण्डनं, स्वपक्षमण्डनं चास्ति तार्किकाणां परिपाटी । सर्वे दार्शनिकाः स्वस्वबुद्ध्यनुसारेण जगदुत्पत्तिं निरूपयन्ति, 'प्रधानमेव जगत्प्रति कारणमिति' केचित् ईश्वरमित्यन्ये कथयन्ति, केचिच्चाभावं वदन्ति । एवं 'मुण्डे मुण्डे मतिर्भिन्ना' इतिन्यायेन सर्वेऽपि किमपि वदन्त्येव । तत्र नैय्यायिकानां मते तु परिमाणुभिरेव जगदिदं संभवति । ते जगत्कारणभूताः परमाणवः जडाः, नित्याः निरवयवाश्च सन्ति । तथा च परमाणूनां संयोग एव सृष्टिः तेषां विभागश्चैव प्रलय इति अवबुध्यते । सृष्ट्यारम्भे परमाणुभ्यामेव, द्व्यणुकः त्र्यणुकादिकश्च भवति । ततः क्रमशः चतुरणुकपिण्डघटपटब्रह्माण्डादिकस्योत्पत्तिर्जायते । तन्नोपपद्यते । वेदप्रमाणागोचरत्वान्न परमाणूनां स्वरूपे किमपि प्रामाण्यमस्ति । "एषोऽणुरात्मा" "वालाग्रशतभागस्य शतधा कल्पितस्य च । जीवो भागः स विज्ञेयः" इत्यादि बलाद् जीवस्याणुत्वं साध्यते चेत्तदा रूपवत्तया चाक्षुषप्रत्यक्षविषयत्वमेकदेशित्वमल्पज्ञत्वमंशित्वबह्वनर्थपरम्परा स्यात् तथा च श्रुतिशास्त्रविरोधेन परमाण्वात्मवादः कारणत्वधर्मेणाप्रमाणिकाः । कश्च स इति चेत् द्रव्यगुणकर्मसामान्यविशेषसमवायात्मषट्पदार्थवादो वैशेषिकः नैय्यायिकानामप्यविरुद्धौ हेयत्वार्थः । तत्र गुणादयाः द्रव्यपरतन्त्राः । भावकार्यं हि सर्वं समवायसमवायिनिमित्तकारणत्रयजन्यं । तत्र द्रव्यमेव समवायिकारणं । द्रव्याणि तु पृथिव्यादिमनःपर्यन्तानि नवैव । तत्र पृथिव्यादि चतुष्ठयानां परमाणव आकाशादि पञ्चकं च नित्यं । परमाणुभ्यो द्व्यणुकादिकमुत्पद्यते इतश्च द्व्यणुकादि ब्रह्माण्डांतं कार्यमयमनित्यम्, अवयवसमवेतत्वात् । किन्तु यथाऽपकृष्टमहत्परिमाणतारतम्यस्य परममहतिगगनादौ विश्रांतिः तथैवाणुपरिमाणतारतम्यस्य क्वचिद्विश्रान्तिरस्ति ? यदि जलसूर्यरश्मिस्थ रजसि त्रसरेणौ भवेत् तर्हि परमाणूनां सिद्धिर्न जायते चाक्षुषद्रव्यारम्भकत्वेनद्व चणकस्यापि सावयवत्वात् तस्यापि सावयवत्वेऽनवस्था भविष्यति । पुनर्यदि तस्य विश्रान्तिः परमाणौ वदेत् तर्हि सिद्धान्तापत्तिर्भविष्यति नैयायिकानाम् । अपि च परमाणुभ्यः सृष्टिप्रलयश्चापि नोपपद्यते, यतः यदिपरमाणुभ्यः सृष्टि-प्रवृत्तिः स्वभावादेव जायते तदा प्रलयाभावोपपद्यते स्वभावनित्यत्वात् निवृत्ति स्वभावत्वेऽपि निवृत्तिर्नित्यमेवभावात्सृष्ट्याभावः प्रसंगो भवति तस्य निवृत्ति-

स्वभावस्यापि नित्यत्वात् । यतः कारणं हि सर्वथा सर्वदा च कार्यरूपेण परिणमते । अतएव "असतः सज्जायतेति तेषां नैय्यायिकानां कथनमपि दूषितमेव । यद्येवं भवेत् तर्हि तिलेभ्यः घृतमपि भवेत् एवं पावकाच्च शैत्यमपि उत्पद्येत् । किन्तु एवं किमपि कदापि न केनापि दृष्टम् । श्रुतिरपि इदमेव प्रतिपादयति—"सदैव सौम्येदमग्रमासीत् ।" 'नासतोदृष्टत्वात्' इति न्यायेन अभावकारणस्य निराकरणाच्च कारणे सर्वथा कार्यानुकूलाशक्तिः अवश्यमभ्युपेया ।

अपि च वैशेषिकानां चतुर्विधा परमाणवः शब्दस्पर्शरूपरसगंधवन्तः नित्याः अणवश्च न भवितुमर्हन्ति विपर्ययेचार्हन्त्येव यथोक्तमाचार्यैः "……तथाहि परमाणवोऽनित्याः स्थूलाश्च भवितुमर्हन्ति रूपादिमत्वात् घटादिवत् । जगत्कारणस्य रूपादिमत्वेनानित्यत्वप्रसक्तौ स्वकारणापेक्षया स्थूलत्वावश्यकत्वादपसिद्धांतः रूपादिमत्वाच्च । "विपर्ययोऽदर्शनात्" इति पारमर्षेण सूत्रेणाणुत्वनित्यत्वविपर्ययं स्थूलत्वानित्यत्वे प्रदर्श्यपरमाणुकारणतावादखण्डनमकारि ।"

निश्चला परमाणवः जड़त्वात् कथं सृष्टिं कुर्वन्ति ? नैय्यायिकानां मते 'ईश्वरेच्छावशात्" । अर्थात् ईश्वरेच्छयैव परमाणवः परस्परं संयुक्ताः भवन्ति । किञ्चात्र ते प्रष्टव्या भवन्ति यत् परमाणुसंयोगे ईश्वरेच्छायाः किं कारणमस्ति ? तस्येश्वरस्य समग्रैश्वर्यशालित्वात् सर्वशक्तिमानत्वाच्च सृष्टि-करणे न कोऽपि उद्देश्योस्ति तस्य विभोः । यदि वदेत् कारुण्यत्वादीश्वरः सृष्टिमिच्छति तर्हि संसारे दुःखमयाः प्राणिनः कथं तिष्ठन्ति, सुखिन एव शरीरिणः भवेयुः । यदि वदेत् स्वशुभाशुभकर्मवशादेव जीवाः सुखिनः दुःखिनश्च भवन्ति तर्हि ईश्वरेच्छायाः किं मानं जगदुत्पत्तिविषये ? पुनश्च कर्मणः किञ्चिन्निमित्तमभ्युपगम्यते न वा ? आद्ये कर्मनिमित्तत्वेन प्रसिद्धजीवप्रयत्नव्याधातादय अंगीकर्तव्यं तत्तु न संभवति । सृष्ट्युत्तरकालीनत्वात्तस्य द्वितीये कर्मानुत्पत्तिः । अत-उभयथापि न कर्म । कर्माभावाच्च द्वयणुकादि क्रमेण सृष्ट्युत्पादाभाव इत्याशयः । पुनरपि विचार्यते किं संयोगश्चाणोरण्वंतरेण सर्वात्मना वा एक देशेन वा ? स्यात् सर्वात्मना चेदुपचयानुपपत्तेः अणुमात्रत्व प्रसंगो दृष्टिविपर्ययश्च प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगस्य दृष्टत्वात् । एकदेशेन चेत् सावयवत्व प्रसंगादनित्यत्वमापद्येत । यदि चोच्येत् परमाणूनां प्रदेशाः कल्पिताः तर्हि अवस्तुत्वादवस्त्वेव संयोगः भविष्यति तस्मादनुपपन्नः परमाणुकारणतावादः ।

प्रायः सर्वेषु निगमागमसम्मतपुराणेषु स्पष्टमेव स्मर्यते 'आकाशः शब्दमात्रं हि स्पर्शमात्रं समाविशन् द्विगुणस्तु ततो वायुः शब्दस्पर्शात्मको भवेत् ।। १ ।। रूपं तथैवा-

विशतः शब्दस्पर्शगुणावुभौ । त्रिगुणस्तु ततो वह्निः स शब्दस्पर्शवान्भवेत् ।। २ ।। शब्दः स्पर्शश्च रूपं च रसमात्रं समाविशत् । तस्माच्चतुर्गुणा आपो विज्ञेयास्तु रसात्मिकः ।। ३ ।। शब्दः स्पर्शश्च रूपं च रसश्चेद्गंधमाविशत् । संहतान्गंधमात्रेण तानाचष्टे महीमिमाम् ।। ४ ।। तस्मात्पञ्च गुणा भूमिः स्थूला भूतेषु दृश्यते । परस्परानुप्रवेशाद्धारयन्ति परस्परम् ।।" किन्तु वैशेषिकाः पार्थिवपरमाणुरधिकःगुणः तत एकैकन्यूनगुणा जलादि-परमाणवः इति मन्यन्ते । किन्त्वेवंरीत्या उपचितगुणानां स्थौल्यादपरमाणुत्वप्रसंगः । मूर्त्युपचयमंतरेण गुणापचयो भवतीति वक्तुं न शक्यं यतो हि कार्यभूतेषु गुणोपचय एव मूर्त्युपचयो दृश्यते । किन्तु तेषां मतमंगीकारे तेजसि स्पर्शोपलब्धिर्न स्यात् अप्सु च पृथिव्यां च रूपस्पर्शरसानां विपर्यये च अप्स्वपि गंधोपलब्धिः स्यात् एवमन्येष्वपि । इत्यु-भयथापि दोषात् परमाणुकारणतावाद अनुपपन्नः ।

एतेन जैनविशिष्टाद्वैतवादिनः सर्वे निराकृताः वेदितव्याः । अपि चाकाशादय अपि नित्याः न श्रुति सिद्धान्ते ब्रह्मभिन्नस्य सर्वस्य मिथ्यावात् तेषामुत्पत्तिश्रवणत्वाच्च । "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीति ।" अतएवायमश्रौतः परमाणुकारणतावादः न कैश्चिदपि शिष्टैः केनचिदंशेनापि परिगृहीत इत्यत्यंतमनादरणीय एव वेदनिष्ठावदभिमुमुक्षुभिरित्यलम् ।।

समय एव करोति बलाबलम्

[प्रह्लाद नारायण त्रिपाठी एम० ए० द्वितीय वर्षम्]

सत्यमेतत्, यत् संसारेऽस्मिन् ऋजुसमयस्य विचित्रा गतिरस्ति। न कोऽपि पुमान् अवगन्तुं शक्नोति-इदं दुर्ललितं समयस्य गमनम्। सर्वं कर्त्तुं शक्यतेऽनेन। अयमेव अबलीकरोति बलवन्तं निर्बलं च बली करोति यथाऽह श्रीमदाम्बिकाचार्यः—

विलक्षणोऽयं सकल-कला-कलाप-कलनः-करालः-कालः। स एव कदाचित् पयः-पूर-पूरितानि समुद्रतलानि मरूकरोति। कदाचित् सिंह-व्याघ्र-भल्लूक-शृगाल-शश सहस्र व्याप्तान्यरण्यानि जमपदीकरोति। मन्दिर-प्रासाद-हर्म्य-शृङ्गाटक-चत्त्वरोद्यानतडाग-गोष्ठमयानि नगराणि च काननीकरोति। निरीक्ष्यताम् कदाचिदस्मिन्नेव भारतेवर्षे इज्याशीलैर्यजमानैः राजसूयादयः यज्ञाः सम्पदिताः। कदाचित् इहैव वर्षावातातपहिमसहानि तपांसि तप्तान्यन्यैः। इतराणि च विविधानि शास्त्रविहितानि कर्माणि सम्पादितान्यपरैः। परं साम्प्रतं तु वैज्ञानिकैः वेदाः न अभ्यस्यन्ते, स्मृतयः न स्मर्यन्ते। यज्ञाः तिरस्क्रियन्ते। प्रजाः उत्पीड्यन्ते सन्तश्च सन्ताप्यन्ते। सर्वमेतन्माहात्म्यं खलु तस्यैव महाकालस्य। एष एव धनवन्तं निर्धनी करोति, बलवन्तमबलीकरोति, मतिमन्तं विमूढङ्करोति। असावेव मूल-कारणमस्ति सर्वेषाम्। अयमेवाहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभिनक्ति। अयमेव कारणं षण्णामृतूनाम्। एष एव विभजते उत्तरायणंदक्षिणा-यनञ्च। एतेनैव सम्पादिताः युगभेदाः, अनेनैव कृताः कल्पभेदाः। किं बहुना केनचित् सत्यमिदमुक्तं "कालस्य कुटिला गतिः"

कवि-कुलगुरुः कालिदासः चन्द्रसूर्ययोः स्वसमयपरिणामेन अवनति-मुन्नतिञ्च प्रदर्शयन्नाह—

"यात्येकतोऽस्तशिखरं पतिरोषधीनाम्।
आविष्कृतोऽरुण पुरस्सर एकतोऽर्कः।

तेजो द्वयस्य युगपद् व्यसनोदयाभ्याम् ।
लोको नियम्यत इवात्मदशान्तरेषु ॥ (शाकुन्तलम्)

न किमपि दैवाख्यं, समय एव विधिरूपेण तिष्ठन् सर्वं बलाबलङ्करोति तेषां मानवानां पूर्वानुष्ठितशुभाशुभकर्मभिः[1] । विलोक्यताम् महाकुटिलस्य प्रभावः । तस्य प्रातिकूल्ये सूर्यस्यापि सर्वं साधनं विफलत्वं याति, तस्य करसहस्रमपि तं रक्षितुं न शक्नोति[2] । विचार्यताम् कृतयुगालङ्कारभूतः क्षितिपतिर्मान्धाता, रावण-निहन्ता नृपवरः श्री रामचन्द्रः, तथा अन्ये भीमार्जुनयुधिष्ठिरप्रभृतयः योद्धारः अनेन कालेन किं न वञ्चिताः ? । समयस्य वैपरीत्ये नृपो दशरथोऽपि दिवङ्गतो निर्वासितश्च रामः । इयदधिकं किं नाम दुःखमस्ति । अनेनैव प्रकारेण पञ्चपाण्डवा अपि द्यूतक्रीडायां राज्यमवजित्य यावच्चतुर्दशवर्षपर्यन्तं वनवासिनो बभूवुरनुबभूवुश्च महान्ति अरण्यजातानि कष्टानि । राजा नलोऽपि बहुदुःखं सोढुं किं न शशाक ? किं बहुना । न कोऽपि तेन परित्यक्तः । कदाचिदस्मिन्नेव भारते (हर्षशोककाले) स्वराज्यमासीत्, मध्ये किञ्चित्कालपर्यन्तं यावद् यवनाधीनं भारतवर्षं तावद् यवनराज्यं बभूव । पश्चात् आंग्लशासकाधीनं भारतं जातं, साम्प्रतं पुनः सः स्वातन्त्र्यम् लब्धवान् । अयं प्रकृतेः समयस्य वा परिवर्त्तनं भवत्येव । पुंसां जीवनं कदापि क्वापि एकावस्थावस्थितिकं नैव दृश्यते । रात्रिदिवसयोरिव तेषाम् जीवने सुखदुःखयोः पर्यायेण समुपस्थितिर्भवति । इदमेव तथ्यमुररीकृत्य कथितं भासेन निजे स्वप्ने नाटके—

"कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा ।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण" ॥

अन्यदपि—

"कालक्रमेण जगतः परिवर्त्तमाना ।
चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिः" ॥ (वासवदत्तम्)

जगतः कृते इदं परिवर्त्तनमावश्यकं वर्त्तते यतस्तस्य स्वारस्यम् नष्टं न भवेत् । एकस्मिन्नेव रूपे वर्त्तमानानि वस्तूनि तथा शोभां न दधति यथा परि-

---

१. "अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्" (गीता)

२. "प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता
अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपि" ॥

वर्त्तनेन। जगतो वृद्ध्यर्थमिह परिवर्त्तनं नितान्तं वाञ्छितमस्ति। अतः जगतः कृते जन्ममरणयोः, सुखदुःखयोः, पापपुण्ययोः, सुकृतदुष्कृतयोः, दुर्जनसज्जनयोः, रात्रिदिवसयोः इत्यादि प्रकाराणां सर्वेषामपि वस्तूनां युग्मरूपेण सद्भावः नितान्तम् अभीप्सते।

अतएव कालक्रमेण परं परमापदां पदं प्राप्ता आदिभाग्यचक्रेण दुर्दैव-विलसितेन वा सङ्कटेषु आपतिता अपि दुरवस्थापि नीता आदि मानवाः केवलं धैर्यमवलम्ब्य पुनरपि निजामवस्थां प्राप्तुं प्रभवाः इत्यत्र निदर्शनं महापुरुषाणां चरितान्येव। गीतायाः शब्देषु "सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ" इति विचार्य विपन्नाः न भवेयुः। सूर्य इव एकरूपता भवितव्या नृषु। इदमेव महतां लक्षणम्[1]। धैर्यधनानां मानवानां सर्वथा सिद्धिर्भवत्येव नात्र कोऽपि सन्देहावसरः धीराः न कदापि साहसं त्यजन्ति। विघ्नेष्वागतेष्वपि अध्यवसायान्न विरमन्ति ते[2]। अतएवोक्तं "विपदि धैर्यम्...." इति कृत्वा इष्टानिष्टपरिणतिम् विचार्य आत्मनः पथः न प्रविचलेयुः, सन्तप्ताश्च[3] न भवेयुः, अपितु समयानुसारेणोचितं कर्म कुर्युः[4] यतः आत्मनः समाजस्य राष्ट्रस्य च हितं जायेत्। तस्मात् समयस्य महन्महत्त्वमस्ति। अतः व्यर्थमेव समयस्य हानिर्न कर्त्तव्या, अतिवाहितः समयश्च पुनर्नायाति। नराणामभ्युत्थानं समयस्य सदुपयोगेऽस्ति। समये सम्पादितानि सर्वाणि कार्याणि सफलानि भवन्ति। अनेनैव प्रकारेण विमूढधियोऽपि पुमांसः समयानुसारेण स्वकीयं कार्यं कुर्वन्तः, निरर्थकं समयं न यापयन्तः कालान्तरे एव सर्वं कर्त्तुं शक्नुवन्ति इति संक्षेपेण बलाबलं कर्त्तुं शक्यतेऽनेन समयेन। अतो यथार्थमभिहितं माघेन—

समय एव करोति बलाबलम्।

---

१. "उदेति सविता ताम्रः ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥"

२. "त्याज्यं न धैर्यं विधुरेऽपि काले धैर्यात् कदाचित् गतिमाप्नुयात्सः।"

३. "छिन्नोऽपि रोहति तरुः क्षीणोप्युपचीयते पुनश्चन्द्रः।
इति विमृशन्तः सन्तः सन्तप्यन्ते न ते विपदा॥"

४. "वर्त्तमानेन कालेन वर्त्तयन्ति मनीषिणः,"

साङ्ख्यमत समीक्षा

[श्रीमती गिरिजा देवी "निर्लिप्त" साहित्याचार्य द्वितीय वर्षम्)]

दुःखात्यन्त निवृत्तिरूपः मोक्षः । दुःखयोग एव बन्धः । स्वाभाविक गुणात् कस्यचन मोक्षो न भवति । 'अहं बद्धो विमुक्तस्स्यामिति' बन्धसामानाधिकरणेन मोक्षस्य पुरुषार्थः । स्वभावस्य यावद्द्रव्य भावित्वात् मोक्ष संभवे न अनुष्ठान लक्षणमप्रामाण्यम् । यथा शुक्ल पटस्य स्वाभाविकं शौक्ल्यं रागेणापह्रियते, बीजे स्वाभाविकी अङ्कुर शक्ति र्वह्निना ऽपनीयते इति दृष्टान्तद्वयेपि शौक्ल्यादेराविर्भाव तिरोभावावेव भवतः । काल सम्बन्धोपि पुरुषस्य बन्धो न । सङ्घात विशेषेणापि पुरुषस्य न बन्धः तस्य देहधर्मत्वात् । विहित निषिद्ध कर्मणापि पुरुषस्य न सम्बन्धः अनात्मधर्मत्वात् । किंतु भोग वैचत्र्योपपत्तये भोग नियामकतया दुःखादियोगरूपो बन्धः पुरुषेऽपि स्वीकार्य्यः ।

परतन्त्रा प्रकृतिः बन्धकारणम् । तदयोगादेव पुरुषस्य बन्धः ।

सत्त्व रजस्तमसां साम्यावस्था प्रकृतिः । प्रकृतेः महदादिपंचविंशतिगुणाः सांख्यवादिभिः स्वीकृताः सान्ति । अयं पञ्चविंशतिको गुणाः द्रव्य रूपाः । अत्रैव गुणकर्मसामान्यादीनामन्तर्भावः । महत्त्वस्य कार्यतया प्रकृतेरनुमानम् । सुखदुःखमोह धर्मिणि बुद्धिः । बुद्धावेव चित्तस्याहङ्कारस्य चान्तर्भावः ।

शास्त्रेस्मिन् त्रीणि प्रमाणानि । प्रत्यक्षमनुमानं शास्त्रं चेति । ईश्वरे प्रमाणाभावादीश्वरस्यानस्तित्वम् ।

साङ्ख्यैः पुरुषस्य सन्निधानादेवाधिष्ठातृत्वं सृष्टित्वं चेष्यते ।

इयं सृष्टिः अबुद्धिपूर्विका सन्निधानादेवाधिष्ठातृत्वमुपचरितम् । सङ्कल्पाद्यन्तःकरणं तप्त लौहवच्चेतनो जडितं भवति । बुद्धौ चैतन्या प्रतिबिम्वावृत्तिसाक्षितया विम्ब रूपश्चेतना । बुद्धिस्तु सङ्कल्पेन देह क्रियायामिव अत्रापि संयोग विशेषादेव नियामिका । उभयो आत्माऽनात्मनो विवेकेन सिद्धिः प्रमाणात् भवति ।

पुरुष प्रकृतिः उभौ नित्यौ पुरुषस्यापरिणामस्त्वेन कारणतः हानिः । प्रकृतेः कारणत्वमुचितम् । सर्व देह सम्बन्धात् प्रकृतेर्व्यापकत्वम् । तदुक्तं योग शास्त्रे—

ज्ञाताश्चित्तस्य वृत्तयः । तत्प्रभो पुरुषस्यापरिणामित्वात् । सर्वोपादानं प्रधानं न परिच्छिन्नं व्यापकमिति । अतएव वेदान्त सूत्रद्वयं प्रत्याचष्टे । वैधर्म्याच्च न स्वप्नादिवदुपलब्धेश्च । 'नेति नेति इत्येवं विधि वाक्यानि च विवेक परायण पराणि एव, नतु स्वरूपतः प्रपञ्च निषेधपराणि । कर्मणोऽपि न वस्तु सिद्धिर्भवति । यदुक्तम्—

"न कर्मणा न प्रजया धनेन त्यागेनैकेनमृतत्वमानशुः" प्रमाया साधकतमं त्रिविधम्—यदि प्रमारूपं फलं पुरुषनिष्ठमात्रं तदा बुद्धिरेव प्रमाणम् ! सा च वृत्तिः अर्थोपरक्ता प्रतिबिम्बरूपेण पुरुषारूढा सती भासते ।

तस्मादचैतन्य चैतन्ययोः अन्योन्यविषयता रूपोऽन्योन्यस्मिन् अन्योन्य प्रतिबिम्ब सिद्धः।

पूर्ववदनुमानं त्रिविधम् । यथा धूमेन बह्निपूर्ववत् । व्यतिरेकानुमानं शेषवत् यथा पृथ्वी तेन इतर भेदानुमानम् । पुरुषः स्वरूपो चैतन्ये पर्यवसानम् । तादृशो भोगः सिद्धः । प्रकृति पुरुषादिकं प्रमेयं पुरुषे प्रतिबिम्बितम् । भोगस्य तु नान्यस्य साधनम् प्रमाणेन प्रकृति पुरुषयोः तत्त्वाख्याने उभयं सुखदुःखे न भवतः । विद्वान् हर्षशोकौ जहाति इति श्रुतेः ।

श्रुतया सिद्धस्य निर्गुणत्वादेरपलापो न संभवति । अहं गौरः इत्यादिवत् । नित्येव ज्ञानरूपात्मा तस्माद्विलक्षणः जीवः साक्षित्वेन व्यवस्थितः । अतो ज्ञानार्थं पुरुषस्य न परिणामापेक्षा । तर्क सहकारेण श्रुतया च एकेवात्मा सिद्ध्यति । पुण्यवान् स्वर्गे जायते पापी नरके । अज्ञो बध्यते ज्ञानी मुच्यते । इति विभागेन बहवः पुरुषाः । यथा एकस्मिन् आकाशे रजो धूमादिना वृत्ते सर्वे प्रयुज्यन्ते एवं जीवः एकोऽपि सुखादिभेदेन भिन्नः ।

पुरुषस्य साक्षित्वं सम्बन्धमात्रेण न तु परिणामेन भवति । बुद्धेरेव साक्षी पुरुषः । पुरुषस्य कर्तृत्वं बुद्ध्युपरागात् । अतएव उदासीनोऽकर्ता इव भवति । अतएवोक्तम्—

"न विरोधो न चोत्पत्तेर्न बद्धो न च साधकः ।
मुमुक्षुर्न वै मुक्तो इत्येषा परमार्थता ।।"
"प्रकृतिः कुरुते कर्म शुभाशुभ फलात्मकम् ।
प्रकृतिश्च तदस्मात् त्रिषु लोकेषु कामगा ।"
"बन्ध मोक्षो सुखं दुःखं मोहापत्तिश्च मायया ।
स्वप्ने यथात्मनः ख्यातिः संसृतिर्नतु वास्तवी ।।"

एवं शुद्धं बुद्धं एको विभुरात्मा । तदतिरिक्तं सर्वं माया जन्यम् । इति ।

साङ्ख्यं च द्विविधम् । निरीश्वरं सेश्वरं च । निरीश्वरवादिनां मते प्रकृतिरचेतना त्रिगुणात्मिका प्रधानशब्दवाच्या महदादि रूपेण चेतनानामुपभोगाय परिणमति । सेश्वरवादिनास्तु ईश्वरं निमित्तं वदन्ति । जीवाश्च भोक्तारः । प्रकृतिरेव सर्वकार्याणामुपादानमिति । ईश्वरश्च क्लेशकर्मविपाकाशयैरपरामृष्टः ।"

"संस्कृत साहित्य महिमा"

[सावित्री नागप्पा बी० ए० द्वितीय वर्षम्]

भारतदेशोद्भवद्भिरन्यदेशोद्भवद्भिश्च विद्वद्भिरनादिकालाद्गीयमानमहिमाऽमरभाषामहत्वविषये किंचित्कथनम् मादृशस्याल्पमतिजनस्य कृते त्वस्तिसर्वथातिसाहसं खलु। तथापि यत्किञ्चिदस्ति सम्भवं मत्सकाशे तद्विनिवेदयामि सुरभारतीकलापरीक्षकाणां विवेकवतां साहित्यतत्वजुषां पाठकानां पुरत इति।

नास्त्यविदितं तत्र भवतां यत्प्राचीने काले विद्या बुद्धिकलाकौशलज्ञानविज्ञानादिषु सर्वासु च कलासु देशोऽयं भारतः सर्वेभ्यः देशेभ्यः उन्नततमः आसीत्। सर्वासामपि विद्यानामुत्पत्तिस्थानमिदं भारतवर्षमेवासीदिति नाऽत्र शंकावकाशः। अत्रत एव ज्ञानसूर्योदयं भूत्वा समस्तेषु देशेषु तस्य प्रकाशो प्रससार। अतएव मनुनापि प्रोक्तमासीत्—

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥"

अपि च विदांकुर्वन्तु तत्र भवन्तः यद्विद्याप्राप्तुकामाः जर्मनफ्रान्सइंगलैण्ड-जापान-चीन-तिब्बत प्रभृतयोऽपि देशाः शिष्यरूपेणात्रागत्य संस्कृतसाहित्यमधीयमानाः भारतवर्षं गुरुञ्च मन्यमानास्तस्य पादरजः मस्तके न्यस्यात्मानं कृतकृत्यं मन्यन्ते स्म। इदमेवास्माकं संस्कृतसाहित्यं लक्ष्यीकृत्यैकदा यूरोपभूभागीयः सकलसुद्धयुपास्यः महाध्यापको मैक्समूलरमहोदय इदं निजं निश्चितं मतं संस्कृतसाहित्यविषयेऽप्रकटयत् "यदि कश्चिन्मां पृच्छेत् यत् कस्मिन् भूभागे मानवानामन्तः करणं पूर्णताङ्गतम्? तर्हि सानन्दं निर्देशाम्यहं यदसौहि भूभागो भारतवर्ष एव। ज्ञानं विविध विज्ञानं वा यत्किमपि मनुष्यो विज्ञातुमिच्छेत्तस्य सर्वस्यापूर्व निधानं संस्कृतसाहित्ये एवास्तीति।"

तस्मिन् समये साहित्यविस्तारस्य सीमा नासीत्। अनेकैः पुरातनैः

भारतमातुर्लालितैरार्यानार्यजातीयैः पुरुषैरलङ्कृतं संस्कृतसाहित्यं देदीप्यमानमिवासीत् ।

को न जानाति धनिकधनंजयधनपाल प्रभृतिपण्डितमण्डलीमंडितधाराधिपभोजशासनकालीना संस्कृतसाहित्यालौकिकीं लोकप्रियताम् ? तदानीं सर्वैरपि संस्कृतभाषिभवितव्यम् इत्येव नियमासीत ? एकदा वसनानि वयन् राजगृहमागतः "किं त्वं संस्कृतं न जानासि ?"इत्येवं राजा पृष्टः कश्चित्तन्तुवायः तस्मिन्समये—"काव्यं करो मिनहि चारुतरं करोमि,

यत्नात् करोमि यदि चारुतरं करोमि ।
भूपालमौलिमणिमण्डितपादपीठ !
हे साहसाङ्क ! कवयामि वयामि यामि ।"
इति वदता भूपालमाह्लादयञ्चकार ।

पुरा किल पुरुषाणां तु का कथा भारतीयाः तु प्रतिभावत्यः गार्गीघोषा-मैत्रेयी-खना-देवहुति भारतीप्रभृतयोऽपि स्त्रियाः भारते समभूवन् याः शास्त्रार्थे वादिप्रतिवादि सम्मत्या मध्यस्थस्वीकृतवत्यः । स एव समयः सुवर्णमय आसीत् । सत्यम् यदीदृश्यो भारतीयाः भारतीविदुष्यो योषितः भारते जायेरन् तर्हि पुनरपि भारतं भारतं स्यात् । वयमीदृशं कालम् अविलम्बेनैवावलोकयितुकामाः स्म ।

किञ्च यदा मुद्रणयन्त्रस्य सुविधाऽपि नासीत् अर्थात् प्रचारस्य ग्रन्थलेखनस्य च आधुनिककालवत् साधनबाहुल्यं नासीत् तदैव तालपत्रेषु लिखित्वा एताः मुनयः कन्दमूलफलाशिनः ज्ञानविज्ञानविषयेषु नानाविधं ग्रन्थरत्नमद्यापि संस्कृतसाहित्यस्य माहात्म्यं प्रकटी करोति ।

संसारे नहि काचिदेतादृशी भाषा विद्यते यस्याः साहित्यं प्राचीनतादृष्ट्या अस्याः साहित्यस्य समतामासादयेत् । संसार-भाषाणां न केवलं प्राचीनानामेव अपितु आधुनिकीनामापि शिरोमणीभूतैव अस्माकं देववाणी वरीवर्ति ।

परं सत्यपि एतस्मिंस्तद्विषयकवृत्तान्तेऽधुना खलु महानेष परिताप विषयो यत्तस्याधुनिक प्रवाहो न सन्तोषप्रदः साधु च । सत्यं यत्प्राचीन ग्रन्थोद्धारः प्रतिदिनं क्रियमाणः श्रुतिपथमायाति । सत्यं गौरवं यशश्च प्रतिदिनमुत्तरोत्तरं

विवर्धमानं सान्त्वनां ददाति नो भारतीयानां चेतांसि, तथापि हि अधुना सा स्वकीयविषये बहुसुधारमपेक्ष्यमाणा दृश्यते ।

यतोहि अधुना वेदानामध्ययनमध्यापनं तु विलुप्तप्रायमेवास्माकं दौर्भाग्येण । केचिदेव विरला अंगुलिनिर्देश्याः दृष्टिपथमायान्ति वेदाध्ययिनः । साम्प्रतं संस्कृतस्य कृते एतादृशः समयः समायातः यत् भारतेऽपि संस्कृतभाषां परित्यज्य हिन्दी राष्ट्रभाषास्थाने स्वीकृता । नाहं हिन्दीभाषाविरोधमतिः परमिदं कामये यत् शीघ्रमेव संस्कृतस्य सुबहुप्रचारं सुपल्लवनं भवेत् ।

सम्प्रति केचन् लोके नव्यसभ्यतालालितमतयः विकृतमस्तिष्का आंग्लजनानां मानसपुत्राः जन्मना भारतीयाः किन्तु कर्मणा स्वरूपेण चाभारतीयाः संस्कृतभाषाविदाम्प्रति उपहसन्ति वदन्ति च यत् "संस्कृतस्याध्येतारः "पुस्तककीटा" "नितान्तं बुद्धू" पदवाच्याः सन्ति । मन्दः व्यवहारानभिज्ञाश्च भवन्ति ।"

अतोऽद्य निजगौरवमादातुं सर्वैरपि संस्कृताध्येतृभिः संकृतोद्धारप्रयत्ने योगदानं करणीयम् । बहुषु समाचारपत्रेषु निजयाचितानि प्रकाशयन्तु, राजकीयस्यतन्त्रस्योपरि प्रभावं माननीयं संस्कृतरक्षणाय । अन्यथा गृहे एवारण्यरोदनं कुर्वतां क्लेशमपवारियतुं कोऽपि श्रुतिविवरांगुलिमपवारयितुं न कामयेत् । अतः कथमेतत्सर्वं सम्पादयितुं शक्यते, कथं चास्मिन् विषये प्रचलितावर्तमानपठनपाठन प्रणाली साधिका भावितुमर्हति ? इति विचार्य सर्वैस्तदर्थं प्रयत्नो विधेयः ।

आशासे यत् गुणदोष विवेचकास्तत्र भवन्तः सामाजिकास्तदेतत्सर्वं विचार्य यदत्रानुपयोगि तदपहाय यदुपयोगी सुकरश्च तदङ्गीकरिष्यन्ति । यतोहि "गुणाः पूजा स्थानं गुणिषु न च लिङ्गं न च वयः"

सम्पादकीयम्

ज्ञानवर्धिन्याः स्वरूपं तदुद्देश्यञ्च समासेनैवावरणस्य द्वितीयपृष्ठे सनति-संसूचितम्। नात्र विषये केषामपि विचिकित्सा यद् विश्वविद्यालयीनां छात्राणां कृते तादृशोऽवसरस्तथाविधानि च साधनानि समुपलभ्येरन् यैस्ते शिक्षामाध्यम-भूतेन भाषाविशेषेण स्वीयान् भावान् लेखात्मकत्वेन मौखिकत्वेन च ससारल्यं ससाफल्यञ्च प्रकाशयितुं शक्नुयुः।

सुनिश्चितमेतद् यत् पत्राणां पत्रिकाणाञ्चैतत्प्रकारके पाटवसम्बर्द्धने एकं विशिष्टं स्थानम्। छात्राणां कृते तेषामुपादेयता नितरामेधते यदैतादृशं पत्रं प्रकाशयितुं ते स्वयमेव प्रयतेरन्, यतो विषयेऽस्मिन् सुकुमारमतीनां शिक्षितुकामानां छात्राणां कृते आत्मीयता सहानुभूतिश्च प्रप्यतेतराम्। अतोऽन्येपि छात्राः एवमनुकुर्वाणाः लिखितुमुत्सहन्ते।

पत्रिकेयं एतादृशानेव भावान् पोषयितुं प्रयतते। दृढमतयो विपश्चितो वात्सल्यभावनया तं तथैवावलोकयन्तु यथा पितरौ अग्रजाश्च शिशून् क्रीडावसरे श्रेष्ठजनोचितानि कार्याणि विदधानानीक्षन्ते, तेषाञ्च त्रुटिभिरपि सस्नेहं मोदन्ते; एवं जातायाञ्चावश्यकतायां साहाय्यमपि कुर्वते। प्रयासश्चासौ पत्रकारकलानभिज्ञा-नामल्पमतीनामन्तेवासिनां वर्तते। अतः पत्रिकायामस्याम् त्रुटयोऽपि संभवेयुः खलु। आशास्यते च यद् मर्मज्ञाः सहानुभूत्या ताः अवगच्छन्त अस्मानपि बोधयिष्यन्ति।

पत्रिकाया गौरवं तदुपादेयताञ्च कामयमाना वयं पूज्यानामाचार्याणां मान्यानां विदुषाञ्च लेखान् प्रसाद रूपेण प्रकाशयितुं सफला जाताः, अनेन महान् सन्तोषोऽजायत। संकोचश्चायमनुभूयते यत् योग्यताया अभावात् वयं तेषां सारगर्भितानां लेखानां तादृशं स्वरूपं दातुं नैव सफला अभूम यथा तेषां कृते समुचितमासीत्।

अतर्कितैः विध्नैः विश्वविद्यालयीया दशाऽपि प्रतिकूलतां याता यत् वयं पत्रिका प्रकाशनाशामप्यत्यजाम। परमस्माकं विभागाध्यक्षाणामाचार्याणाञ्चा-

शीर्वादैर्विघ्नापसारणसमर्थैः सक्रियसहयोगैः पदे पदे च वात्सल्यमयैरुत्साह-वर्धनैश्च सा निराशा तिरोहिता। तत्फलमेव पुरतो भवताम् समुपस्थितम्। स्वकीयोद्देश्य सिद्धिप्रयासे कियत्साफल्यमस्माभिराप्तं नैतत् शक्यतेवगन्तु-मवगमयितुञ्च। अत्र विषये तु मर्मज्ञपरीक्षका एव प्रमाणम्। एतावत्तु कथितुम-वश्यमभिलषामो वयं यद् कार्यमेतत्संपाद्य गुरुजनानां शुभचिन्तकानाञ्च स्नेह-भावमभिनव हार्दिकप्रोत्साहनञ्च समवाप्य नितरां मोदामहे।

प्रागेव अस्माभिः विनिवेदितं यद्वयं कार्येस्मिन्नैव सफला भवेम चेदस्माकं पूज्यानां विभागाध्यक्षाणां डा० सत्यव्रत सिंह महाभागानां, पूज्यपादानामाचार्य आनन्द झा महोदयानां, आचार्य श्रेष्ठाणां रुद्र प्रसाद जी अवस्थि महोदयानां पूज्य डा० अतुलचन्द्र वन्द्योपाध्यायानां, श्रद्धास्पदानां पं० रामचन्द्र जी द्विवेदिनां आदरणीयानां डा० मातृदत्त जी त्रिवेदिनां, आदरणीयानां डा० शिवशेखर मिश्राणां श्रद्धेयानां श्री मोतीलाल जी रस्तोगी महोदयानां, श्रद्धास्पदानां श्री जगदम्बा प्रसाद जी सिनहा महाभागानां, मान्यानां पं०महेश मिश्र प्रभृतीनामा-चार्याणामाशीर्बलं नैव प्राप्येत।

पत्रिकां प्रकाशयितुं माननीयानां श्री चन्द्रभानु जी गुप्त महोदयानां, माननीय श्री हेमवतीनन्दन बहुगुणा महोदयानां, श्री बंशगोपाल जी शुक्ल महाभागानां बहुमूल्यः सहयोग कृतः तदर्थं एतेषां महानुभावानां कृते हार्दिकधन्यवादाञ्जलयः अर्प्यन्ते। पत्रिकां कलापूर्णामभिनवां च विधातुं विश्रुतानां कलाकाराणां श्री श्रीकृष्ण जी अरोरा महाभागानां, आचार्याणां ललिता श्री प्रसाद पाण्डेयानां, श्री ललिताप्रसादोपाध्यायमहोदयानाञ्च सतत-सहयोगः समधिगतः तत्कृते वयं सर्वे तदाभारवन्तः। यैः स्वीयाः सारगर्भिताः लेखाः प्रेषिताः यैश्च सतीर्थैः कार्येऽस्मिन् सहयोगः प्रादायि तेऽपि धन्यवादार्हा साकमनेन सनति निवेदनेन मुहुर्मुहुर्वयं प्रार्थयामहे यत्:—

"प्रमाणसिद्धान्तविरुद्धमत्र, यत्किंचिदुक्तं मतिमान्द्यदोषात्।
मात्सर्यमुत्सार्य तदार्यचित्ताः प्रसादमाधाय विशोधयन्तु"॥

The Fine Press

★ ★ ★ ★ ★ ★★ ★ ★ ★ ★ ★

IN RESURGENCE OF THE NATION

'SINGH'S'

HAVE A PROUD RECORD OF SERVICE OF

Over 39 Years

Under their Founder Sardar Inder Singh.

Originating and developing the STEEL RE-ROLLING INDUSTRY IN INDIA IN 1928 and giving indegenous capacity to the Nation for production of Special Quality Railway Track Stores like TIE BARS, TWO WAY KEYS, SPRING STEEL LOOSE JAWS, COTTERS, RAIL ANCHORS, FITTINGS, ETC., by inventing rolling processes and by production of so many other stores, they have broken the foreign monopoly, saved millions worth of foreign exchange, opened avenues of employment to lakhs of our people and made India SELF-SUFFICIENT in various essential Steel Stores.

The Evolution continues silently and steadily facing all the vissitudes of business to serve the Motherland with unstinted efforts and venture.

Singh Engineering Works Private Ltd.

P. Box N. 66.

Tele { Grams—"SINGH"
Phone—4231, 22932, 22951, 22966.

The Singh Plate Mills Private Ltd.

Tele { Grams—"BILLET"
Phone—22062

KANPUR (INDIA)

★ ★ ★ ★ ★ ★★ ★ ★ ★ ★ ★

To serve the nation
GLASS BOTTLES
APPLE CIDER
OUR new Ventures
MALT EXTRACT
FOOD YEAST
SWORD BRAND
SAND PAPER EMERY PAPER
GARNET TAPES
EMERY CLOTH
DYER MEAKIN BREWERIES LTD.
ESTD. 1855
SOLAN BREWERY KASAULI DISTILLERY LUCKNOW DISTILLERY
MOHAN NAGAR BREWERY (U.P.)